Shiva Rahasya - Part 2

शिव रहस्य - उत्तर भाग

Sanskrit

Handwritten on Paper

Near about 200 years old

252 folios

15.2"x7"

Complete

शिवरहस्य तृतीयांश
उत्तरभाग

शिवार्चनेन सफलं जीवितं च यथा मम ॥ तथैव यत्नः कर्तव्यः सर्वथापि महात्मभिः ॥ अहोरात्रं परित्यज्य यो नैव
शिवार्चने ॥ अनाप्यं न कथमपि तस्य सर्वोद्भवभेदिनी ॥ यथा न गर्भवासस्य गर्भक्लेशोऽपि सर्वथा ॥ तथा प्र
यत्नः कर्तव्यः शिवलिङ्गार्चने मया ॥ शिवार्चनप्रकारं मे साधनान्यपि सत्वरं ॥ वद नाथ यथा शास्त्रं यैः
फलं लिङ्गपूजनात् ॥ गुरुस्त्वमेव मे भूप संसारभयमोचकः ॥ अन्यो गुरुर्भवेल्लोके न शिवाचारप्रवर्तकात् ॥
नृप उवाच ॥ कालं न कार्चनेनैव कालभीतिर्विनश्यति ॥ नान्यस्तं नाशकोऽपायो दृश्यते क्वापि सर्वथा ॥ तवास्ति
मदं दैन्यं ये अनेन कुरु पूजनं ॥ ऐश्वर्यमेव सामग्री शंकराराधनस्य तु ॥ यद्यपि श्रीमहादेवो जलेनापि
न वा सकृत् ॥ मुक्तिदः स्यान्न दाप्येत दैन्ये सफलं कथं ॥ इदमत्र विरमेश्वर्यमत्वमाप्य तु यथासती ॥ उपयु
क्तमिदं सर्वं स्यादत्राशु शिवार्चने ॥ धिक् धिक् धिक् धिक् न दैन्यं ये येन नाराधितः शिवः ॥ सफलं च न दे
श्वर्यं येनैवाराधितः शिवः ॥ शिवपूजनमुत्कृष्टं सर्वसिद्धिप्रदायकं ॥ न येन न कृतं तस्य जन्म तावन्नि
रर्थकं ॥ शिवप्रसादलब्धानि धनधान्यादिकान्यतः ॥ नैरर्जनं महेशस्य कृत्वा मुक्तिमवाप्नुयात् ॥ तदीयमेव
दत्तापि तस्मै सौभाग्यमुत्तमं ॥ प्राप्तव्यमिति नियतं तेन कर्तव्यं शिवपूजनं ॥ विना न पुण्यपुञ्जेन भक्तिर्मुक्तिं युतं ज
यार्चने ॥ अतः पुण्यात्मनामेतत् संभवेच्छिवपूजनं ॥ शेषपत्र

शीवार्चन

ॐ शिवाय नमः॥ याज्ञवल्क्य उवाच इति तद्वचनं श्रुत्वा सा राज्ञी भयविह्वला। वैराग्यं परमं प्राप्य नमुवाच
नृपोत्तमं॥ १॥ न शान्तिमेति सहसा घोरसंसारवासना॥ कथं वा तस्य शान्तिः स्यादुपायः कस्त्वया मितः॥ २॥
अपारघोरसंसारवासनाच्युतिसाधनं शिवार्चनमिति ज्ञातं न कर्तव्यं कथं वद॥ ३॥ तयाक्तो नो कुत्सित
त्वं वस्तु नस्तु निरूपितं न कुत्सितं न संदेहो दृश्यते वल्लभा रक्षु ४ अस्य देहस्य सौभाग्यमिदमेतावदेव हि
शिवार्चनोपयुक्तत्वं नामिरस्यावधारितं ५ अतः परं प्रयत्नेन शिवलिंगार्चने यथा देहस्यास्योपयोगस्या
त्तथा कार्यं मया नृप ६ शिवार्चनेन सफलं जीवितं च तथा मम॥ तथैव तैः कर्तव्यः स यथापि मया नृप॥
आहारं वा परित्यज्य वयोनेयं शिवार्चनैः॥ श्रुत्वा प्यंत कभीं निस्सा सद्यो हृदयभेदिनी॥ यथा न गर्भवासस्य गर्भक्लेशो पि सर्वथा॥
तथा प्रयत्नः कर्तव्यः शिवलिंगार्चने मया॥ शिवार्चनप्रकारं मे साधनान्यपि सत्वरं॥ वद तावद्यथाशास्त्रं यैः फलं लिंगपूजनात्॥ गुरु
स्त्वमेव मे भूप संसारभयमोचकः॥ अन्यो गुरुर्भवेत्को वा शिवाचारप्रवर्तकात्॥ नृप उवाच॥ कालांतकार्चनेनैव कालभीतिर्विनश्यति॥
नान्यस्तं नाशकोपायो दृश्यते क्वापि सर्वथा॥ न वास्ति महदैश्वर्यं अनेन कुरु पूजनं॥ ऐश्वर्यमेव सामग्री शंकराराधनस्य तु॥ यद्य
पि श्रीमहादेवो जलेनाल्पेन वा सकृत्॥ मुक्तिदस्तान्नदाप्येतदैश्वर्यं सफलं कथं॥ इदमस्थिरमैश्वर्यं मन्ये प्यायुस्तथा सति॥ उपयु

कमिदंसर्वस्याद्न्नाशुशिवार्चने ।। धिक् धिक् धिक् धिक् तद्देहमयं येननाराधितः शिवः ।। सफलंच तद्देहमयं येनैवाराधितः शिवः ।।
शिवपूजनमुत्कृष्टं सर्वसिद्धिप्रदायकं ।। नद्येननकृतंनस्यजन्मनावनिरर्थकं ।। शिवप्रसादलब्धानि धनधान्यादिकान्यतः ॥
तैरर्चनंमहेशस्यकृत्वा मुक्तिमवाप्नुयात् ।। तदीयमेवदत्वार्पितस्मैसौभाग्यमतुलमं ।। प्राप्तव्यमितियत्नेनकर्तव्यंशिवपूजनं ।।
विना नपुण्यपुंजेनभक्तिर्मृत्युंजयार्चने ।। अतः पुण्यात्मनानित्यंक्रियतेशिवपूजनं ।। शिवार्चने

नचिंते यः पुण्यवानपि मानवः तद्भावेन विज्ञेयो महापातकवानिति अतस्स दूरतस्त्याज्यो यो नार्चयति शंकरं तत्संयोगो
भिलापाद्यैर्मानवः पापवान्भवेत् येनकेनापिरूपेणप्राशरीरंप्राप्यमानवः शिवार्चनपरो भूयात्संभूयः पुण्यवान्भवेत् शिवा
र्चनपरो मर्त्यः संस्मृतः प्रणतः स्मृतः हरत्यघान्यनंतानि घोराणि विविधान्यपि घोरपापवनस्यायं कुठारः शंकरार्चकः अतः
सर्वैः प्रयत्नेन कर्तव्यं शिवपूजनं अतः परं त्वयोन्मादः परित्याज्यः प्रयत्नतः शिवपूजां कुरुष्वास्मात्तव मुक्तिर्भविष्यति शरीरं
शिवपूजायां यौवने दक्षमित्यतः प्रयत्नेन महादेवं पूजयस्व यथोचितं स्नानं कुरु प्रयत्नेन शिवकुंडे शिवोदके उद्धूलय भस्म
नांगानि त्रिपुंड्रं च प्रयत्नतः शिरोललाटवक्षस्सु स्कंधे च मणिबंधके कूर्परे नाभिदेशे च पार्श्वयोर्गंडमंडले ऊरुप्रदेशे गुल्फे च
त्रिपुंड्रं धारयेत्सुधीः रुद्राक्षधारणं कार्यं द्वात्रिंशत्कंठमालया शिखायामेकमेवस्याद्द्विचत्वारिंशदुत्तमा रुद्राक्षाः शिरसा धार्याः
कर्णयोर्द्वादश द्वयोः शतत्रयं तूपवीते बाह्वोः षोडश षोडश चतुर्विंशति रुद्राक्षाः द्वयोस्तु मणिबंधयोः अष्टोत्तरशतैरेव रुद्रा
क्षैर्जपमालिका तया पंचाक्षरं जप्त्वा शैवं शिवमवाप्नुयात् त्रिस्त्रिराचमनं स्त्रीणां पुंसामिव यथाविधि भवाद्यैर्नामभिर्वा शिव
पंचाक्षरेण वा पश्चात्कुशासने स्थित्वा यद्वा व्याघ्राजिनादिषु उदङ्मुखः प्राङ्मुखो वा पूजये गिरिजापतिं पंचामृताभिषेकाद्यैः क
र्पूरादिसमन्वितैः जलैः फलोदकैरिक्षुसामाम्रादिकरसैरपि शुद्धोदकैः कवोष्णैर्वा शीतलैर्वा मनोहरैः पश्चाद्दुकूलवसनैः पूजयि
त्वा सदाशिवं सुगंधचंदनेनापि पूजये गिरिजापतिं बिल्वपत्रैरक्षतैश्च प्रफुल्लकुसुमैरपि मंदारादिप्रसूनानां मालिकाभिः सम

र्चयेत् पश्चाद्धूपं च धूपैश्च दीपैः कर्पूरसंभवैः। ओदनैराज्यसंयुक्तैः शाकसूपसमन्वितैः। परमान्नैर्घृतयुतैः शर्कराराशिसं
युतैः लड्डुकैर्वटकैः साज्यैरपूपैर्मंटकादिभिः। भक्ष्यैर्लेह्यैश्च चोष्यैश्च पेयैश्च विविधैरपि। कदलीनारिकेलाद्यैः अपारैः फल
मंडलैः इक्षुखंडैश्च मंडैश्च दधिक्षीररसाद्रवैः। दध्योदनैश्च क्षीरैश्च दधिपूरैर्मनोहरैः। सुगंधजलपूरैश्च नवेक्षुरसपर्व
कैः द्राक्षारासिरसैरेलालवंगपरिवेष्टितैः ४३ अन्यैरपि रसद्रव्यैः पूजयित्वा महेश्वरं। पश्चादाभरणं दद्याद्रत्नराजिविराजि
तं पुनर्वस्त्राणि रम्याणि रत्नछत्रादिकं तथा। दर्पणं चार्जुनं चारु चामीकरविराजितं। चामरं पुष्पमालाश्च पताकाश्च मनोहराः। द
द्याः कर्पूरदीपानां नीराजनमनुत्तमं। पश्चादास्वरमीशाय प्रणोतानतेनोत्सवैः। रुद्राध्यायादिमंत्राणां स्तोत्रैः शांभवभोजनैः।
पुण्यैः शिवकथालापैः कालो नेयः प्रयत्नतः। एवमासायमीशार्चा कर्तव्या मुक्तिकांक्षिभिः। सायंकाले विशेषेण पुनः पूजां समार

भेत्। उक्तेनैव प्रकारेण मोक्षदं निशि पूजनं। लिंगरूपिणमीशानं प्रदोषे यस्तु पश्यति। सर्वेश कोटिसंयुक्तः शिवलोकं प्रया
स्यति ५० ब्रह्महत्यादिपापानां प्ररूयाय प्रजायते। शिवार्चनं परमिदं वेदवेद्यमिति श्रुतं ५१ प्रदोषकाले संप्राप्ते यः शिवं
नार्चयिष्यति स दुर्भगो भवत्येव नरकं च गमिष्यति ५२ अयमर्थस्तु विज्ञातः कुंभयोनिमुखान्मया। तेन वेदैः परिज्ञातं शिवार्चन
महोत्सवः ५३ याज्ञवल्क्यः इति तद्वचनं श्रुत्वा सा राजमहिषी तदा। तं प्रणम्य गुरुं मत्वा क्षमस्वेत्यब्रवीन्मुहुः। त्वं गुरुर्मम भा
ग्येन संसारांगारसागरात्। संसारान्तारयावेक्ष्य कटाक्षैः पुण्यपूरितैः। इत्येतत्तद्वचः श्रुत्वा तां ददर्श समूपतिः स्वसारमिव सं

रामः

१६६

साराद्विरतः शोकरः परः तामुवाचततोराजा स्वतंत्रानास्मिभामिनि। इतोयाहि गृहे शर्वं समभ्यर्च्याद्य सत्वरं स्त्रीणां पतिव्रतानां
तु सर्वथाभर्त्रनुज्ञया। विनानधर्मान्विरणात्तत्रापि शिवपूजनं। एकाकिन मयासार्धं के मंत्र संभाषणोसति। विपरीत मतिर्लोके लोका
नां तु भविष्यति। नचात्रपुरुषाः संति नांगनास्वपि केवलं। आवयोरिह संस्थानं अयोग्यमितिमेमतिः। यद्यप्येतस्य नारीषु त
रुणीष्वपि मे मनः। संतप्तं लोहखंड तुल्यं बुध्यानेवप्रवर्त्तते। ६७। अंगारसागरे कोवाप्रचरिष्यति सादरं। किंचिदत्र तथा दुःखं प्रचा
रेन भविष्यति। यदा शरीरमंगार सागरांगारसंयुतं। तदा तद्विलये दैवान्नास्य यामीय यातना। परदारशरीरेषु यतिर्यातिमनः
क्षणं। तदातु घोरनरके यातनानुभविष्यति। वरमेव सुराहारो गोमांसाहार संयुतः। परदाराभिगमनं नवरं नवरं खलु। परदारा
भिगमने यस्य इच्छाजायते यदा। तदेवनरकावासो जातस्तत्र न संशयः। भ्रांतानां परदारेषु रतिर्भवति यद्यपि। तथापि सा रति
स्तस्य नरकाय प्रजायते। अघोरनरकद्वारं परदारांगसंगमः। तत्र यस्यास्ति विरतिः स एव पुरुषोत्तमः। अविवेकेन दुष्टानां प
रदाररतिर्भवेत्। तेन जानंति तां दीर्घां घोरां नरकयातनां। परदारांगसंगेन महापातककोटयः। तुलां नयांति सहसा यस्मा
द्वारतरस्तु सः। परदारांगसंगेन यावंतो वा क्षणागताः। दुःखं तावत्स्व कल्पेषु कुंभीपाकादि घातनैः। परदाराभिगमनेन यस्य
विरतिर्भवेत्। सतावज्जारजो ज्ञेयो नरकाय प्रकल्पितः। एवंच मम प्रीतिः परदारेषु सर्वथा। तथापि संगः संत्याज्यं तैरेकांते वि
शेषतः। गुरुत्व बुद्धिर्मयि चेन्नवास्ति तदा वरं याहि गृहं स्वकं शुभे। अतः परं नात्र तवोचिता स्थितिः भर्त्रा सहस्वेयमितिप्रयाहि

क्षणमात्रं सुखाभासः परदारांगसंगमे। आकल्पं नरकावासस्तेन नाव दुःखेक्षानि॥ ७

कालोपि भयानगम इदरूपेय संभाव्यते नैव वनेतस्त्रु धा किं मम पिकार्यं त्रिव पञ्जनं हि व्यर्थप्रलापैरलमिस्य लं मे प्रतिक्षणं क्षीण
मिदं किलायुर्यद्यद्गतं तद्गतमेव वीत्र नतत्समायास्यति शरदैनेपि दुर्वार्त्ते यां किं फलमस्ति मातः निशिक्षणं चापि नरोत्त्वे तम मा
भः शरीरस्य च सुंदरस्य तवापि दूरे वसतिर्वरं मे मारः परं क्रूरतरः किशोरः वनानि नानाविध मारसेनाव्याप्तानि सर्वाणि म
नोहराणि पिकास्त्वयापं चमचंचुरास्ते दृष्टाप्रदृष्टानि किमनो दृष्ट्वा ७९ केकैरनैकैर्मदनानुकूलैः गंधानिलैश्चंपक संकुले
स्तैः किं किं न कार्यं मदनस्य कार्यं इदं मनं नो पवनं विषस्य ८० कुंदप्रपञ्चे मलिंदवृंदैः मरंदलोलैः समलंकृतेहि इदं तनू
नं मदनो सवाय मुहुर्मुहुः प्रेरयति प्रियं गे माकंद कुंदानि विलोकयाशु तान्येव तावलिक सुंदरीणां विलासयोग्यानि विलो
कयंति पिकाश्चैककारवभीत चित्ताः अन्यालिपुष्पाणि मनोहराणि तान्येव तावन्मदनायुधानि अतः सुतसत्वरमेव याहि भर्त्ता
रमभ्यर्च्यतिमतकारि अतः परं संगत कालपूजा मया विधेया मदनांतकस्य इतः प्रयाहि त्वरयाप्रयाहि प्रयाहि याहि त्वर
या प्रयाहि इतीय दिस्या रुमनं तदाघतदेव तावद्धनमित्यवैमि महेशपूजाप्रतिबंधकस्य महाघकूटस्य फलं तदेव हेतुर्यमा
वासजद्युः स्वभोगसंमोहमात्रस्य न संज्ञयात्र महेश्वराराधनसाधनानां संपादनेयः प्रतिबंधमात्रं करोतितद्दु श्रद्धताज्ञानस्या
त्स एवयत्रः प्रतिबंधरूपः शिवार्चनेकः प्रतिबंधमंधं करोति पापिष्ठतरं विनातु सकाकयोनिं शुनकस्य योनिं प्रयाति यस्तत्त
त्प्रतिबंधकस्यात् इदं शिवस्थानमतिप्रशस्तं लिंगं चतुंगं शिव लिंग यापि संकोपमेतस्य तु पजनेन मुक्तिः करस्था भवतीति मन्ये

[illegible]

निवनिरस्माकमपेक्षेनाहि भवेद्गुरुपूंजा प्रतिबंधकं

रामः
१९७

७ . ग

॥९०॥ अहो कथं लिंगमिदं मनोज्ञं मुक्तिप्रपारूपमिति स्मरंति ॥ तावन्महादेवपदारविंदमासेवमाना (?) बुध्यालयाः शंकरमाविशंति ॥ पत्रं फलं वा जलमत्रदत्तं अनंतपापौघविनाशकं हि ॥ अतः परं मा तरसा विलंबसोढुं शनैकः शिवपूजनाय ॥ वनानि तावद्वनजान्वितानि वनानि संसन्ति मनोहराणि ॥ तैरस्य लिंगस्य विशेषतोद्य कार्यं मया पूजनमेव याहि ॥ आयुः क्षीणमिदं प्रतिक्षणमहो मृत्युः शिरस्स्थः स्वयं कुर्वन्नेव कृताघसंघगणनां नायाति चायुर्गतं ॥ शंभुर्नार्चित एव नापि समनागाराधितः शैलजा वक्षोजांचितकुंकुमांकितपदांभोजं क्षपा वामया ॥ आयुः शंकरपूजया यदि भवेत्क्षीणं तदा तत्परं धन्यं धन्यतमं च तद्यदि भवेद्व्यर्थं तदा कुत्सितं ॥ तस्माद्दाशु महेशपूजनमनेनैवायुषा सर्वदा कर्तव्यं तदुमासहायचरणांभोजप्रसूनायमे ॥९५॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे याज्ञवल्क्यजनकसंवादो नाम प्रथमोऽध्यायः ॥१॥ श्रीसांबशिवार्पणमस्तु ॥

याज्ञवल्क्य उवाच ॥ इति तस्मिन्वदत्येव नारीरत्नं सखीजनैः ॥ सा सखीजनगते त्याशु शिवालयमुपागता ॥१॥ तं दृष्ट्वा दूरतो भूपं मदनापरविग्रहं ॥ मदनोन्मादसंवीतः सततं रंतुमना दधे ॥२॥ ततः काचित्कराग्रेण तमाकृष्य मदाकुला ॥ अयं ममेति मनुते ममेत्यन्या ममेति च ॥३॥ एवं सखीजनः सर्वस्तमावृत्य स्थितस्तदा ॥ तदा राजापि निर्विण्णः तरुणीकरसंवृतः ॥४॥ काचिदालिंग्य तं भूपं तुष्टा भवति काचन ॥ तान्दूरीकृत्य काप्यन्या तमालिंग्याधितिष्ठति ॥५॥ निराकृता साकयापि सा कयापि निराकृता ॥ एवं तदंगसंगन्ताः सर्वा मदविह्वलाः ॥६॥ मदनोयं समागत्य वने क्रीडति सादरं ॥ नायं त्याज्य इति प्राहुः तरुण्यस्ताः सहस्रशः ॥७॥ स राजाकृष्ट

मतावत्कथमागतमित्यपि चिंतयाम्याकुलस्तत्रचिंतयाकिंतयातया अपराधः कृतः कोवामदनारेःपुरामया नारीशरीर
रूपोयंमायास्वंगारसागरः अहोकिंदुरदृष्टंमेत्रिपिविष्टमहाप्रभो नारीशरीररूपोयंमायास्वंगारसागरः मयाकस्यमुखं
दृष्टंमद्यैवस्याद्यसत्वरं नारीशरीररूपोयंमायास्वंगारसागरः भस्मनोद्धूलनंप्रायःप्रातर्नकृतमित्यतः नारीशरीररूपो
यमायास्वंगारसागरः त्रिपुंड्रधारणंप्रायःप्रातर्नकृतमित्यतः नारीशरीररूपोयमायास्वंगारसागरः रुद्राक्षधारणंप्रायःप्रात
र्नकृतमित्यतः नारीशरीररूपोयमायास्वंगारसागरः शिवलिंगार्चनंप्रायःप्रातर्नकृतमित्यपि नारीशरीररूपोयमायास्वंगार
सागरः बिल्वपत्रैर्महादेवप्रातर्नोभ्यर्चितस्तलः नारीशरीररूपोयमायास्वंगारसागरः शिवलिंगेनीरधारानमयाकल्पित
स्ततः नारीशरीररूपोयमायास्वंगारसागरः नधूपदीपौदत्तौचलिंगरूपायशंभवे नारीशरीररूपोयमायास्वंगारसागरः
नैवेद्यंनमयादत्तंप्रातःशर्वायसादरं नारीशरीररूपोयमायास्वंगारसागरः प्रायोनप्रातःशंभुंप्रदक्षिणपुरस्सरं नारीशरी
ररूपोयमायास्वंगारसागरः २० नध्यातः प्रायशःशंभुर्गणनाम्यकवंदितः नारीशरीररूपोयमायास्वंगारसागरः प्रायःशांभ
वपूजाद्यनकृतातेनसत्वरं नारीशरीररूपोयमायास्वंगारसागरः प्रायःशिवकथाप्यद्यनश्रुताभक्तिपूर्वकं नारीशरीररूपोये
मायास्वंगारसागरः २३ महेशार्चननिघ्नायेकथमद्यसमागतः नारीशरीररूपेणाकिंविधेयमतःपरं कैरराकर्ष्यतेताः सर्वोक्ता
वन्ममेत्ययं पतत्येगेममोत्संगेतुंगागारनिभप्रभाः अहोकिमिदमाश्चर्यंसृष्टमीशत्त्वयाधुना कोपसर्ष्टिरियंप्रायोनांगनास

रामः
१६८

रिरिष्टदा येतासांमारधीर्जाताममयिसुंदरविग्रहे ममभारदृशामेवशापयामेयशंकर निवार्यमहत्कष्टमिदमेतादृशंप्र
भो विघ्नकोयंसमुत्पन्नोनारीरूपपाशंकर नारीगवाक्षैदृतस्यनरूज्ञानजलमज्जनं किमेतोविघ्नएवायंनरीरूपमुपागतः
२९ शिवार्चनेनविज्ञातंअमितंफलमिस्यतः अस्यविघ्नःसमुत्पन्नःसविघ्नोहिमहत्फलं अविघ्नानिभवंत्येवबहून्यल्पफलानि
तु महाफलानिधर्मोपिसविघ्नानीतिनिश्चयः अतःपरंकृतव्यंकिंकर्तव्यमतःपरं एतद्विघ्नापहरणंकर्तुंशक्तिश्चकस्यवा शी
कुरैवेवसृष्टाचेदीयंविघ्नपरंपरा तदानिवारकःकस्यात्तत्सृष्टिःप्रबलाखलु आपत्कालइवाभातिसोयमुद्वेगसाधनं करोत्ये
तादृशोविघ्नोनजातःसर्वधाखलु सत्कमद्येवागनांगसंगभीत्यागृहादिकं पुनरप्यागतःसोयमंतरायस्तदात्मकः एवंव्याकु
लचित्तस्यतस्यधीरस्यसर्वधा विकारोनाभवदेहेहकाष्टस्यैवमहात्मनः ततःपरंविवसनेहृत्वारूपकुचेष्टया नग्नाश्चस्तास्समारु
ह्यस्कंदादीननतुर्नृप तथापिनिर्विकारस्यतस्यापपस्यतास्वपि पतंगधीःसमुत्पन्नादृढवैराग्यभाग्यतः ततःपरंतुताएस्सन
पुंसकइत्यपि निश्चित्यनिर्ययुस्तस्माच्छ्रीमहादेवमंदिरात ततःपरंराजपत्नीसाविलोक्यतदद्भुतं विस्मयाविष्टहृदयाचिं
तयामासचेतसि ४० अयंनपुंसकःप्रायो नग्नस्त्रीदर्शनादपि नचचालनचेष्टांचचकारांगविशेषतः यद्वाविरक्तएवायंकु
त्सितत्वावबोधनात कोवानुरागसहितःस्त्रीणांमानिविलोकनात अंगपुष्टिःसौंदर्यमपारमिदमिस्यतु अस्यपुंस्त्वनसंदेहो
विरक्तःकेवलंनृप एतादृशास्तुपुरुषा नदृष्टानश्रुतापिहि भाग्यवानयमेवैकोलोकोत्तरगुणाश्रयः एतस्यदर्शनादद्यममापिम

दनज्वरः समुत्पन्नः प्रशांतोपि तत्कथाश्रवणादिह ॥ एतस्मिन्नंतरे काले तत्कलत्राणि कोटिशः ॥ समागतानि तत्रास्तीत्सा क
न्यैस नृपोत्तमः ॥ समागताश्च तत्रैव गजाश्वरथकोटयः ॥ मंत्रिकोटिसमाकीर्णा पत्तिकोटिसमाश्रिताः ॥ ततः कोलाहलो जातः
संपूर्णो पृथिवीतले ॥ नगरं तत्समावेष्ट्य ते सर्वे मंत्रिसत्तमाः ॥ शिवालयस्य प्रासादं ददृशुस्तुंगमुत्तमं ॥ सौंदर्यनिधिरत्रैव स्थास्य
तीति ते मेनिरे ॥ ततः परमयं राजा सौंदर्यनिधिनामकः ॥ तत्रास्तीति विनिश्चित्य ययुरुद्यानमुत्तमं ५० तत्रापि चिंतयामासुरुद्या
नमिदमुत्तमं ॥ कथं स्थास्यति राजायमत्र पुष्पकुलाकुले ५१ अयं विरक्तो न स्थास्यत्यत्र ताबद्धनेशुभे ॥ किं चावस्थानबीजं च
शिवस्थानमिदं खलु ५२ तस्य राज्ञः शिवस्थाने केवलं स्थितिरिष्यतः ॥ अन्यत्र गमनं तस्य नैव संभावितं खलु ॥ अस्माकं यद्दिशा
गंधस्याद्दत्रैस्था स्यस्ययं नृपः ॥ शिवस्थानं विहायायमीदृशं नैव यास्यति ५४ ध्रुवं निर्गतो गेहाद्दूरदेशं न यास्यति ॥ अदूरेन
शिवस्थानमीदृशं दृश्यतेपि च ॥ एतादृशं शिवस्थानप्रासादमवलोकयन् ॥ स्वहर्म्यरम्यशिखरे नृपः खलु पुरास्थितः ५६ एवं नि
श्चित्य ते सर्वे तदुद्यानावलोकनं ॥ कर्तुं समुद्यतास्तत्र शिगवांददृशुर्नृप ५७ ततः परं तु ते सर्वे संशयाविष्टमानसाः ॥ स्त्रीसंकुले
वने नूनं न स्थास्यति नृपोत्तमः ५८ परांगनानां पदृष्ट्वा नपरस्तावदत्वा ध्रुवः ॥ सकथं वा वने स्थास्यत्यनेतवनितारते ॥ ९ कतुका
लेपि राजायं स्वनारीसंगमे विधेः ॥ प्रवृत्तस्तेन संजाताः कुमाराः पुण्ययोगतः ६० तस्य नारीषु न स्नेहः न भोगे सुतरामपि ॥ राज्ये
पि तस्य न प्रीतिर्यथा शंकरपूजने ६१ शिवध्यानरतो नित्यं न नारीमभिपश्यति ॥ शिवलिंगावलोकने ब्रातस्य सर्वात्मना खलु ६२

रामः
१६९

इदं तु तद्वस्थानस्थलमेव न सर्वथा॥ दृष्ट्वापि नारीः सहसा न दृष्टोऽतेन सत्वरं तरुणीमत्तणारण्यमिदमुद्यानमेव न वनिता
वनमेवेदं अत्र तस्य स्थितिः कथं॥ एकैकं तरुमारुह्य नृत्यंति तरुणीगणाः॥ अत्र तस्यापि वैरूपस्य शंकितावि कि मवस्थितिः॥ मह्याप्रातः
समागत्य प्रविष्टः शिवमंदिरं॥ शिवध्यानसमाक्रांतप्रायस्थास्यतिभूपतिः॥ सूर्योदयोत्तरं तावद्वनितास्ताः समागताः॥ तदुद्यान
वनक्रीडां कुर्वंस्तत्र तु कोविदाः॥ अविवेकस्वभावास्तास्तरुण्यः शिवदर्शने॥ अनुत्सुकास्तरुष्वेव क्रीडंति फलितेष्विह॥ एवं सति शि
वागोरस्थातुमर्हति भूपतिः॥ एतादृशं शिवस्थानं न त्यक्ष्यतिमहीपतिः॥ ७० अस्माकमत्र सहसा तरुणीगणसंकुले॥ वने प्रवेशो
युचितो न भवत्येव सर्वथा॥ ७१ वनितासंकुले देशे वनितानां गतिर्मता॥ अतः प्रयांतु वनिताः प्रविशंतु शिवालयं॥ तत्रैव चेन्नृभवे
द्राजा सुंदरे शिवमंदिरे॥ बिल्वमूलादिपर्यंतु शिवलिंगावृतान्यपि॥ प्रविशंस्वति तीव्रेण न सत्त्योबालकैर्युताः॥ अन्यासां तत्र गम
नं नारीणां तत्र सर्वथा॥ ७४ इत्यालोच्य प्रधानास्ते तत्कलत्रानुमोदकाः॥ तासां तत्र प्रवेशार्थमुद्योगं चक्रुरादरात्॥ प्रविष्टास्तत्र ताः
स्सर्वाः गृहीत्वा बालकानपि॥ शिवमंदिरमाविश्य प्रयातास्ताः सदाशिवं॥ ७५ रत्नैर्मनोहरैस्तास्तु भस्मोद्धूलितविग्रहाः॥ त्रिपुंड्ररु
द्राक्षयुताः पूजयामासुरीश्वरं॥ ७६ स्तनंधयान्वाङ्कमध्ये गृहीत्वा वक्षसा युतान्॥ स्तन्यं च पाययंत्यस्ताः प्रविष्टाः काश्चिदादरात्॥
सगर्भाः काश्चिदुत्कृष्टाः पूर्णगर्भाश्च काश्चन॥ अजातयौवनाः काश्चित्काश्चित्संपूर्णयौवनाः॥ सौंदर्यधारारूपास्ताः सर्वाश्च रतिसुंद
राः॥ रमा मनोहराः सर्वा रूपश्रीविराजिताः॥ ८० ताः सर्वा अपि तद्दृष्ट्वा सोऽयं भर्त्ता ममेत्यपि॥ प्रहृष्टवदना एव स्मेरांचितमुखांबुजाः॥ शिव

७

ध्यानरतं धीरं विनिमीलितलोचनं दृष्ट्वाविनिर्गताः सर्वाः मंदभाषणवर्जिताः त्वयादृष्टस्त्वयादृष्टः त्वयेत्यन्योन्यमादरात्
मंदमाभाषणं कृत्वा सो साहास्तरुणीजनाः अपरामारसेनैव तन्नारीमालिकामुदा दृष्टा तद्राजपत्न्यासा सर्वाभरणभूषिता सा
पितत्तरुणीसंघं विस्मयेन समाकुला कुतः समागतं कस्य कलत्राणीति सादरं ८४ पप्रच्छ वै नयानभ्रात सौंदर्यपराजिता तास्तंधा
नसमाविष्टराजानं वीक्ष्य लज्जया ८५ मंदमाहुः प्रयत्नेन संहृयान्यत्र तां तदा नीता स्मेरसमायुक्ता प्रफुल्लवदनांबुजाः कलत्राणि
वयं राज्ञः शांभवस्यास्य शोभने वैराग्यभागृहं त्यक्तं अनेनैव महात्मना सर्वदा शिवपूजायां निरतः सोयमास्तिकः अनेन न नारीवदनं सो
त्साहं नैव दृश्यते ऋतुकाले धयं नारी प्रत्यवायभियापरं भुंक्ते तद्भोगकालेपि शिवध्यानपरायणः नित्यनक्तव्रती सोयं सायंकाले शिवा
र्चनं कृत्वा भुंक्ते निशि सदा शांभवैस्सह सादरं ९० अरुणोदयमारभ्य मध्यरात्रावहि स्वयं काले शिवार्चनेनैव नयति प्रतिवासरं ए
तेषु बालकेष्वस्य बालकत्वेन सर्वथा न प्रीतिः किंतु शैवत्वबुध्या प्रीतिः कदाचन भस्मोद्धूलितसर्वांगः त्रिपुंड्रांकितमस्तकः रुद्राक्ष
मालाभरणः सर्वदाप्ययमास्तिकः न चंदनानुलिप्तांगो न वा रत्नविभूषणः न वांगनांगसंतुष्टः न वा राज्यरतः सदा अत्यक्षणाकाले
बालानामंगशोभार्थमादरात् अस्माभिश्चंदने दत्ते सहते न स भूपतिः प्रक्षाल्य शिवतीर्थेन बालपुत्रांगमादरात् उद्धूलनत्रिपुं
ड्राभ्यां भूषितं तत्करोत्यपि कदाचिदस्य बालस्य रत्नकंचुकवेष्टितां रत्नाभरणसंयुक्तां ददर्श सतनुं नृपः ततः परं कंचुकं च सर
त्नाभरणान्यपि दूरीचकार यत्नेन मकुटं चास्य भूपतिः ९८ भसितालेपनं कृत्वा ददौ रुद्राक्षकंचुकं रुद्राक्षमकुटं चैतत् ददौ रुद्रा

श्रीरामः
श्री

क्षमालिकां एवं शिशूनां सर्वेषां कन्यकानां च भूपतिः प्रयच्छति प्रयत्नेन रुद्राक्षाभरणान्यपि १०॥ शिवार्चनेन कालोयं नीयते
तेन सादरं पूर्वेद्युर्निर्गतो गेहाद्यात्राजातीर्थाटनोद्यतः १ देवादत्रागतो राज्ञि राजवेश्मं विहाय तु रत्नमंदिरमेतन कारितं शंकराय
च २ अंबिकायै गणेशाय कुमाराय च सादरं पूर्वेद्युर्निर्गतो गेहाद्यात्राजातीर्थाटनोद्यतः ३ देवादत्रागतो राज्ञि राजवेश्मं विहाय
तु रत्नप्राकारसंयुक्तं रत्नप्रासादवेष्टितं रत्नपर्वतसंकाशाः प्रासादाः कोटिशो नवाः सुधाकरकराकारतारहारविराजिताः
कारितास्तेशरद्राकानायकप्रतिमाश्रियः कारितानि मनोज्ञानि राज्ञा पुष्पवनान्यपि अयं भोजनकालेपि नान्यवार्त्तविदस्यपि
व्यवहारस्तु सर्वोपि शिवनाम्नापरं प्रभोः दुकूलशय्यास्त्यक्तास्तेन राज्ञा महात्मना निद्रापि भस्मशय्यायां क्षपामात्रं महानि
शि शिवार्चनेन सर्वोपि नीयते समयः खलु भस्मरुद्राक्षपूतांगान् राजा पश्यति सादरं अस्माकं रत्नरम्याणां भूषणानां तु कोट
यः संस्थापिता नैते निसृक्रीडतेतनु भूषणं सद्मरुद्राक्षयुक्तानि सुवर्णाभरणान्यपि कोटिशस्संति तैरंगं नास्माभिर्भूषितं मु
धः भस्मनोद्धूलनं कृत्वा त्रिपुंड्रं निटिलादिषु शुद्धरुद्राक्षमालानां भूषणैरंगमर्चितं ११ एताः सपत्न्यः सर्वाश्च रुद्राक्षाभरणोक्षि
ताः उद्धूलनत्रिपुंड्राभ्यां सर्वदा समलंकृताः विभूत्यपगमश्चेदेः भस्मनालंकृता तनुः क्रियते घर्मकालेषु पुनः पुनरनुक्षणं भ
स्मत्रिपुंड्ररुद्राक्षमालिकासमलंकृताः नाद्य कुर्मो महेशस्य पुरतो रत्नमंटपे १५ शिवगायनमभ्यस्तमस्माभिस्तदनुज्ञया क्रिय
ते गानमस्माभिः सर्वदा शिवमंदिरे १६ बालकैरपि गौरीशपूजनं क्रियते गृहे स्तनंधयो यं ततोपि कुरुते शिवपूजनं कोटिशः शोभ

६

ग

वाः संति पंचाक्षरपरायणाः हारोपहारैस्तैस्सर्वैः शोचंति शिवमंदिरे गंधर्वराजतनयाः सर्वा एव वयं प्रियाः अस्यराज्ञो तिश्च
रस्य स्वयंवरसमावृताः राजाज्ञां सवपुर्वा यं मम राराध्यं महे ज्ञां सदा लिंगाकारमपारसाधनवैरेरभ्यर्चयत्यादरात् एतद्दर्शन
वांछयासुरगणैः सर्वैः समागम्यतेगंधर्वैरपिकिंनरैरपिमुहुर्भूर्चक्रवर्तीनृपः १२०   इति श्रीस्कांदे महापुराणे हिमवत
खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे याज्ञवल्क्यजनकसंवादो नाम द्वितीयोध्यायः २ श्रीशिवार्पणमस्तु   याज्ञवल्क्यः
इति तद्वचनं श्रुत्वा राज्ञी विस्मितमानसा स्वयंवरस्य वृत्तांतं श्रोतुमाह विचक्षणा गंधर्वराजनगरं नीहारगिरिकंधरे स्वयंवरक
थं तत्र भूपते रिदमद्भुतं केन पुण्यप्रभावेण भूपालस्य स्वयंवरं इदं सर्वविशेषेण ज्ञेयमित्याहतां प्रति तासु पद्मावती नाम श्रो

ह्री द्या

पा गंधर्वकन्यका तामुवाच प्रयत्नेन स्वयंवरमहोत्सवं अयं पूर्वभवे ह्यासीद्भिक्षुको याचकः प्रतिग्रहे यकालोपी नीतः ते
न तदामुष्कः दुरन्नभक्षणो घृक्तो दुष्प्रतिग्रहलोलुपः आसायं याञ्चया कालं नयति प्रतिवासरं याञ्चया जीवनं कृत्वा सायं
कालप्रयत्नतः चिदंबरेश्वरं दृष्ट्वा नत्वा यातिप्रयत्नतः दीपमालां महापूजां दृष्ट्वान् तामुहुर्मुहुः सम्यक्सम्यगिदं सम्यगिस्फ
दीपोतिविस्मितः धूपभस्मसमादाय स्वांगानि परिमज्य च प्रयाति भवनं पश्चाद्दुष्टकेपूजामनुस्मरन् एवं स्थितो दैवयोगाज्ज

स ७०

हौ प्राणान्सातुरः ततो नीतो यमभटैः यमेनापि निरीक्षितः चित्रगुप्तमुवाचायं कः पुण्यं किं कृतं पुरा अनेनेत्याह तं प्राह चित्र
गुप्तोतिविस्मितः ११ चित्रगुप्तः दुरन्नभक्षणेनेतः कालोनेन दुरात्मना न संध्यावंदितातेन महोवानोति दूरतः १२ स्नानं कर्तुंन

ग्राम:
७५

जानातिनकृतंभस्मधारणं रुद्राक्षधारणंतेननकृतंदुष्टचेतसा लिंगार्चनंचनगेहे शिवनामापिनश्रुतं अयंशिवकथाला
पनजानासेवसर्वथा नानाजातिगृहानांवायाचांकृत्वासयत्नतः आसायंदुष्टवार्त्ताभिःकालंनयतिदुर्मतिः १५ परांगनां
पिसंगेपिनिरतःपापकृत्तमः नस्नातेकर्मनिरतःश्रौतकर्मपराङ्मुखः अयंतुमरणात्पूर्वंमासमात्रंनिशामुखे शिवपूजांवि
लोक्यैववकारनिशिभोजनं पूजांदृष्ट्वाप्रमादापिकृतोनेनमुहुर्मुहुः धूपभस्मसमादायस्वगात्रंचपवित्रितं ततःपरंमृतः
सोयंइतिश्रुत्वावचोयमः त्वरयाप्रयातस्तस्मैरत्नसिंहासनंददौ १९ पूजयामासतंविप्रंततःप्राहातिविस्मितः भाग्यवान
सिधन्योसिमान्योसीतिमुहुर्मुहुः २० धन्यंधन्यंमनुष्याणांजीवनंरजनीमुखे दृष्ट्वापिपूजितंलिंगंभवंतिसुखंदिताः अ
नायासेनभाग्यानिप्राप्नुवंतिमुहुर्नराः दृष्ट्वापिपूजितंलिंगंसायंकालेविशेषतः शिवार्चनोपकरणंसायंकालेविशेषतः अ
र्चितंलिंगमालोक्यमुच्यतेपापकोटिभिः वृषस्यांडमुपस्पृश्यवृषशृंगांतरान्नरः शांगलिंगंसमालोक्यमुच्यतेपापकोटिभिः
धृत्वाभस्मप्रयत्नेनसायंपश्यतियःशिवं तस्यपुण्यफलंवक्तुंशेषोप्यापिनशक्यते मयाकथंवातत्पुण्यंवक्तव्यमियदिस्यपि
वेदैरपिनतच्छक्यंवक्तुमित्सेनमन्महे २५ प्रदोषकालेशिवलिंगपूजांदृष्ट्वासकृद्वाशिवमेवयाति भुक्त्वापिभोगान्विपुलानपा
रान्नरान्मरापिस्यापिममतिर्हि अहोनजानंतिशिवप्रभावंप्रदोषकालीनशिवार्चनस्य फलंनजानंतिविमूढचित्ताःसंसारपा
शातिनिबद्धगात्राः हत्वामहीमंडलमस्तदेहसंरक्षणंपुण्यनिशामुखेषु लिंगार्चनार्थंकृतकृत्यएवतेनैवतावेन्मनुजोमहान्हि

मर्त्यत्वंखलुदुर्लभंद्विजजनिस्तत्रापिसादुर्लभाश्राद्यपथंखलुतन्नदुर्लभममपिह्यत्वंचभक्तिःशिवे ॥ साचेदव्यभिचारिणी
यदितयालिंगार्चनासादरस्तर्हिप्राप्तसुमासहायचरणांभोजप्रभामंडलं ॥ २९ ॥ धन्यःकोपिशिवार्चकःकलियुगेभस्मत्रिपुंड्र
श्रीरुद्राक्षाभरणप्रियःमंत्रिवमनुव्याहारमात्रादरः लिंगाराधनपुण्यपूर्णविभवोभावोभवानीपतिःध्यानानंदसमुद्रमग्न
हृदयस्तस्मैनमःकोटिशः ॥ २० ॥ धन्यःशांभवपुंगवःकलियुगेकस्मिन्भविष्यत्यहोकाशीवासविनीतयौवनमदोविश्वेश्वराराधकः ॥
तेनापारमहेश्वरामलकथासिंधुप्रवृद्धोभवेत्तत्कीर्त्तिश्रवणेनयास्यतिशिवंयःकोपिरंकोपिवा ॥ धन्यातज्जननीपिताचसुतरांध
न्योस्यधन्यंकुलंतन्मृत्योपिसधन्यएवहिमुहुःयःकालकालार्चकः ॥ सर्वानप्यमरानयास्यविधिवत्भस्मत्रिपुंड्रांकितोभरुद्राक्षा
भरणाःशिवैकशरणाःश्रेष्ठातिमान्यःसदा ॥ भूपालोपिभविष्यतिप्रभुरयंदातातशिवाराधनेरम्यापारकुमारवर्गसहितौनारी
पतिः ॥ वैराग्यैकनिधिःशिवार्चकनिधिःनूनंप्रदोषार्चितंलिंगंदृष्टमितिप्रसूननिकरव्याप्तंमुहुःसादरं ॥ ३२ ॥ इत्युक्तंतद्वचःश्रु
त्वासर्वेयमसभाद्यः नमूचुर्विस्मिताःसंतोविनम्रानतकंधराः ॥ ३४ ॥ सभासदऊचुः ॥ यमनाभतवानर्घ्यधर्मराजइतिप्रथा त
वयास्वर्गलोकादौस्वर्धुनीवप्रवर्धते ॥ शौचस्नानादिकर्माणिस्मार्त्तानिविविधान्यपि ॥ तथुकोपिकृताधर्मोनानेनेतिश्रुतंमुहुः
ज्योतिष्टोमादयोयागाःतावद्दूरतएवहि ॥ अस्याहादानवार्त्तापियस्मादस्यंतदूरतः ॥ जातिकुत्सितवृत्तिश्चश्रुतातावदियंखलुनी
चैसेवारतोयस्यपुण्यधीरपिनध्रुवं ॥ प्रदोषेपूजितंलिंगंदृष्टवंपापनाशकं ॥ इतिनायंप्रजानातिविवेकरहितोयतः ॥ एवंसतित

गंधर्व
रामः
७२

यापूजाकथमस्यविशेषतः स्वसिंहासनमारूढकथंतिष्ठतिशैववत् शिवार्चकाःसमायांतिमार्गेणानेनशांभवं लोकंगंतु
तद्दातावर्त्तिष्ठेत्पत्रासेनक्षणं अन्येषामवकाशोत्रदुर्लभःखलुवस्तुतः कसिंहासनमुत्सृष्टंकायंधर्मविवर्जितः ५२ एतावत्का
लपर्यंतनदृष्टमिदमीदृशं अद्भुतंदृष्टमधुनायमसिंहासनाधिप ५३ यमउवाच धर्मसूक्ष्मंनजानंतिवानराइवपामराःअ
हंकाराःपरंक्रूराःतावद्दानरवत्नयः ५४ किमतद्विषयेजाताकठोरोक्तिःकुठारवत् पूज्येषुनकठोरोक्तिःमरणेप्युचितायतः किंध
र्मैरितरैःस्मार्त्तैःवैदिकैर्वाविशेषतः लौकिकैर्वाधर्मवार्त्ताभवद्भिनश्रुतायतः प्रदोषेपूजितंलिंगंयःक्षणार्धोधर्मवा विलोकय
तितसुपुण्यमनंतंविभवेखलु ५७ प्रदोषकालीनमहेशपूजाविलोकनासक्तिमतिर्नयस्यात् स्वपातकाकारइतिप्रसिद्धःसबोध
एवेतिमयापिलुद्धिः ५८ प्रदोषलिंगपूजायांदृष्टायांपापसंक्षयः अक्षयामोक्षलक्ष्मीश्चभविष्यत्स्वधर्मस्यच जन्मतस्यैवसफलं
यनलिंगंसमर्चितं सायंसद्धदयतेनाप्यालस्याद्वाप्रसंगतः आयासमात्रफलकेधर्माभासैःकुतःफलं स्मार्तैर्वावैदिकैर्वापिशिव
लिंगार्चनंविना ५९ स्मार्तवैदिकधर्माणांअनुष्ठानेपिकोटिशः लिंगार्चनेनयल्लाभ्यंतल्लाभ्यंतैर्नसर्वथा धर्मांतराणांकरणेध
ननाशायकेवलं शिवार्चनंपरोधर्मःपरमानंदसाधनं ५३ पापराशिविनाशायशिवलिंगावलोकनं कल्पितंगिरिशेनेतिनजा
नंत्येवनारकी ५४ लोकोपकारकंसृष्टंशिवलिंगावलोकनं तन्नकुर्वंतिपापिष्ठाःपतंतिनरकेषहो अनाथनाथंश्रीनाथनयाना
र्चितपादुकं नजानंतिमहादेवंनरकेषुपतंत्यहो ५६ श्रीमहादेवमहिमादुर्लभ्योदुर्जनैरतः पतंतिनरकेघोरपित्र्यभिःसहसर्व

दा पितापितामहादीनां यैर्भयः शंभुर्येभिवप्रभुः तन्नजानंतिदुर्वृत्ताःपतंतिनरकेष्वहो शिवधर्मेष्वविश्वासादन्यधर्मरता
नराः पतंतिनरकेघोरेक्रूराःशांकरनिंदकाः ५९ तदर्थंनरकाःसृष्टाःसर्वदाःदुःखहेतवः यैर्महादेवलिंगार्चाफलंनज्ञातमा
दरात ६० नजानातिमहादेवलिंगपूजाफलानियः ससूकरःखरोयद्वाशुनकःकाकएववा दुर्भगाएवतेसर्वेभर्गार्चनपराङ्मु
खाः नरेन्मुखानिभद्दग्धानिशिवद्रूपाग्निकोटिभिः ६२ सुलभंनविजानंतिमहादेवार्चनंजनाः शुद्धदूर्वांकुरेणापिलिंगपूजाविमु
क्तिदा ६३ क्षारंवानीरमुत्सृज्यभक्त्यालिंगेशिवात्मके विधूतपातकाएवप्रयांतिशिवमव्ययं शुष्कपाबिल्वपर्णेनतच्चूर्णेनापियःशि
वं पूजयिष्यतितस्यापिमुक्तिःकांतानदुर्लभा ६५ व्यासंगेनापियःशार्गलिंगमंगलदायकं सायंपश्यतिपुण्यात्मानमस्तस्मैन
मोनमः ६६ अनाराध्यमहादेवंअनायासेनपापिनः प्रयांतिदुर्गमंघोरंनरकालयमन्वहं वनेवनानिरम्याणिवनजान्यपि
तैःशिवः नाराध्यतेदुर्भगैर्यानरकावाससिद्धुताः अनिच्छयाप्युमाकांतलिंगंपश्यतियोनरः सायंसदोषनिर्मुक्तोमुक्तोभव
तिसर्वथा ६९ तृणैरपिक्षणंमूर्खाः कथंनाराधयंत्यहो महादेवंमहात्माहोमहानरकसाधनं शिवलिंगार्चकांगानिदृष्ट्वा
पिरजनीमुखे प्रयांतिब्रह्मसदनंतल्लिंलासंतमद्भुतं ७१ सुलभंतंनविज्ञातंशांगांगस्यविलोकनं तदभाग्याग्निदग्धानां
जातिदुर्लभमेवहि ७२ लिंगार्चनेनकिंपुण्यमित्यपेक्षाविचक्षणं तद्दुराशयएवस्यात्पक्षपातननोच्यते अहोमहादिदंभाग्यं
शिवलिंगार्चनेमतिः तदेवहिमहद्भाग्यमहद्भाग्यमितिस्मृतं ७४ लोकेदुराचाररताः शिवार्चांविहायतिष्ठंत्यतिविष्टयाते

लिसाभविध्वंतिनसंशयोत्रशिवापदांभोजयुगेशापामि ॥ यः कर्मणावामनसापिवाग्भिः नित्यंत्रिभिर्वात्रिपुरांतकार्चां क
रोतितस्यादरजः प्रसादं वा छत्रपंडोपिचतुर्मुखोपि ॥ किंवक्तव्यमुमासहायचरणांभोजार्चकाराधका पौरंध्रयमरंद्रहरिः प्र
तिदिनं तत्सेवकाराधकः श्रीवाणीरमणादयोपिमुनयः सिद्धाः समुग्धास्तथागंधर्वोप्यपिकिंनराअपितयाशेषादयः से
वकाः ॥ शंभुः सर्वजगत्प्रभुः विभुरितिज्ञात्वापरं शांभवास्तस्यज्ञानिरताः परात्परतरं तेजः परंशांभवं ॥ आप्योतेपरमात्सवाद
तनिजव्यापारपारंगताः पारावारविहारपूजितपदांभोजाः प्रसन्नाः सदा ॥ कस्तूरिरसराजराजसहितः कर्पूरगंधोयथा न
ज्ञातः शुनकैस्तथाशिवशिवाचारव्रतानादरैः ॥ नज्ञातंशिवलिंगपूजनफलंतत्कालेकालार्चकैर्ज्ञेयंकेवलमित्यलौकिकमि
दंज्ञेयंकथंपामरैः ॥ ७८ ॥ किमन्यद्वक्तव्यंस्मरहरकथासागररसोनविज्ञातालोकैरमितमहिमातनसहसा ॥ नबुद्धिर्मेदानांशि
वचरणासेवानुकरणेक्षणावानक्षीणायदिमरणकालेप्यघकुलं ॥ बलादेतेलोकाः खलजनरताएवनितरांनजानेत्येवालेब
तवतनकालांतकमते ॥ ७९ ॥ अतोतेसंततमाः प्रतिपदमघोरेषुनरकेष्वसंतोषैर्दोषप्रलपनविषादातिसविषाः ॥ ८० ॥ अहो मो
हः कोवाजगतिनमहादेवभजनेमतिर्भक्तिः श्रद्धाकथमपिनतत्पूजनरतिः ॥ नतत्र क्षालापेप्यभिरुचिरतायातिनरके घोरे
षुन्मत्ताः शिवरुचिरमार्गादितिशठाः ॥ ८१ ॥ ललाटेकिंचिद्वासितभसितमालिप्यशिरसामुकुन्दत्वायद्वासहृदपिसरुद्राक्षवपु
षा ॥ शिवंदृष्ट्वासायंजलमपिविनिक्षिप्यविमलंकदालिंगेशांगेशिवपदसरोजेप्रविशति ॥ ८२ ॥ इतिश्रीस्कांदेमहापु

शाखे हिमवत्खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे याज्ञवल्क्यजनकसंवादो नाम तृतीयोध्यायः ३ याज्ञवल्क्य उवाच
इतितद्वचनं श्रुत्वा कंपमानाः सभासदः अप्रवातास्तयमं विप्रं शिवध्यानपुरस्सरं १ ततः परं स्वर्गलोकं यमेनाभ्यर्चि
तो ययौ सविप्रः स्वर्गलोके पित्राचीनाथेन पूजितः विमानवरमारुह्य ब्रह्मलोकं ययौ ततः ब्रह्मलोके यथाकाममुवास
भ्यर्चितः सुरैः ततः परं सत्यवाभूद्ब्रह्मभूपसुतस्स्वयं योगमार्गे समासाद्य वामदेवो बभूवापरः ४ गर्भे पुषित्वा बहुधा स्म
त्वा शंकरमव्ययं योनिमार्गेणागमनमस्त्विति मुक्तः स्थितः पुरा ततः परं सुराः सर्वे मद्विजं गर्भसंस्थितं तुष्टुवुर्विनयान्विताः
कृतांजलिपुटाः सपि ६ अनुचितः पुराणोयं पंथास्तेनैव भूसुर प्रवृत्ता ऋषयः साध्याः सिद्धाः सर्वे सुरा वयं मार्गांतरेणा
गमनं गर्भस्यस्योचितं च न तत्वज्ञस्य तवात्रापि गर्भवासो न रोचते ८ तथापि गर्भवासार्थं त्वमिहाप्यागतोसि हि मार्गांतरेण
गमने सद्यः स्वाजननी भवेत् ९ यत्र कुत्रापवस्थाने येन केन पथा गतिः योगिनामपियुक्तेति कुत्सितं त्वमतिं मन १० मनुष्यरू
पमासाद्य योनिमार्गेण निर्गमे नदूषणं च लोकानां सर्वेषां सममिष्यतः ११ सृष्टिमप्यन्यथा कर्तुं शक्तिरस्त्येव यद्यपि त
थापि न तथा कर्तुं युक्तमेवेति मन्यतां १२ अतः परं योनिमार्गाद्येनिस्सरणं न ते शरीरं चरमं यस्मात्तव ब्राह्मणसत्तम सा
यंकाले त्वया दृष्टं शिवलिंगं समर्चितं तेन पुण्यप्रभावेण ज्ञानमेवमभूत्तव १४ तदिदं पुण्यमुत्कृष्टं तत्प्रभावात्तवेदृशी मतिर्यु
क्ता न संदेहस्त्वत्तु पर्यंतादृशो यतः १५ शंकरानुग्रहेणैव तत्सुपपन्नमभवेत्तव अन्यथा तादृशं पुण्यं देवानामपि दुर्लभं १६ शि

रामः

१७४

वलिंगार्चनं दृष्ट्वा सायंकाले विशेषतः स्वयं नृत्यति संतुष्टो दिव्यदेवगणैः सह प्रदोषसमये दृष्टं शिवलिंगं समर्चितं सर्व
कामदमपि साधुः न तत्त्वमभव खलु १८ संदिहानः शिवाचारे पापिष्ठो न प्रवर्त्तते एतादृशं महद्भाग्यमधुना दृष्टमद्भुतं तवस्व
रूपं विज्ञातं त्वयापि न शिवार्चनं कृतं पापेन नीतानि दिनानि खलु सर्वदा दुष्प्रति ग्रहलोलस्त्वं दुराचाररतः सदा न स्मार्त्तकर्मनि
रतो वैदिके ज्ञायतेऽपि न नीचान्नभक्षणे चैव वयो नीतं त्वया खलु मद्यपानगनया साकं बहुकालं स्थितं त्वया तस्यामुत्पादिताः पुत्राः
कन्यकाश्च दुरात्मना त्रिपुंड्रधारणं तावत् न कृतं श्रुतिचोदितं रुद्राक्षाणां धारणं च रुद्रापि न कृतं त्वया बिल्वपत्रं न निक्षिप्तं ज
लं वा लिंगमस्तके न दीपवर्त्तिका वात्र त्वया शंकरमंदिरे दीपप्रदानवार्त्तातु दूरतस्तव सर्वथा न सोमवासरे भुक्तं नियमात्त्रि शिसा
दरं सांभवैः सह संल्लापो न त्वया कृत एव हि पुण्याः शिवकथालापाः सर्वथा न श्रुतास्त्वया रुद्राध्यायो न जप्तो हि मंत्ररत्नसमाश्र
यः एतादृशेन दुष्टेन प्रदोषे दैवयोगतः शिवलिंगं त्वया दृष्टं कृतकृत्योऽसि तावता शिवलिंगं न दृष्टं चेत्सायंकाले त्वया तदा आक
ल्पं घोरनरकान्न च्यवस्ते कथं भवेत् शिवाचारविहीनानां नरकान्निर्गमः कथं पित्रादिभिः सह ग्रासो नरके षष्ठकोटिशः जन्मा
न्तरे वा सततं शिवमर्चय सादरं जातिस्मरत्वं संप्राप्य तेन पुण्येन सत्वरं तत्वज्ञानस्य धर्मो यो धारणाध्यानमपि यत्फलं तत्फलं के
वलं मन्ये श्रीमहादेवपूजनं शिवार्चनेन सर्वेषां कामानां सिद्धिरिष्यतः प्रयत्नैर्बहुभिर्नित्यं कुरु शंकरपूजनं ३३ भूपालत्वं स
मासाद्य नोन्मत्तो भव सर्वदा विभवैर्बहुभिर्नित्यं भवलिंगं समर्चय ३४ यदि तत्रतवोन्माद स्तदा कुत्सितयोनिषु तव जन्मान्य

नेतानि भविष्यंति न संशयः पापिष्ठानां शिवाचारे न बुद्धिर्जायते ततः प्रयांति नरकं घोरं यावदाचंद्रतारकं अतो गर्वं विहा
याद्य यो निमार्गेण केवलं भुवं व्रजेद्यथाकामं यजमृत्युंजयं मुहुः इति तद्वचनं श्रुत्वा तथास्त्विति पुनः पुनः नत्वा तान्प्रेषया
मास स्वत्पुत्रं तं सुकृतं स्मरन् समासनवकं स्थित्वा गर्भे गिरिज्ञामर्चयन् मनसा केवलं पश्चाद्योनिमार्गाद्विनिर्गतः सुमुहूर्तेऽस
मुत्पन्नः पित्राऽऽनंदवर्धकः बभाषे शिवं प्रसादात् श्रीमहादेवेऽस्त्वपि ७० तदा तद्वचनं श्रुत्वा तन्माता कंपसंयुता तदा तु निक
टे सर्वकं पमापुः स्त्रियो मुहुः किमद्भुतमिदं जातं बालचेष्टा तु नेदृशी इदं खलु महद्भूतमुत्पन्नं भयसाधनं ७२ राज्ञे निवेद
यमस्यैतन्महाभूतविचेष्टितं इति विस्मयमापन्नास्तद्दास्यो नृपसंनिधिं गत्वा तत्पुत्रवृत्तांतं कीर्तयामासुरादरात् राजन्कु
मारः संभूतो महान्नापरविग्रहः तद्देहतेजसा व्याप्तं सूतिकामंदिरं नृप तद्देहप्रभयादीपास्सर्वेषां ता ह्रस्वाः स्थिताः अन्यदत्यद्भुतं
किंचित् उत्पन्नेन सुतेन ते उक्तं शिवमहादेव महेशेत्यक्रमादरात् इदमद्भुतमाकर्ण्य बालको नायमित्यपि तन्मातुरभवद्बुद्धि
रस्माकमपि सा मतिः इत्थं दासीरितमाकर्ण्य स राजा विस्मयं गतः उत्साहोऽपि प्रवृद्धोऽभूद्भूपालस्य तदा महान् तदानीमागत
स्तत्र नारदो मुनिपुंगवः तमागतं विलोक्याशु पूजयामास भूपतिः निवेद्य पुत्रवृत्तांतं नारदाय स भूपतिः संस्तुतो नारदेना
सौ मुहुः प्रीतिपुरस्सरं राजंस्तव कुमारस्य योगाद्दृष्टा ता जनिर्मया पूर्वजन्मार्जितं पुण्यं तस्य तद्धि फलं खलु सायंकाले ते
न दृष्टमनोज्ञं बिल्वैः पुष्पैः पूजितं शांभवं लिंगं धूपैर्दीपैः सदानैः रत्नैस्ते तत्पश्चात्पुण्येन भूप पुण्यान्यनंतान्यपि संतिके ते:

प्रदोषकाले शिवदर्शनेन ॥ भवत्सदृशं न पतत्त्ववत्तासो भाग्यसौंदर्यनिधिश्च मर्त्यः किं कौतुकं सृष्टमिदं शिवेन दृष्टं प्रदोषे शिवलिंग
मात्रं ॥ स ते सुखानि स्वयमेकमेव नान्यत्परं किंचिदपेक्षितं च ॥ ५४ ॥ प्रदोषकाले शिवसमर्चनात्ततः प्रदोषकालीनशिवार्चनेन ॥ प्रयाति शै
वं पदमद्भुतं ततन्न जायते भूपसुरादिभिश्च ॥ ५५ ॥ यः कोऽपि सायं शिवदर्शनेन भुक्त्वापि भोगान्विपुलानपारान् ॥ शिवं प्रयात्येव विना
प्रयत्नैः सयोगिनामप्यतिदुर्लभो हि ॥ स योगवार्त्तां न करोति शंभुः न योगवार्त्तामपि दानवार्त्तां ॥ परं तु सायं शिवपूजकानां करोति वा
र्त्तां गिरिजासमेतः ॥ प्रदोषकाले समुपागतो यः पुष्पं गृहीत्वा कमलं गृहीत्वा ॥ स बिल्वमादाय जलं गृहीत्वा सपत्निमादाय तिलाक्ष
तादीन् ॥ स धूपमादाय समागतो यः दीपं समादाय फलं गृहीत्वा ॥ तांबूलमादाय स सायमादौ लिंगार्चनासक्तमतिर्भवानि ॥ निरीक्ष्य
तेतेन मया प्रदोषे बिल्वार्चितं लिंगमनुत्तमं मे ॥ प्रदक्षिणेन प्रणतं च तेन ध्यातं च तेन क्षपामास्तिकेन ॥ विभूतिपतेन विलोकितं च पुनः
पुनर्लिंगमनुस्मृतं च ॥ रुद्राक्षमालाद्यविभूषणेन पुनः पुनस्तत्प्रणतं च लिंगं ॥ ६१ ॥ तांबूलमादाय निवेदितं च द्राक्षाफलं तेन निवेदि
तं च ॥ तेनार्पितं तत्कदलीफलं च प्रदोषकाले शिवलिंगमूर्ध्नि ॥ तेनाम्रपक्वानि फलानि तानि दत्तानि लिंगोपरि तेन दत्तं ॥ दुकूलमत्य
न्तमायतं च तेद्ध्वतानतद्विपुलं मनोहरं ॥ क्षीरप्रवाहैरभिषिक्तमद्य प्रदोषकाले सुदधिप्रवाहैः ॥ घृतप्रवाहैश्च मधुप्रवाहैः सुशर्करा
राशिभिरर्चितं च ॥ मंदारमालासमलंकृतं च लिंगं मदीयं घनचंदनेन ॥ कस्तूरिकाकर्दमसंयुतेन प्रदोषकाले खलु शांभवेन ॥ सुश
र्करासद्घृतकुंभयुक्तं क्षीरान्नमेतेन निवेदितं मे ॥ अपूपराशिश्च समर्पितो मे मया प्रदोषे खलु शांभवेन ॥ अनेन रत्नाभरणानि दत्ता

न्येनेनदत्ता खलु बिल्वमाला प्रदोषकाले सुकुरादरेण स्पृष्टं च लिंगं मम शांभवेन अयं च हस्तो भगवान्ययं मे पुण्यस्वभावो भगव
तरामे अयं हि हस्तः खलु विश्वभेषजो यस्मादयं मे धृशिवाभिमर्शनः ६८ अनेन मुक्तं न हि वाभवानि जलं न पीतं फलमक्षणं च
दृष्टं तेन तांबूलमपि प्रदोषे त्यक्तं शिवाराधनमादरेण एते मदीयाः शितभस्मपूताः प्रदोषकाले शिवपूजनाय कृतप्रयत्नाः शिव
नामपूताः प्रकृष्टरुद्राक्षविभूषितांगाः प्रदोषकालीन शिवार्चनेन भुक्त्वैव भोगान्विपुलान्परान् स्थास्यंति सर्वेपि ममैव पार्श्वे
मत्पूजनशा मममहोत्सवास्ते येते विमानानि मनोहराणि प्राप्तांतकाराधितपादपद्माः विधींद्रनारायणपूजिताश्च स्थास्यंति
मत्सादनरवप्रभाभिः धन्याः प्रदोषेषु शिवार्चकास्ते सर्वे ममैवापरविग्रहास्ते तेषां परं पादरजो यमोपि धत्ते शिरस्येव तथैव न वि
ष्णुः प्रदोषकालीनशिवार्चनेन मतिः शिवस्यान्मदनुग्रहेण अघोरसंसारविकारसागरः पुनर्न दुःखानि तयाभवंति ७५ ताव
न्महापापभयं भवानि यावन्न पूजां रजनीमुखेषु करोति लिंगे सितभस्मवीत त्रिपुंड्ररुद्राक्षविभूषणास्सन् पूजां कोपि महाप्रदोष
समये कृत्वा विभूतिप्रभारुद्राक्षाभरणप्रभापरिष्कृतो लिंगे जलैर्वा फलैः बिल्वैर्वा नवकंटकारि कुसुमैर्दूर्वांकुरैर्वा शिवे भूपाल त्वमवा
प्यसमस्तदुरजःपुंजेन संक्रीडति को वा तेन समः प्रदोषसमये येनाहमभ्यर्चितो बिल्वीपत्रकृतमालया जललवैर्भ्रौतैर्नवाभसना
उत्फुल्लैः करवीरचंपकमहामल्लीप्रसूनैः शिवित्वत्पादांबुजरेणुभिः मुकुरहोभाराध्यया पूजितः आजन्मारिवलंकं करोपणकरैः किं
वदपारायणैः किं धान्यैर्धनधान्यनाशनकरैः कन्याप्रदानैरपि किं गोतुंगतुरंगदंतिनिकरारथ्यप्रदानैः शिवे सायंकाल शिवार्चनार्जि

रामः

७६

धंगे ...

[illegible]

तत्फलाभावेनमुक्तिर्यतः ७९ क्षीणास्यात्तनुरेवघोरतपसा दानैर्धनंनश्यति अर्थश्चायुरपिप्रयातिगिरिजेलिंगार्चनंतन्नवेत् तेनै
वाखिलभाग्यभोगविभवंभूमंडलेजायतेपश्चान्मुक्तिरपीतितेनसदृशोधर्मोनजातोध्रुवं ८० स्वर्गःकेवलमंगजातसहितोध्यानासन
व्यंगतोप्यंगेलिंगसमर्चनंजललवैर्बिल्वीदलैर्वाकृतं तेनापारसुरान्वितोतिविभवःस्वर्गापवर्गप्रदः लिंगाराधनमेवतेनसदृशोधर्मोनलो
केत्रये चित्तंयस्यनलिंगपूजनरतंतज्जन्मतावद्गतं व्यर्थंतज्ज्ञाननोवयस्तरुवरच्छेदकुगरस्सतु तद्भ्रातोप्यघसाधनायगिरिजेलिंगा
र्चकाराधकोयस्तस्यानुचरोपिसोपिहिमहान्कालान्ययतस्यन तज्जन्मातिमनोहरंसुखकरंमन्येतिमान्येशिवेयःसायंशिवपूजनो
द्यतमतिर्मध्यान्हकालेप्यगे तद्दृष्ट्वाणियमाद्योपिबहुधाकंपायमानास्सदा धन्यातज्जननीपितापिसुतरांधन्यःसमान्यःसुरैः ८२

इतिश्रीस्कांदेमहापुराणेहिमवत्खंडेशिवरहस्येतृतीयांशेउत्तरखंडेयाज्ञवल्क्यजनकसंवादोनामचतुर्थोध्यायः ४

याज्ञवल्क्यउवाच इत्युक्तंतद्वचःश्रुत्वानारदेनसहाविशत् मंदिरेलिंगसंवीतरत्नमंडलमंडिते तत्रानीतःसबालोपिब्रह्मभूपाल
यातदा सबालकोपितद्दृष्ट्वासंतुष्टोलिंगमंदिरं २ रत्नवेदीशासंकीर्णरत्नभृंगीविराजितं रत्नवेदिध्वजाकीर्णमपितोरणसंयुतं
ततःप्रफुल्लनयनंदृष्ट्वाराजानमास्तिकं नारदंचप्रविष्टोसौगर्भागारंशिवस्यसः ततःप्रणम्यतल्लिंगमालिंग्यसमभ्युक्षुः भूतिरु
द्राक्षपूतांगपूजयामासशंकरं ५ पंचामृतस्नपनाद्यैश्चंदनाद्यैर्मनोहरैः पूजयामासगिरिशंबिल्वपुष्पादिराशिभिः नैवेद्यराशि
भिर्दिव्यैः धूपदीपादिभिर्मुदा ततोनाड्यंचकारायंबालकोनाट्यमंटपे ७ प्रणम्यबहुधाशंभुंशिवध्यानपुरःसरं ततःसनारदंदृष्ट्वा
राजानंचशिवार्चकः ८ भूतिरुद्राक्षपूतांगंभूतिरुद्राक्षभूषणः प्रणम्यनारदंप्राहधर्मंधर्मविदेतिसः ९ नारदउवाच साधु

साधुमहाप्राज्ञचिरंजीवशिवंयज ॥ भजमृत्युंजयंभक्त्याजन्ममृत्युःशिवार्चनैः ॥ धन्योसिकृतकृत्योसिकृतकृत्यतमःप्रिया आवृतो
सिमहादेवभक्तिरुद्राक्षजातया ॥ जातमात्रस्ययाबुद्धिर्महादेवार्चनेतव ॥ सातावन्नाद्भुतासायं दृष्टंलिंगंत्वयायतः १२ तल्लिंगद
र्शनोत्पन्नपुण्यैर्नवशिवार्चनैः ॥ अधुनाभक्तिरुत्पन्नासद्यःस्वर्गापवर्गदा १३ जन्मप्रभृतिनस्नाज्यंशिवलिंगार्चनंत्वया ॥ नस्नाज्यंस
हसाबालभस्मरुद्राक्षभूषणं ॥ शिवार्चनेनकालोयंनेयःकल्याणदायकः ॥ व्यर्थकालापनयनंनकार्यंज्ञानिनात्वया ॥ आयुःशिवार्चनेनै
वयद्दिक्षीणंभविष्यति ॥ तदहानंचसफलंतदायुरपिसार्थकं ॥ ज्ञानेनाज्ञानमात्रस्यविनाशोसतिसर्वथा ॥ शिवार्चनार्थयत्नस्तुकर्त
व्यस्तेनमुच्यते ॥ यावत्कर्मोभवेज्जीवातावद्भ्रमतिसर्वथा ॥ संसारघोरनरकेपापनक्रग्रहाकुले ॥ ज्ञानमात्रंचमनुल्यंतुकुजंतुसमाश्रि
ते ॥ तादृशंज्ञानमन्वेषंज्ञानमुक्त्यर्थंप्रजायते ॥ पतंगानांनकिंज्ञानंतत्किंमोक्षस्यसाधनं ॥ मोक्षसाधनभूतंतुज्ञानमन्यद्विलक्षणं २० येन
ज्ञानेनमुक्तिःस्यात्तज्ज्ञानाभ्यसनाशरं ॥ मुक्तोभवतितज्ज्ञानंकेवलंशिवपूजया ॥ ईश्वरोत्तमोत्तमत्वेनज्ञातसतिमहेश्वरे ॥ तज्ज्ञानादेवमुक्तिः
स्यात्तज्ज्ञानंचशिवार्चनात् ॥ धर्मधर्मतयाज्ञातंश्रीमहादेवपूजनं ॥ तेनमुक्तिर्भवत्येवस्वर्गभोगश्चसर्वथा ॥ भक्तपारांकुरमभ्यश्चेयः
स्वर्गंनाभिवांछति ॥ तस्यापिभवतिस्वर्गोप्यपवर्गोप्यसंशयं ॥ स्वर्गार्थमपिचेद्भक्त्याशंकराराधकस्तदा ॥ अपवर्गोभवत्येवस्वर्गोप्यत्रन
संशयः स्वर्गापवर्गदंयस्माल्लिंगेशंकरपूजनं ॥ तत्तत्फलमदत्वातुनतिष्ठत्येवसर्वथा ॥ शिवलिंगार्चनाकारायःकल्पतरुत्तमः ससर्व
फलदातिस्मभवत्येवनसंशयः ॥ रूपलावण्यसंपन्नातरुणीगणकोटयः ॥ आसन्नास्तत्स्यारास्यः यःशिवाराधनःप्रियः दिव्यंतुंगतुरंगा
णांकोटयःसमुपस्थिताः ॥ भवत्येवनसंदेहः शिवलिंगार्चकांगणे ॥ उपस्थिताःसर्वदापिमत्तमातंगकोटयः यःशिवाराधनोद्युक्तः तद्गृह

मंटपे सुरासद्ध्यामायांति यः शिवाराधनोत्सुकः॥ तिष्ठंति देवास्सततं शिवाराधकमंदिरे। शिवज्ञानं समासाद्य यः शिवार्चनतत्परः॥
तद्दर्शनेन मुक्तिः स्यात्स यस्माच्छंकरप्रियः॥ शांभवैः सहसंलापोप्यघकोटिविनाशकः॥ शांभवानां दर्शनं च शंकरस्यैव दर्शनं। शंकरो दु
र्लभो लोके शिवपूजातिदुर्लभा॥ दुरात्मनां तथा बुद्धिः कुतस्याच्छिवपूजने॥ किं चान्यदुक्तं तत्काले शंकरेणापि गोपनं॥ कृतं हि शिववि
द्यायास्ततः साचातिदुर्लभा॥ शिवविद्या महाविद्या विद्यानां परमा मता॥ तस्याः संगोपनं तेन कृतमित्यत्र नाद्भुतं॥ सा तु विद्या प्रयत्नेन
पार्वत्यास्त्वं दसंनिधौ॥ प्राप्ता शिवप्रसादेन स्कंदेनापि महेश्वरात्॥ आराधितः शंकरोपि स्कंदेन शिवयापि च॥ ताभ्यां मुक्ता महाविद्या भुक्ति
मुक्तिप्रदायिनी॥ अनंतयत्नलब्ध्या सा महाविद्या महात्मना॥ महादेवन दत्तेति महागोप्या मुहुर्मुहुः॥ सा यातु मर्त्ये विद्यास्ति शिवविद्या
शिवात्मिका॥ सा दुर्लभा नकस्यापि सा सुरस्यापि सर्वथा॥ तद्विद्यासाधनीभूतं शंकराराधनं परं॥ अशंकराराधकस्य दुर्लभं खलु हे
नृपते यद्दुर्लभमपि तिज्ञातं तदेव सुलभं भवेत्॥ शिवार्चनेन तत्तस्मात्सर्वसिद्धिप्रदायकं॥ शिवार्चनेन लोकेषु कोपि मुक्तो न जायते त
त्रतावन्न विश्वासो भविष्यति दुरात्मनां॥ महेशार्चनमाहात्म्यं न विजानंति मानवाः॥ अतएव पतंत्येते नरकेषु न संशयः॥ शिवार्चनपरि
त्यागः सर्वथा पापसाधनं॥ तेन पापेन यात्येव नरकं दुष्करं परं॥ अय स्वेलेनप्रयांत्येते नरकं प्रतिमानवाः॥ अहो नन्नेरमध्यत्यंनं व यच्छति
पल्लवं॥ पुष्पं वा देवदेवाय लिंगरूपाय सर्वदा॥ सुलभान्येव पत्राणि जलानि विमलान्यपि॥ सर्वभावेन यो भावो भवपूजनतत्परः॥ भ
वेभवेपि सम्भवत्तस्य भयो न भविष्यति॥ ५० ॥ कः शंकरहानरसं विहाय्यापि रसांतरं॥ सतावद्दत्तो विते यसंहत्या वहत्यापि च॥ अवज्ञायाः परं
स्थानं शंकरानंदकोजनः॥ तुष्यत्येवं महादेवः केवलं तद्वत्सया॥ ५१॥ अवज्ञापात्रभूतस्याप्यवतो यस्तमोहतः॥ नकरिष्यति तं मावत्सा।

तयस्यैवपातकं कृत्वापापान्यनंतानिसकृद्दृष्ट्वायः शिवंस्मरेत् । सधूतपापइत्येवविज्ञेयोमुनिसत्तमैः । मुनीनामपिवंद्यः स्यात्महादेवप
रायणः । वंद्योनारायणादीनांसुराणामपिसर्वथा । शिवार्चनपरोलोकेवंद्यः पूज्यश्चसर्वथा । तत्पूजयापरंसर्वेमुक्ताइत्यवधारणात् ।
महादेवोपितंदृष्ट्वातुष्टोभवतिमानवं । योभक्त्यालिंगपूजायांनिरतः सर्वसाधनैः । सकृद्दृष्ट्वाप्रणमेद्यस्तुशंकरंभक्तिपूर्वकं । तस्यपापा
निनश्यंतिसएवपुरुषर्षभः । धन्यंकृतार्थंतंमन्ये कृतकृत्योत्तमोत्तमं । यः स्वयंवामहादेवेलिंगेपूजयतिप्रभुः । भस्मोद्धूलितसर्वांगोरुद्रा
क्षाभरणांचितः । योनार्चयतिगौरीशंसपातकगणाश्रयः । शिवार्चनाग्निसंदग्धाः पापपर्वतकोटयः । तस्याशक्येनलोकेस्मिन्सर्वथा
नृपबालके । भाग्याबुधिप्रलब्धस्याछ्रीमहादेवपूजया । दुर्लभंदुर्लभंयस्मात्श्रीमहादेवपूजनं । अतः कालेमहादेवेभस्मरुद्राक्षभू
षः । अभ्यर्च्यलिंगरूपंतंमुच्यतेनात्रसंशयः । कालेनोपिकर्तव्यंशिवलिंगार्चनंबुधैः । मध्यमध्येपिकर्तव्यंविरतिस्तस्यनोचिता । य
स्यस्याद्विरतिर्देवाछ्रीमहादेवपूजने । सनसंसारपापेभ्योमुच्यतेनात्रसंशयः । पापार्णवसमाकीर्णोनलिंगार्चनतत्परः । लिंगार्चनंप
रित्यागात्पुनः पापीभविष्यति । शिवलिंगार्चनंमन्येमहापातकनाशकं । तन्नजानंतिसहसामूर्खावानरवृत्तयः । एषांनराणांपुण्यानि
बहूनिविविधान्यपि । तेषामेवभवेछ्रद्धाशिवलिंगसमर्चने । शिवार्चनेनयस्यास्तिविश्वासोमुक्तिदायकः । सर्वदेवाद्यस्यैवतातच्यो
मुनिभिर्नृप । शिवार्चनंविनाभूपनैवेद्यंजलमाहरेत् । नभोक्तव्यंचसहसानतांबूलस्यचर्वणं । यद्देवस्योपभोगार्थंपवित्रंवस्तुतत्सुदा
निवेद्यशंभवेस्थाप्यस्वभोगायप्रकल्पयेत् । यन्नभोगोपकरणंनशिवायसमर्पितं । सचोरकीर्तितोविज्ञेयः सपापोखरोयतः । शिवविज्ञानहो
नायेतसर्वेपामरानराः । वानरास्त्वतेतावत्सर्वेपिनरकाकराः । २३ । अत्रैवसृष्टिः कृष्णायतपोनरकपातनं । म । केरास्यवसदाकालः क।

रामः
१८

लभेदेनकेवलं कालकालार्चनंसत्कायःसंचरतिकेवलं तंकालदूताः पश्यंतिमुहुरेवमहोद्भुताः पातनीयामयायत्नादयंनरक
सागरे सर्वथेतिवदंतस्थेयथावंतिमुहुर्मुहुः शंकरानर्चकस्यास्यकदावामरणंभवेत् कदानेयइतिप्रायःप्रचरंतिप्रतिक्षणं
आसुरस्यारिलंक्षीणंशिवानर्चनतस्ततः अयंनेयोमयाघोरेकुंभीपाकेनिपात्यते अयंदुरात्मादुर्वृत्तःशिवानर्चनतत्परः ए
तंतथैमयासृष्टाःतप्ताप्यायसशंखलाः संतप्तप्यायसस्तंभघोरोरस्ततमुद्गरैः बुध्वास्तताडयिष्यामोमुहुरघनसंशयः पूर्वं
यमपुरीसर्वाशून्याजातानतःपरं अशैवैरेवसंपूर्णासातद्वासायकल्पिता अशैवसइनेत्नेनकुंभीपाकेवदह्यतः तत्रात्रैवाःप्र
यत्नेननेयाएवनसंशयः ८२ अशैवाश्चवास्तपापिष्ठाः सर्वेविष्ठालयेष्वपि तत्सुपातनीयास्तेनस्याज्याःसर्वाधामपा संतप्त
मूत्रकुंडेषुशिवार्चनविवर्जिताः पतिष्यंतिनसंदेहःतेषांस्थानानितान्यपि यानियान्यतिदुष्टानिस्थानानियममंदिरे तानिस्था
नानिसृष्टानिशैवान्यस्यदुरात्मनः पूयकुंडानितप्तानिरेतसासंस्कृतान्यपि अशैवार्थंनिर्मितानियमेनैवमहात्मना सर्वेषापा
नुरूपेणदंडनीयाःप्रयत्नतः अशैवानांतुनतथातघोरनरकाश्रयाः किंचावासरक्तयायषांसेतषामितिनिश्चयात् अशैवा
नांतुनतथातेघोरनरकाश्रयाः किंचावाससरक्तयायेषांसतेषामितिनिश्चयात् अशैवानांनिनासायकुंभनरकमंदिरे संतप्त
भिंडिवालानांकुंडेषुविनिपातिताः अशैवास्तुमयापूर्वंतततिछंत्यधुनापिहि ततावन्मम्यास्याज्याःकल्पांतेपिनसंशयः अहंत
दुःखदानायविधिनासृष्टइस्ततः इत्थंयममराःसर्वेप्रवदंतिहसंतिच अशैवालोकनेनैवबारबपुरस्सरं ८१ अतःकुसुमय

त्वेनलिंगेशंकरपूजनं लिंगार्चनेन्कृते भीतिर्नमृत्योरपिजायते मृत्युर्बिभेति भीतास्ते कालस्यापि भटाः सदा मृत्युंज
यार्चकं दृष्ट्वा जलैरपि फलैरपि कल्याणान्यनुधावंति कल्याणपतिपूजया सर्वकल्याणनाथोयं मंगलापतिरीश्वरः
ससर्वमंगलाकांतः सर्वमंगलसंश्रयः सर्वमंगलदाता च शिवभक्त्यार्थकेवलं आलस्येनापि यः कुर्यान्महादेवस्य पूजनं सं
तरत्येव संसारान्महापद्घोरसागरात् सुलभं च महेशस्य पूजनं शांभवस्य तु अशांभवानां कठिनं तत्रानधिकृता पिसः शेषत्व
मंग शिवपूजेन पुमुरव्यं नेतनापि विना शिवार्चा अन्यच्च तत्साधनमस्त तत्तनुमुरव्यं तदेवत्यवधारितं हि तेनाधिकारसत्ति सर्वदा
पि शिवार्चनं तेन कृतमयत्नात् सर्वार्थसिध्यै भवतीति मन्ये स एव धन्यो भुवनत्रयेपि शैवेन दत्तं फलमंबुपत्रं भुक्तं नवं वा पठितं
श्रुतं वा गृह्णाति शंभुः शिरसा ददाति तस्मै फलान्यर्थमितानि नित्यं २० यो विश्वस्यापि महेश्वरं त्रिनयनं लिंगे समभ्यर्चयेन्द्र
यां भक्ति विघ्नं छिनोति मुदितो रुद्राक्षमण्याश्रयः तस्माद्दांबुजरेणुभिः जगदिदं पूतं सुराः पावनाः सर्वे विष्णु चतुर्मुखप्रभृतयः त
स्मात्स धन्यः सदा २१ इति श्री स्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये त्रितीयांशे उत्तरखंडे याज्ञवल्क्यजनकसंवा
दे नाम पंचमोध्यायः ५ श्रीशांभवाय गुरवे नमः श्रीयाज्ञवल्क्य उवाच इति तद्वचनं श्रुत्वा प्रहृष्टः सोपि बालकः
महाविद्यां प्रयच्छेति प्रणतो नृपनंदनः १ महाविद्याप्रदानेन कृतार्थं कुरु मां गुरो शिवविज्ञानसंपन्नो गुरुर्दुर्लभ एव हि सर्ववे
दांततत्त्वज्ञस्त्वं महामुनिसत्तम २ शिवविद्याप्रयच्छाद्य कृतार्थं कुरु मां गुरो ३ उपास्यां महाविद्यां प्रदिश गुरुणा तदा मोक्षायमु

राम:
७५

क्वासातावत्स्वती सैवमेमतिः मद्दृष्टव शैलैव नवान्नाद्यसमागमः मयास्यनुग्रहः शंभोरित्येवलमितेरवलु यद्यद्यशांभवी
विद्यां मत्यंदास्यसिसादरं तदास्याज्जलपानंमद्गृहेभोजनमस्तु यमसिंहासनेवात्तसंस्थितेनमयाश्रुता तावात्तामिमुना
वक्ष्येश्रृणुनारदसादरं मयितत्रस्थितेकोपिसमानीतोभटैस्तदा तद्दृष्ट्वाप्राहकालोपिचित्रगुप्तंमहामतिं किमेनेनमहावि
द्याप्राधान्येसतिसत्वरं ततस्तेनापिनप्राप्तासाविद्येत्यत्रमादृशात् ततःपरंयमःक्रूरः तद्दृष्ट्वाभीमशासनः कोपाग्निनायदंद
ग्ध्वानशांतःकोपसंकुलः ततस्तंप्रेषयामासकुंभीपाकाख्यसादरं पच्यतांताडयतांतीव्रैरग्निशस्त्रैर्मुहुर्मुहुः नप्राप्ताशांभवीवि
द्यातेनतावद्दुरात्मना अतस्तेनैवतद्दुःखमशेषःप्रापदुर्मतिः शिवविद्याविनिर्मुक्तोनमुक्तोभवतिध्रुवं तयैवविद्ययापूर्वंपापा
त्प्राप्नुमास्तिकैः शिवविद्यामनुप्राप्यशिवार्चनपरोयदि तदासंसारमोक्षस्यादितिश्रुतमलंकथा शैवविद्यासमानातुनवि
द्यासर्वथेस्यपि वदंतिवेदवेदांतपारगाःशिवपूजकाः १५ मदीयेनैवभाग्येनत्वयातावदिहागतं अतःपरंशैवविद्याप्रदानेकु
रुसादरं इतितद्वचनंश्रुत्वाराजासंतुष्टमानसः कोयंमारदत्वत्तः किंचतत्रास्मसूतकं नारदउवाच शिवार्चनप्रभावेनत
वैवोसंनृपोत्तम नचास्यसूतकंनापिशौचमार्गंतुकंनृप स्वतएवविशुद्धात्माशिवपूजापरायणः अतोस्याशौचकर्माणिशांकि
तान्यपिनध्रुवं यस्मोदेहाभिमानोस्तिगौरोहमितिधीरपि तस्याशौचनतत्वन्नसूतकंसवधारय एतस्यपुण्यपुंजस्यदर्शनाद
पिसर्वथा आशु विश्वशुचिर्नतंमस्याशौचेनसर्वथा शिवभक्तिविहीनास्युरशौचा एवसर्वदा मरणांतंतदाशौचंमरणान

तदंचतत् अशुचिर्वाशुचिर्वापि यः स्मरेद्गिरिजापतिं स शुचिस्तेन युक्तोपि शुचिर्भवति सर्वथा अशुचित्वं तावदेव यावन्नैव स्मृतः
शिवः स्मृते शिवे शुचिः सद्यो ह्यन्यापेक्षा ततस्तु नः यः शैवस्मरणो युक्तः सोपि पावनपावनः शुचिः स्मृतः शिवो मर्त्यः तत्राप्यास्ति
किमद्भुतं शिवप्रभाव महात्म्यनिस्पृतकीर्तिगणाः सर्वकर्मपरिभ्रष्टाः तेयांति नरकं ध्रुवं इति तद्वचनं श्रुत्वा राजा संतुष्टमानसः शिव
दीक्षासमारंभमहोत्सवात्समन्वितः अलंकृत्य महेशास्य मंडपं रत्नमंडितं पुष्पमाल्यादिभिर्वस्त्रैः विविधैस्तोरणैरपि महादेवमहा
पूजां कृत्वा स्नानादिपूर्वकं जातकर्मादिकं सर्वं समाप्य स तु भूपतिः नाभिमालस्य बालस्य दत्त्वा बालस्य भूपतिः स्नापयामास तं बालं
शिवतीर्थैर्मनोहरैः भस्मारुद्राक्षमालाभिः अलंकृत्य प्रयत्नतः कलशस्थापनं कृत्वा हुत्वा वन्हौ घृतादिभिः शिवमंत्रैर्धर्मरूपैः
पंचाक्षरपुरस्सरैः गृहीत्वा बालकं राजा गत्वा शंकरमंदिरं स्वयं संपूज्य विधिवत् महादेवं स्वसाधनैः पूजयित्वा सुनैवेद्यैर्भक्ष्यैरपि
फलादिभिः कारयित्वा बालकेन पूजां द्रव्यैर्मनोहरैः लिंगमर्चितं महेशस्य नृपः संतोषमापसः ततः परं नारदोपि भस्मस्नानादिना
शुचिः ददौ दीक्षां बालकाय नर्मीतादिभिर्मुदा ३५ ततः परं महाविद्यां शैवीं पंचाक्षरात्मिकां ददौ स्म स्वामहादेवं पार्वतीगणना
यकं रुद्रं च वीरभद्रं च स्मृत्वा श्रीकालभैरवं नंदिकेशादिकान् सर्वान् महाशिवगणानपि शैवीं विद्यां स संधार्य स्वांज सुतबा
लकः ततस्तद्देहतः कापि पापमूर्तिर्विनिर्गता मशीवर्णा विकृतदंता वक्रपृष्ठभुजांतरा वक्रदंता काणनेत्रा दीर्घदग्धशिरोरुहा
तां दृष्ट्वा स तु भूपालो भीतो नारदमाह सः कयमित्यपतिभीस्येवमंद्ग इदवाक्तदा नारद उवाच पापमूर्तिरियं भूप बालदेहाद्विनि

राम:
१८०

गता शिवविद्याग्निसंदग्धानारकेदेहमाश्रितः ततःपरंपापमूर्तिस्तमुवाचमहामुनिं कथंत्वंमयास्वामिन्स्थितातेदेह
माश्रिता शिवविद्यानदीतीर्थेतयातत्त्वनुरावृता अतःपरमवस्थानंमत्रमेदुर्लभंखलु इतितद्वचनंश्रुत्वाराजाविस्मयमा
गतः बालोपिराजकीयाश्चमंत्रिणोपिद्विजाअपि तामाहनारदोधीरःप्रहृष्टस्त्वप्रतिस्पर्धा यमालयमितोयाहियाहिसत्वर
मित्यपि एतद्दृष्ट्वात्वयातावत्स्थेयंदुर्मुखेव्रज इतितद्वचनंश्रुत्वापापमूर्तिरुवाचतं ५६ पापमूर्तिरुवाच तवज्ञोसिमु
निश्रेष्ठशरणागतवत्सल अपावनानामनिशंधावनत्वंप्रदीक्षयात् ५७ दृष्टेपिरांभवेदेवात्साप्रशंकाकथंभवेत् पवित्राणां
पवित्रत्वमनपेक्षितमेवहि अपवित्रेपवित्रत्वंकर्तुंशक्तिस्त्वयाधुना अतःपावयमांदीनांसद्यःसुरमुनेमुदा स्थितमेनं समाश्रि
त्यबहुकालंमयामुने अपारकल्पगणनाकर्तुमेवनशक्यते अनेनसहवासोपिनरकेषुकृतोमया अनंतब्रह्मकल्पेषु तेषां
तुगणनापिन प्रतिजन्मनिपापानिकृतेनायंमुहुर्मुहुः नरकेषुपतत्येवलज्ञानास्यात्मसन्मुने नशिवार्चनवार्त्तापिश्रुतानेनम
यत्नतः शिवार्चकैर्नसंगोपिकृतोमंगलदायकः ५८ दूरतोपिनदृष्टास्तेशांभवायेसराःपरं अनेनमंदिरंदृष्टंनकदापिशिवस्य
तु नप्रासादप्रकारोवाप्राकारोवाशिवस्यतु रथोत्सवोपिनरथोदृष्टोनेनदुरात्मना अदृष्टंदुष्टगेहेषुकृतमेतेनसर्वदा नीचसं
भाषणेनैवकालोनीतोदुरात्मना शिवनामनजानातिसोयंशुनकसन्निभः शुनीयोनिषुसंगोपिकृतोनेनदुरात्मना नरोपिसू
करीयोनिंगार्दभीयोनिमन्वहं अन्विष्यैवस्थितःसोयमंतिकामातुरोमुने नानात्रैर्पोर्व्याधिभिश्चपीडितोक्षुधितोप्ययं शुनीरमे

सकरींचगादीनामपिकोटिशः ब्राह्मण्यमपिसंप्राप्यमहापातककोटिभिः समाक्रांतोयातनांच भुक्त्वायस्थितएवहि स्मार्त्तं
वोवैदिकंकर्मनानेनज्ञातमेवहि नास्यपुण्येरतिर्जाता कदापिमुनिसत्तम यद्यत्कृतंपुरापापंतेनपापंपुनःपुनः पुनःपापंपुनः
पापमर्जितंगणनास्यन भूयांसुगणनापिस्यात्कदाचिन्मुनिसत्तम नचैतत्पापगणनांकर्तुंशक्तोयमोपिसः चित्रगुप्तादयःशां
ताः तत्पापामितसंख्यया यमदूताःपरिश्रांताःताडनेनास्यकोटिशः छिन्नानिभिंडिपालानिशस्त्राणितूटितान्यपि एतद्देहा
भिघातेनसर्वदायममंदिरे पुनर्जनिःपुनर्मृत्युःपुनश्चयमयातना एवंजन्मानिनीतानिकष्टदान्येवकोटिशः पापनाशकरंकर्म
नह्यनेनकृतंमुने पातकंतुपरंज्ञातंकृतंचमुहुरादरात् अस्मारभ्यतएवायंपापराशिसमाश्रयः नपापराशिगणनायायानांगण
स्यति एतस्यनाशःकेनस्यात्कदावातत्तदाधुना इदंचरमंमेतस्यशरीरमितिनिश्चितं अतःपरमनेनास्य संगोप्यत्वंतदुल्लं
घ्यः दुष्टेविषतरोमध्येयथाकीटस्थितःसदा तथास्थितंमयादेहेवालुस्यास्यमुनीश्वर यानिकीटशरीराणिकीटकेघस्यते
घापि मयास्थितंपापभोगैःकेवलंनीयतेदिनं किंचैतज्जननादत्रशांभवश्चात्मुतामही भविष्यतिमयाकुत्रस्यातव्यंतत्तदाधुना
नपापिष्ठशरीराणिराक्षस्मिन्मुनिपुंगव इतोवहिर्वागमनंममशक्यंनसर्वथा शांभवाग्रेसरद्रष्टुभीतिरस्याःप्रजायते पलाय
नेचसहस्रानभविष्यतिसर्वथा मुक्तिःसंपादनीयाम्भतिदानेनकेवलं विभूतिःपापमूर्तीनांनाशायाशुप्रजायते विभूते

सम:
१८१

धारणादेव मुक्ताः पूर्वे मुनीश्वराः प्राप्तं मुनीश्वरत्वं च केवलं भूतिधारणात् ऐश्वर्यं परमं प्राप्तं भूतिरुद्राक्षधारणात् न भूतिस
दृशं वस्तु भूतिदत्त्वेन कीर्तितं ७९ भूतिविभूषणं येषां ते भूतपतिसेवनं कृत्वा मुक्तिपतिं यान्ति किं महोदवं द्वपानिधिं ८० भूतिप्र
भावो न ज्ञातः केनापि भुवि सर्वथा अतः संसारभारेण पामरं व्येवातिपीडिताः अलौकिकं लौकिकं वा स्वतो भस्मातिपावनं तस्मा
द्यतिपापिष्ठं वरिष्ठान् दुष्टचेतनान् भस्म स्मृत्वापि मुच्यंते भक्त्या परमपावनं महाभस्मप्रियं भस्म तद्भस्मातीव दुर्लभं या
पानो भर्त्सनात् भस्मभासनाच्छिवस्य च तद्भस्म दयं तेनैव मम मुक्तिर्भविष्यति भवंतं गुरुमासाद्य भवर्लोलाञ्छितं भस्मादा १०५
य गृहीत्वाद्य मुक्तो वाहं भवाम्यहो महानुभावो यो भाव स्वभावेन स्वभावतां संपादयत्स्वभावस्याप्यतच्छिन्नेन वस्तुतः इति तद्व
चनं श्रुत्वा कृपालुरपि नारदः कृते भूतिः कृते मुक्तिर्मुक्तिवार्तापि दूरतः त्वया निष्ठुरमंत्रोक्तं बालकस्य महात्मनः शैवविद्यादीक्षि
तायमंत्रं तमापसाधनं यस्यास्ति शैवविद्यायां बुद्धिः सोपि महान् खलु तत्र निष्ठुरमुक्तं तेन नरकं याति सर्वथा अज्ञानेन प्रमादाद्वा
प्रसंगाद्वा करोति च न शिवज्ञानान्वितं दृष्ट्वा नानेन मद्यः सपापधीः शैवविद्यादूषकानां नरके वसतिः खलु अतः परं त्वया प्याशु गंतव्यं
नरके ध्रुवं शैवदीक्षापूतदेहः पुण्यपुंजरितिस्मृतः तत्र निष्ठुरमुक्तं तेन त्वं सेवनरकं ध्रुवं ८२ विभूतिधारणासक्तिः शांकरे शंकरेपि
वा यस्य स्यात्स तु मुक्तः स्यात् द्व्यस्य तु न सा खलु भस्मधारणपूतात्मा यः पूतः शिवविद्यया सत्वं तावद्गुरुत्वेन वै तत्रैवं च दुर्भाषणं शै
वविद्यादीक्षितेषु विनयेनानुवर्त्तनं सर्वपापविनाशाय सद्य एव प्रजायते शिवविद्यामपि कंठे प्रदाय साधितिष्ठति तदा तद्वा

भूपालो न विलोकितोपि न नतः संभावितो वा मुदा यत्संभाव्यमेव भूषयामीति ज्ञाते तदेवं क्षणं मोक्षस्यापि विलक्षणं करणा
मिक्षाकुर्महाशां भवाः विघ्ना एव भवंति तावदसहून्नं खलु श्रेयसां तद्दौवारिकबुद्धिरेवमभवत्मा वा निषेद्धुं मुहुः उद्दीप्या
पिनगंतुमेवमुक्षितं दंडाग्रभीतो धुना लब्धोयं गरुडो हृदापि ह्यडिति यद्ग्रन्थविंतमम पुण्यान्यस्य बहूनि तावदधुना संपादनी
यान्यपि प्रायः पर्वतराजराजतनयाकांतांघ्रिपंकेरुहं नध्यातं मुहुरादरेयासह्ना तीव्रेणाकिं निर्गमितध्यातं यदि सादरं मुहुरियं
प्रत्यहवान्तौ कुतः सतीघो घविनाशकं स्मरयाति गौरीपतेस्यारतः जन्महोविलयं प्रयाति बहुधा प्रसह्य संघस्य श्रीविश्वेश्व
रपादपद्मभजनं तावत्परे साधनं तस्माद्यद्यधिकं न साधनमिति ज्ञातं मुनीन्द्रैरपि संसारोपि लयं प्रयाति बहुधा विश्वेश्वराराध
नात्प्रसूहः सकलं लयाति विलयं विश्वेश्वराराधने नध्यानं सुरभूरुहः सुरमणिस्तादृग्गोरिस्यपि शांतेतेननता पितिपि निधयः
प्रासाभवंस्तेवहि ६७ कस्यांडे प्रलयं प्रयाति गिरिजाकांतांघ्रिपंकेरुहं श्रीपरात्मजुषा व तत्खलु सह्ह दृज्वी सद्भूसासदि नहि
स्यास कलोदर्वाख्य विरंचिपक्षा ततस्ता स्मृतेः सर्वाभीष्टफलश्रियां समुदयस्या देवसर्वात्मना ६८ नजानीमस्तावद्धिरिञ्चा
नरवो भो जभजनप्रभाव भावानामभिमतसमस्तार्थफलदं तदेवाराध्य क्षयकरमपर्णापि तनुतेमवाप्यवीपिसेयहहनवि

राम:
२७२

ज्ञानंतिविधयः ६० उमाकांतेस्वांते परिलिहितमसादरदरैः तदातावद्धेको विजितइविमन्येध्रुवमिदं अपारैरा
कल्पंप्रतिदिनमहादानतपसांसमूहैरेवस्यादितिमतिरभूदेवबहुधा ७० किमेवंप्रत्यूहः समभवदहोशांभवपदंम
नागद्दृष्टेयत्नेसतितिमिररूपायमधुना अयंतावद्गौरीरमणचरणांभोजकलनप्रसादाकोदारुप्रशममुपयास्यत्यपि
नकिं ईश्वरजनामुखंशिवपदांबुजाराधनप्रसादनिधिसाधनेशनियुतोपिवाकोधुना शिवायदिसमर्चितः सकलसि
द्धिरसाद्गुभभविष्यतिनसंशयःशिवकृपास्योयेदिनेमयि मृगौरपिमहोत्सवैःसितविभूतिपतेरहोप्रदोषसमयेगतिः कि
यतएवदूर्वांकुरैः सुबिल्वदलसंयुतैरपिमनोहरैःसादरंमहेशसदनप्रतिप्रियमयूरगोभिःसह प्रयांतितरवोप्यमीवि
विधपुष्पगुच्छान्विताः कृताकुजलसेचनाः सितविभूतिपुंड्रांकिताः शिवालयममीध्रुवक्षप्रतिपत्रिवर्गोप्यपिप्रभूतविभवान
पः शिवपदांबुजाराधकः भाग्यशंकरपूजयाशनिसुतकामपरंलभ्यते लिंगेबिल्वदलार्पणंचविविधंश्रेयस्करंजायते त
त्किंविघ्नितजातमेवमधुनातेनैवभाग्यंमहत्प्रायोयास्यतिसायमीशभजनाभावेनसर्वात्मना इतिव्याकुलचित्तस्यैवंच
नाम्नींदिरापतेः भूवासनंदनःप्राहतमेवगरुडध्वजं सनंदनउवाच अयंपुण्यतमःकालःकालकालसमर्चने शनित्रयो
दशीपुण्याप्रदोषोयंविशेषतः प्रदोषकालेसंप्राप्ते कृत्वास्नानादिकंततः पूजनीयोमहादेवःशिवलिंगेशिवात्मके सद्युक्तं
वाससापूज्यः भस्मनाभूषितेनच रुद्राक्षाभरणेनापिततःपीतांबरस्रज स्नानेकुरुप्रयत्नेनशिवतीर्थेशिवप्रिये शिवपादौ

बुजोऽस्मिन्नेमिदं तीर्थमघापहं अत्र स्नानेन पापानि विनश्यंति नसंशयः अनेनैव जलेनेशः ससर्ज जगतांत्रयं ससर्ज लक्ष्मी
शानेप्रथमं तस्यनंतरं अग्निं चंद्रं च सूर्यं च भवंतं विधिमेव च ततः सर्वानिमान् लोकान् ससर्जानेन केवलं इदं खलु महत्स्था
नमुमाकांत प्रियं हरं गौरी निर्मितमेवैदं लिंगं संपूजितं त्वया समर्चय प्रयत्नेन भूतिरुद्राक्षलक्षणः सज्जनं गदाशंखश्रा
ङ्ग चक्रधरस्तदा अत्रांभवानि विन्शानि सर्वाण्यपि परिसज्ज प्रदोषकाले संप्राप्ते शुचिर्भूतेन भस्मना पूजनीयो महादेवो बि
ल्वपत्रादि साधनैः अदूरे बिल्वतरवः संति तद्बिल्वपल्लवैः करवीरैश्च कनकैर्लिंगमर्चय शंकरं मुनयोऽपि प्रयत्नेन प्रदोषे गि
रिशार्चनं कुर्वंति बिल्वपत्राद्यैः शिवपंचाक्षरोत्सवैः निवारितास्मिन् काले भूपदौवारिकैर्हरे अत्रांभवत्वं विहाय त्वयि तावद
संश्रये भस्मोद्धूलित सर्वांगस्त्रिपुंड्रांकित मस्तकः रुद्राक्षमालाभरणः शांभवः शिवतत्परः शांभवालोकनेनापि भीता
दौवारिकाः परं शिवालयप्रवेशेऽपि सुनकरिष्यंति विचारणं पश्य शार्दूलवृंदानि भस्मपतालितान्यपि एणीमुखान्मृगान्सर्वस
र्वान् भस्मविभूषितान् रुद्राक्षमालाभरणान् शिवध्यानपरायणान् तरून्यपत्र तरस्मा हाररूपधरान् परान् विलोकय प्र
यत्नेन शिवपूजन साधनान् प्रदोषकाले संप्राप्ते शांभवं वेशमावह अत्रांभवानां सहसा प्रवेशो न सर्वथा भूतनाथार्चन
पराः पतिभूतिभूषणाः स भूतिरहितं प्रायो न पश्यति विशेषतः भूमंडलमिदं सर्वं मंडितं शांभवैः परं अत्रांभवानां पातोऽपि
सर्वथात्र न हि संमत किंचाशांभववेषेण स्थितिरत्रोचिता न ते प्रदोषेषु विशेषेण नात्रांभवविलोकनं अत्रांभवं प्रदोषेषु यः पश्य

रामः
२७३

सुपिमोहतः सयातिनरकंघोरंकुयोनिरपिगच्छति अशांभवमुखंदृष्ट्वाप्रदोषेमोहतोपिवा दरिद्रोजायतेमर्त्यः सुरोशास
भतामियात् धिगशांभवजन्मालिभूतिहीनानिसर्वदा प्रदोषेषुविशेषेणाभूतिहीनोनिरर्थकः त्रिपुंड्रेरेखारहितायदि
फालेनिशामुखे तदातद्धिग्धिगित्येवंनयेशंयसेवपंडिताः रुद्राक्षधारणंश्रौतंश्रौतंतन्मस्मधारणं तस्यत्यजेनसहसासता
वसतितोभवेत् अस्माकमीशानपदार्चकानांविभूतिरुद्राक्षविभूषणानां उद्धूलनेनास्तिपवित्रमेतन्मात्रंप्रदोषेषुविशेषतस्तु
किंचपीतांबरधरंशंखचक्रगदांकितं विलोक्यसायमनुजोहरिर्भवतिध्रुवं किंचायुधैःकिमेतैस्त्वत्रयमत्रजनार्दन पीतांबरेण
किंवृसंगरुडेनापिकिंफलं ५ किंचाशांभववेषदूषिततनुर्दृष्टैर्वदेवारिकाः त्वद्भक्त्वभवंति नेतुसहसाशांताः क्वदापि
लयि इंद्रेवानविधौविधिप्रमतिषुव्यग्रास्त्वदंडाहति व्यग्रान्कर्तुमिमीस्वतोपिसहसातावत्प्रवृत्ताः परं कःशांभवेषुकुरुते
प्यभिमानवार्ताद्वेषदूषिततनुस्तुनतत्र याति देवाद्रतोयदितदासनिपाति तापितदंडभीषणारवेणानताडनेन धन्यः
शांभवपुंगवेषुविनताभूतित्रिपुंड्रांकितारुद्राक्षाभरणामहेश्वरमहादेवेतिवासंवदन् तैरर्चितएवयातिभवनंशंभोःपरं
शांभवः तंकोवाजगतीतलेननमेतिश्रीविश्वनाथप्रियं ७८ इतिश्रीस्कांदेमहापुराणेहिमवत्खंडेशिवरहस्ये
तृतीयांशेउत्तरखंडेयाज्ञवल्क्यजनकसंवादोनामषट्त्रिंशोध्यायः २६ श्रीशिवार्पणमस्तु याज्ञवल्क्यउ
वाच इतितस्यवचःश्रुत्वासोपिनारायणस्तदा मुक्तमुक्तमितिप्रीत्यातमाहपुनरादरात् न सामान्यवेषेणगम्यतेयदितत्र

मेऽवेशादुल्लोभोनूनंसायंकालेविशेषतः सायंशालिन्त्रयोदृश्यंशांभवाः कोटिशः शिवं पूजयिष्यंतिराजापिसामा
स्तःपूजयिष्यति ३ राजदाराः कुमाराश्चराज्ञः सुह्याबुलान्विताः तेषुसत्सु अवेशोऽमेकअंवास्याच्छिवालये अमानुषपारूपेषा
गमनेस्याच्छिवालये केनरूपेणागंतव्यमितिचिंताप्रजायते मत्वाविलक्षणंरूपंशांभवाश्चततोयदि तदाखलुशिवद्रोह
तेनस्यान्नरकेस्थितिः ६ शिवद्रोहरताः पूर्वंनरकेपतिताः खलु तेषांनिवृत्तिरद्यापिनरकेभ्योनजायते ७ पापांतरापिन
युंजंतिधर्मभेदैः कदाचन शिवद्रोहार्जितंपापंननश्यत्येवसर्वथा ८ शिवार्चनस्यविघ्नश्चेत्क्रियतेतेनमांयमः नयिष्यतिन
संदेहाघोरंरौरवमद्भुतं नौरवान्निर्गमोपिकदाचिदपिसर्वथा भविष्यत्यतएवाहंसंकटंसमुपागतः १० शिवार्चनपरित्या
गस्तद्विधातश्चसर्वथा प्रायश्चित्तसहस्रैर्वानशांतिमुपयास्यति ११ मन्येपातकपातकेबहुविधापारध्यथासाधनंसायंशं
करलिंगपूजनपरित्यागंतमसद्भुतं साक्षाद्रौरवहेतुभूतमसकृत्कालेपितंपातकं मत्वाविस्मयमेतितेनसहसातस्माच्छिदृ
तिश्चन १२ किंतेनेतिवदंतिवेदततिरवलाः किंतावतातत्समंतस्मादप्यधिकंचपातकवरंनैवप्रपश्याम्यतः नस्यादेवमहेश्व
रार्चनपरित्यागमतिःसर्वथासहस्राजन्मवस्यसाभवतिवेश्याज्ञारजार्नोपरं निधानमिदमेवनः शिवपदांबुजाराधनं तदेव
सुरभूरुहः सुरमणिः धेनुः सुराणामपि तेनैवामरजीवनंसुरतरुस्तत्तदेवाद्भुतंतच्चिंतामणिमंततोनवनिधीनांदेवतानांसु
धा नशिवार्चनेनसामर्थ्यंज्ञायतेमनुजैः सुरैः गंधर्वैरपितन्नानन्निधानमितिमेमतिः संजीवनीसाशिवलिंगपूजालिंगार्चना

राम:
२५४

कारसुधानिधानं लोकेपरं दुर्लभमेव वव्हनं तद्येन लब्धं सुकृती कृतार्थः वंदे शंकरपंकजकांघ्रिकमलं वंदे शिवाराधन ज्ञानारा
धनसाधनानि बहुधा तत्साद्दुकाराधकान् तत्सारांकुरजातिपावनवरं तल्लेच्छमस्माद्रात्तस्मादीशपदांबुजार्चनपरो धन्योऽति
मान्यो मम जातिस्तत्र विचार्यते च मम मायः शंकराराधकः सामान्येन स एव मे प्रियसखा तत्र द्विजश्चेत्तदा मान्यस्यास्तु मुदाद्वि
जो यदि भवेद्विप्रः शिवाराधकस्तं मन्ये गुरुमीश्वरं मम स मे पूज्यं परं दैवतं १८ कोवा शंकरपंकजेन सदृशो विप्रेषु तुल्यो भवेत्साक्षा
द्ब्राह्मणरूपमेष भगवान् शंभुः शिवाराधनं कृत्वा दर्शयति प्रयोजनमिदं श्रेष्ठं नराणामिति प्रातः सायमुमासहायभजनं कर्त्त
व्यमित्यादरात् नम्रग्राणि ममेंद्रियाणि सहसा स्युर्मय्यचिंतिताः शंभो भवेत संभावनया भवेदपि सभवेत्संभावितः शांभवं रूपं दुर्लभ
मेव शंभुभवनं तद्रूपमित्येवमे बुद्धिस्तस्य सदा परेपुतरणिर्मोहांधकारापहः २० हृत्वापत्कुलमेक्षदा शिवरतो हृष्टोऽतिभक्त्यान
तः संपद्वृद्धिकरः सपापनिकरध्वांतप्रचंडांशुमान् तस्मात्तच्चरणांबुजार्चनरताः संतः कृतिस्संततीते शांतास्तितु सं नातभीतिर
हिताः स्तताद्वदस्त नमाः इत्याकर्ण्य च वस्तस्य सनकोदृष्टमानसः गंभीरया गिरा प्राह नारायणमनाकुलः सत्यमुक्तमिदं वि
ष्णो तत्वहोऽसि न संशयः शिवप्रसादसंपन्नस्त्वमित्येवाहमे मतिः जातकस्य प्रदोषोऽपि स्नात्वा सत्वरमादरात् उद्धूलनत्रिपुंड्रा
भ्यां रुद्राक्षैश्चांकितोऽभव दुकूलपरिधाया गृहीत्वा विल्वपल्लवान् वलाति त्वरया पात्रे गृहीत्वा जलमुज्वलं कमरुविम
ले त्वं च मतिर्द्राक्षभक्षिते तिलाक्षतान् गृहीत्वा नु चरुनारायणान्वितः इत्युक्तः सोऽतिसंतुष्टः तयेस त्वाहरिस्सदा ययोस

पद्मयासार्कं सनकाद्यैश्च संयुतः ततः प्रविष्टा निर्विघ्नं विष्ण्वादौ र्वारिकैरपि अवारितो महादेवमंदिरं सुंदरं परं २८ कर्पूरदीप
मालाभिः अभितः परिवेष्टितं रत्नतोरणसंकीर्णं रत्नहारविराजितं रत्नगोपुरसंकीर्णं रत्नमंडपावृतं सुधाप्रवाहसं
सिक्तमंदारकुसुमावृतं फलमालासमाकीर्णं गुच्छमालाविराजितं रत्नमालासमाकीर्णं शिवभक्तसमावृतं शुकैर्मयूरैर्हं
सैश्च परितः कमलाकरे आलास्थितं सर्वभूतिरुद्राक्षभूषणैः शार्दूलाद्यैः मृगेंद्रैश्च भूतिरुद्राक्षभूषितैः सेवितं शंकरस्था
नं शिवध्यानपुरस्सरं शिवनामजन्तराः पाद्यक्तैस्तरुभिः श्च विराजितं प्रसूनमंडलाकीर्णं भ्रमरैरपि शोभितैः सुधापथ
मेरखाभिः अलंकृतमितस्ततः उपहारगिरिश्रेष्ठैः अड्डसाख्यानसचकैः विपुलापूपसंघैश्च घृतकुल्यादिभिर्युतं मणिमंटप
संकीर्णं नानाफलविराजितं द्राक्षाम्ररसकुल्याभिः अलंकृतमनेकधा दधिसाराचलाकीर्णं दुग्धसाराब्धिसंकुलं एतादृ
शं शिवस्थानं दिव्यनाद्यंगनावृतं दृष्ट्वा कमलाकांतः सकैलासमिवापरं कल्पवृक्षसमानीतफलपुष्पसमाकुलं कामधे
नुप्रभृतारक्षीरधारासमावृतं विस्मितो दूरतो दृष्ट्वा सकृतार्थममन्यत स्वात्मानं कमलामाह पश्य पद्मेति सादरं किं किं
तपः पुण्यमपूर्वमासीत् दृष्टं शिवस्थानमिदं मनाक् अतः परं जन्म कृतार्थमेव नेत्रे कृतार्थे चरणौ कृतार्थौ प्रदोषकाले गिरिशालय
स्य त्रिलोके नेनापि कृतार्थमेव इंद्रपदं ब्रह्मपदं बनमि सर्वमिजितं च लोकत्रयमेव तेन एतादृशं भाग्यमदृष्टसंघैः विना नकस्याप
ति दुर्लभत्वात् दृष्टं शिवाराधनसाधनं च तदृष्टपर्वं च न दृष्टपूर्वं पंचामृताभिषेकार्थं प्रवाहं यो कृतवान् एतादृशं न कुत्रापि दृ

राम:
२७५

नृपएवंमयारवलु स्वयंनराजाशिवराववसाक्षान्नृमंडलानुग्रहवांछयात्रा करोतुलिंगार्चनमादरेणानरस्यकिंचामतिरीदृशीस्या
त् ५१ सामग्रीकथमीदृशीवदुविधालिंगार्चनायांभवदृवानामपिदुर्लभासुरसरितत्तुल्याश्चकुल्याअपि क्षीरस्यापिघृत
स्यतस्यमधुनोदध्नः सितापर्वताः संपन्नाः स्वयमागताः कथमयंराजाशिवः केवलं अतः परंनेत्रविश्रामस्ताया: हृतंचसंपन्न
मिदंविलोक्य नृपमनोमजनिदुःखनाम्नाः शिवालयस्यास्यविलोकनेन नक्षत्रमंडलमतीत्यविभातिशृंगे तुंगविलोक्ययविल
क्यसावधानं एतन्निधानमितिममतिरविरासीत्कैलासतुगनिभमवधुभावहेमे ५८ शिवालयस्यास्यसहारतारामाला
सेमतस्यमनोहरस्य शोभावलीमंडलमंडितस्यशृंगस्यशोभांपरिपश्यपश्य ५९ आमूलचूलामितिदीपकांतिविराजितंमंदिर
मीश्वरस्य मुक्ताप्रवालप्रभयातिवितिरत्नप्रभामंडलमंडितंच ६० इंद्रनीलमणिकांतिसमूहपश्यपश्यशिवमंदिरमूले
मौक्तिकादिसहितंगगनस्थभ्रांतिमद्यजनयत्यमितोमे पश्यहकात्तस्वरकांतिरवातटिद्युवाहभ्रममातनोति सांद्रेंद्रनील
प्रभयासमंताकरोतिमनोरतबुद्धिमेव सुधाकरःशंकरमंदिराग्रेवितानवत्तिष्ठतितस्यकानि मुक्ताफलंचंचलंचलानिशो
भेयंमतस्यमनोहराणि हरहररुचिरेयंनिर्मिताकांतिरेषाशिवजनहितहेतुर्धर्मसेतुःसकेतुः शिवपदविभवस्यस्वपदेनतुरेवं
तदशिवकथनीयंकिंकिमत्राद्भुतंस्यात् करुणामयितेनुवर्ततेयदिदंदृष्टमघापहंमया शिवशंकरमंदिरमहाःकिमपूर्वतदिला
जगत्रये धाम्नमानसमाशापजनरतथ्यानानुरक्तंमुहुः धन्यमेनयनंबुजंचगिरिशास्यानार्चनावेक्षयोः एतावन्ममसिद्धिदं

पुनरिदं संप्रार्थनीयंमम्याकस्पदंसुलभंपुरातनमहापुण्याब्धिलब्धंपरं क्वाहं कुत्रशिवार्चकान्वितशिवस्थानंनदालोकनंत
न्मध्यस्थितिरीशनामकथनंतत्सर्वमत्यद्भुतं रेशानुग्रहभेदलब्धमधुनाधन्योस्म्यहंसर्वथाधन्याग्रेसरशंगपूजकपदंभो
जानुरक्तंमनः साचंशांकरदर्शनेनविलयंप्राप्तोनिपापान्यतःसर्वोपद्रुतलयोपिजातइतिमेमुक्तिश्चसंभाविता लिंगमंगल
दृष्टिलाकितामिदंविलोक्यदलाभ्यर्चितंकिंतस्मादधिकंप्रदास्यतिफलंतन्नैवजानेधुना सेव्यासव्यविधानतःप्रतिपदंमयाःशि
वाराधकाः सर्वेतेप्रणमामिभक्तितिलकसद्भावाः पवित्राः परं स्वंदृस्यापनयेनभक्तिमर्पितगृपंइतिफाल्गुनःनृत्यंतिप्रजपंतिशं
करमहादेवेतिनामान्यपि आनंदामृतसागरानिमग्नाःसंपादयंत्सवतेशाद्भ्वाश्शंकरचंद्रशेखरमहादेवेतियेवाम्बुलाः संपन्नं
जनुषःफलंफलंचविदुषांसंप्रार्थनीयंचकिंतस्मादप्यधिकंतदेवसुखलंभाधिमनुष्येभवेत् इत्युक्त्वासनकादिभिःसहमहा

राम:
२७६

विष्णुःशिवाराधकप्रापत्शंकरमंदिरंनृपवधप्याप्तप्रविष्टस्तदा सायंशांकिलएवतावदसकृत्त्वातुलनिर्गतोमत्वातुगभ्रंगवाद
नरतत्त्वस्थोसनत्संगपा शंशांकरशंकरपश्यविनादहृदयमवरंभवहरदुःखं हरहरहरकुरुकुरुकुरुकुरुकुरुकौतुकमनुवे
लं ६२ शिवशिवशिवशिवशिवशिवशंभोशिवशिवशिवशिवशिवशंभो शिवशिवशिवशिवशिवशिवशिवशिवशिवशिव
शिवशिवशिवशंभो ६२ भवभवभवभवभतिविभूषितभवभवभवभवभतपते भवभवभवभवभगवन्भवतेभवभवभवभव
भवभवते ६७ शंकरशंकरशंकरशंकरशंकरशंकरशंकुरुमे शंकरशंकरशंकुरुशंकुरुशंकरशंकरशंकुरुमे इतिमर्दलवादनो

३ कमलांविमलांनीगां प्रवीणा शिवनामभक्तिः॥ चकार गायनं मंदं ॥ ही सा कुकर पल्लवे॥ गंधर्वाकिन्नरा सिद्धाश्चार गा अपि
सादरं

वादेना त्वरं विनतां संहृतकौसमादरात् परितो दृढ्युः शिवार्चकाः शिवलिंगार्पितशुद्धमानसं सराजासाधनैः शुद्धैः सम
भ्यर्च्य महेश्वरं शिवध्यानरतो भक्त्या प्रणतश्च मुहुर्मुहुः राजदारकुमाराश्च प्रजयित्वा सदाशिवे संतुष्टाः शंकरध्याननिरता
एवसा हर्षं दारैः कुमारैर्गानानि कर्तुमारेभिरे मुदा प्रतिक्षणं पुष्पवृष्टिरभूद्दिक्कृपि विश्रुता पुनः पुनरभूद्देवदुंदुभिः कल्पतरुसंभ
वा देवदुंदुभयो नेदुः मंदं मंदानिला ववुः शिवध्वनि समाकीर्णं तदाब्रह्मांडमंडलं एवं शिवो सवे नैव सानीता रात्रिरादरात्
अरुणस्योदयो वृत्तः ततः स्नातो नृपाधिपः सराजा पुनरादाय शिवपूजनसाधनं निर्माल्यं परिहृत्याशु पूजयामास शंकरं ७४
ततः परे राजदारकुमाराद्याश्च शंकरं स्नात्वा दुकूलत्रिपुंड्राक्षास्तरुद्राक्षांकिता अपि शिवलिंगार्चनेन चक्रुः बिल्वपत्रादिभिर्मु
दा गंधर्वाद्याश्च ते चक्रुः सुराश्च शिवपूजनं ततः प्रसन्नवदनः सराजा शिवतत्परः सर्वान्संभावयामास शिवनैवेद्यदानतः
राजप्रसादं संप्राप्तं शिवनैवेद्यमास्तिकाः संप्राप्य सर्वे संतुष्टाः संतुष्टः कमलापतिः इंदिरापतिरादाय शिवनैवेद्यमुत्तमं आ
नंदाश्रुसमाकीर्णो निनर्त सशिवांगणे हारोपहारायमनेन सुक्तौ करोवरोपावनपावनोमे अयं प्रसादो गिरिशस्य साक्षात्ते
वेद्यरूपेण समागतो मां ८० अपारपापप्रलयानलोयं हारोपहारो तिमनोहरो मे हरस्य तोषाय दुपाधि सिद्धेनानंद धारा बुधि
वर्धकोयं भाग्येन लब्धः सशिरोपहारः शिवोपहारो हृमिदं शरीरे अनेन तावन्मम मुक्तिरेव भुक्तिश्च पाहेतुरयं विशेषात् जिह्वा
जाड्यविनाशकोयमधुना कर्णाजनान्मानं पुण्यानां भवतीति मे मतिरयं दत्तं भुतं पावने हारे किं नमहोपहारमसनं संप्राप्य

नेहीश्वरो गाणापत्यमवाप भाग्यमतुलं तेन भाग्यदानोद्धतं इति तद्वचनं श्रुत्वा राजा संतुष्टमानसः तमाहूय हे कोसितीसति
ष्णुं प्राह भूपतिः तदासनेदत्तः प्राह राजानं शैवपुंगवं अयं नारायणो राजेन्नु आगतो जनि श्रीमुखे इति तद्वचनं श्रुत्वा राजा
पिकमलापतिं शिवार्चनरतं प्राह कस्ते धर्म इति स्वतः ८९ विष्णुरुवाच धर्मः किमन्योपि नृपास्ति लोके मन्ये शिवाराधनमे
व धर्मं अन्यत्र धर्मत्वमतः प्रवृत्तिर्जन्मानुवृत्यै मरणानुवृत्ये धर्मः शंकरपूजनं नवलसद्बिल्वैर्दलैः कोमलैः भस्मांगी निटिले
विभूतिविलसद्रेखावलीकेवला रुद्राक्षामलमालिका शिरसि वा कंठेपि वा कर्णयोः श्रीपंचाक्षरमंत्रराजजपनं मन्ये परं मुक्ति
दं धन्यानां शिवपूजने खलु मतिः प्राग्जन्मपुण्यार्णवैः तूर्णं शंकरपूजनेन न जनिः संसारवार्ता कुतः भाग्येनैव परं महेश्वरपदां
भोजार्चनं जायते बुद्धिः सिद्धिरियं विशुद्धमनसामन्यानसिद्धिर्यतः न जानंत्येवान्ये शिवपदमहांभोजभजनप्रभावं भावानो
भवति परमासामतिरपि अपारं तत्सुपुण्यं गणितमपि केनापि गणानामतीत्यास्ते वक्त्रे प्रकटमपि दृष्टं भवति किं लखंडम्ममंडल
दानेनापि वामार्धजानिप्रवणमनः किं परं तु तस्याङ्घ्रिरिजा सहायपादांबुजाराधनमात्रतस्यात् ९१ कति कति भुवि संतः संति
ते स्वांतरूपे कनककमले कोशे शंकरं भावयंतः सितभसितविभूषाः शंग लिंगांगभागस्थुलजललवपानाधीनमानानुमोदाः ९२
ये ये शंकरलिंगपूजनरतास्ते सर्वथा दुर्लभाः शंभुस्मृत्यतियेन तेन सततं धर्मे पालभं सुखं लिंगाराधनमेव तावदसकृत्ततस्तु
ष्यसं नर्धेके ब्रह्मानंददमप्यतः परमपि प्रायः किमन्यद्भवेत् ९३ योगैर्वा तपसाप्यिवा शिवपदांभोजप्रसादं विना भाग्येनैव तदेव

भाग्यमसहृ दृढं शिवाराधनैः गौरीनाथपदारविंदभजनात्किं किं न लभ्यं भवेत् माध्यानांनिधिरेव शंकरपदांभोजार्चनं सर्वथा
यत्पादांबुजपूजया नृतमहापापक्षयस्यात्ततः संपद्वृद्धिरनुक्षणं प्रतिदिनं संतोषधारोदयः धीरोदारकुमारदारविभवश्रा
णिश्च तच्छीलजा कांतं सांतमपेक्षितं मम सदा संसेवितुं सर्वथा। यत्पादांबुरजःप्रभावमहिमा वेदैर्न विज्ञायते वेदांतैरपि
संततं मुनिजनैश्चोतरैस्तैरपि तद्देवोत्तममामनंति गिरिशं वेदाश्च तत्सादुकं ध्यानाराधनसाधनं मम मनो नूनं न जानेपरं
स्मृतोपियः सर्वसुरासुरेश्वरा ददाति मुक्तिं स शिवः कथं वा नाराधनीयो नत्वसेवनीयः स एव तावत्करणं हि मे ८ यत्ना
मस्मरणात्प्रदीपाद्दक्षो भोजार्चको वासुकिब्रह्मेंद्रादिमरुत्पालपितथा गंधर्वसिद्धादयः तस्यैश्वर्यमपारमप्रतिममथा
त्रिप्रहापायाद्धृतं तद्देवोत्तमं मंतकांतकं महेशमन्यसुराधीश्वरं ९ यल्लिंगार्चनमात्रलब्धमधुनावैकुंठरूपं परं स्थानं मेतद
पारदिव्यमहिमा विज्ञायते केन वा तन्नैलासहृदयमुमापतिमतः कैश्वर्यसौभाग्यदं प्राप्येश्वर्यमिपारमेव बहवः प्राप्ताश्च
मुक्तिं परं अस्माकं शिवलिंगमेव सततं पूज्यं तदभ्यर्चनात्प्राप्तं भाग्यममतः परं पुनरपि प्राप्यमेवासहृत् सौभाग्यमस्तु
रवस्यनमात्रनिपुणः कारुण्यपूर्णो पिवत्संगौरीरमणं स्वपानशरणं प्राप्ताः सुरास्सर्वदा १० चक्रं प्राप्तमुमासहायचरणा
भोजार्चनोनादरात् तेनैवामरवैरिनाशनकरस्सोहं तदा साकरः यत्स्वेशरत्निनंदिकेश्वरमुखैर्विज्ञायते महल्लेशावाराधन
साधितं तदपि मे वद्धं शिवाराधनात् १ कौसांशंकरपादपद्मभजनप्राप्ताबलात्संहतः श्यामसुरापि मुरापितन्मदरजः पुंजस

साद् स्ततः सर्वार्थप्रदं ह्येवशीकरइ ति ज्ञातः स्तदाराधने किंवाडुर्लभमस्त्यैवेप्सितनिधिः साक्षान्निधीनोनिधिः २ यत्नामाम्
तपानपीनमनसां सिद्धिः करस्थासदा सर्वं तन्निधयेऽर्पितहृहगता स्तंदेवंदेवंभवे भक्ताभीप्सितदानलोलममलज्वालाल
वाल्लोलसन्मौलिबालसुधाकरामरुजटालीलाकलापंभजे इतितद्वचनंश्रुत्वाराजासंतुष्टमानसः ददौहारानपारांश्च
हारबुधाःसविस्मयाव कमलाराजदारायांनिकटेशिवगायनेः वीणागृहीत्वासंतोषंजनयामाससादरं तामिदिरामिंदु
कलावतंसगानानुरक्तांनृपवर्यदाराः विलोक्यभाग्यकमलेतवेति तामूचुरस्सादरमाधिकन्या राजदाराऊचुः वैकुंठभवने
नित्यंकिंतेकार्यंकथयस्व समयेनिन्यतेपद्मवदसादरमद्यनः लक्ष्मीरुवाच तत्रास्तिसदनंरम्यंहर्म्यस्याधाममनोहरं
तत्रलिंगानितिष्ठंतिनार्मदान्येवकेवलं तानिलिंगानिमद्धारैः कोमलैःर्बिल्वपल्लवैः पर्जयंतेपरितस्तस्यमंदारासंतिकोटि
शः तत्रैवबिल्वतरवः संतितावसहस्रशः अखंडबिल्वपत्राणामाकराएवसर्वदा तत्सजनार्थमुद्योगंकृतेसत्यवशाखि
नः अवाप्नुरवाभवेसतकरयाद्या स्तथान्नताः कुण्डविशेषवतस्तत्रै कुसुमैरपिशंकरः पर्ज्यतेसावधानेनपंचाक्षरपुरस्स
रं कर्पूरदीपमालाभिःमंडितंशिवमंदिरं मुक्ताकलापसंकीर्णमणिदीपविराजितं तत्रहेममयराज्ञानांसमूहाःसंतिको
टिशः तैश्चहेमांबुजैर्लिंगंसंपूजयंतिमहेश्वरं शिवंभक्षिभिःकृत्वाशिवनामजपात्मकाः नृत्यंतिहृष्टास्सर्वेपितस्मिन्शिव
गृहांगणे तथाचक्षुस्त्वमन्यचहृष्टानांनैवदृश्यते तिर्यंचस्तमपास्यामिकुर्वंतिशिवपूजनं तत्सुवर्णमृणालानांमालान्यानीय

राम:

सादरं प्रयच्छति महेशाय सापि भोज्यानि सर्वदा । तेपि भांति त्रिपुंड्रांकाः स्थूलरुद्राक्षभूषणाः । तेषामालोकनेनापि भक्ति
र्भवति शंकर । तत्रापि ये विहंगाश्च ते सर्वे शिवपूजकाः । वदंति शिवनामानि तेपि तावन्मुहुर्मुहुः । पूजांते शिवनैवेद्यं तैः सहैव हि
गृह्यते । तेपि शंकरनैवेद्यभोजिनासक्तमानसः । प्रतिग्रासं महादेव शंकरेति वदंति ते । शिवनामानुसंधानं दिरतास्तेन सर्व
दा गौरीपते महादेव शंकरामरनायक । पाहि मामिति सर्वेपि ते वदंति प्रतिक्षणं । शिवनामसुधाधाराचीतं शंकरमंदिरं । म
दर्थमेव रचितं तत्रावदति सुंदरं । मम व्रतं महेशस्य पूजनं सर्वदा खलु । व्रतांतरं न जानेहं शिवपादयोः कार्यांतरं खु
आसंगः शंगलिंगसमर्चने । विघ्नितं स्यादिति सक्तं मया कार्यांतरं खलु । अन्यच्च मे किंचिद्दिव्यलिंगावलोकनात् । भिन्नेन
स्वभ्रवार्त्तापि निद्रावार्त्तापि दूरतः । इति तद्वचनं श्रुत्वा राजदाराः परस्परं । विलोक्य विस्मयाविष्टाः कमलामूचुरादरात् ॥ ९६
राजदारा ऊचुः । कमले विमले भद्रे भद्रमेतत्त्वनंतसं । रहस्यमेकं वद मे संदेहस्तत्र तिष्ठति ॥ ९८ पतिव्रतासि सुभगे समये प
तिसेवनं । क्रियते किं न रतिः भर्त्तुर्यापि विहारिणी । इति तद्वचनं श्रुत्वा लज्जानम्राननानता । प्राह सस्मिता कमला राजसु
ंदरी । लक्ष्मीरुवाच । अखिला अपि नितांतं सुखान्यसुरवैरिणा । अंगनालिंगनादपि सम्यानतेषामिति मन्यते । अमराणां स्वभावेन
न तु कालेपि सर्वदा । नवयौवनसंपन्नाः संपन्नाः सुखसाधनैः । भर्त्ता लियामकुलेन शंकरेणापि कल्पितः । अमराणामपि पुरुषैर्वांछा
पि खलु संततं । अतो न सुरतापेक्षा परस्परमतः परं । समयो नीयते लिंगे केवलं शिवपूजया । इति तद्वचनं श्रुत्वा दत्वा भूषणमुत्त

९ अस्माकं भाग्य येन त्वं करुणाञ्जनेन मां तद्विज्ञानमस्तु नमूर्दं॥ सुखं सुरतीसमिलाने च न वैराग्यभाग्योदय संभवेनवा॥

यानुत्तमं पुनस्तामाकुरमल्लीकमलं स्मितपूर्वकं सौन्दर्यमेतच्च वतुंगभंगसेका श्रावस्था जयन्तिश्री मा। अपारणीयोपि समं
धर्मभागः सुखायकः स्यातिवराधुनाम आस्य स्वादरविंदसुंदरमिये नेत्रारविंदप्रभा वनीनीलफ विभ्रमपि अघनाधार
प्रभाय कुजे कस्मस्यादुपभोग हेतुरियमथावन्नेत्रा भार्ग्रुभई त्वासोपि नर्पुंसको हारिरपि प्रायस्तदुक्तोक्तिभिः तरुणीरम
णीमपास्य कोवा विरतस्यादनिविडभोगभुजः नपुमानिति निश्चितातत एवप्रतिभातीहविडंबनेतिनलं विनोदवातीभिरलं
१० रलं किलवृत्तेपरं तावदिदं तवापि विचारितं सम समिदं वदेति श्रुत्वा वचस्तां पुनराह पद्मा पतिव्रतानां परमः सधर्मः पतिप्रियाल
पनसाधनानां संपादनं स्यात्तदिहागतानां तन्नाम शप्तामितिनिश्चयो मे यावन्न त्वविचारतस्त्वरमितिस्तावन्नरनारी सुखं हर्षं
वांछतिमानवापि सुतरां देवस्य तत्त्वं यतः जानातीतिस्वतीसुतापिनसती संगप्रभेदं मतिं कं नु वांछतिचित्तमवनतथानारी
गतं जायेत विषयध्वतिनिस्पृहमनेनानकदापीतिनरस्पतन्कथं त्रिदशास्यन्नविश्वनीत्यपिनिदशास्तत्वविबोधलालसाः
शिवध्यानानंदप्रवणमनसामत्रविषयेन बुद्धिर्धीशपामितिखलु मलान प्रसरपि अतो नारीसंगे विरतिं भाग्येन महतां सु
रापां सातावद्गिरिश्चाचरणांभोजभजनात् प्रसादं चित्तस्थं त्रिनयनपदांभोजभजनं करोतीतिश्रांते नः इति भवतिमनो
दुष्टविषये लतः त्वर्वैः सर्वैरनुदिनमनुध्येयइतिमे सुधारूपं बुद्धिर्भवति भवतामप्यभिमना प्रसादं मन्ये हं शिवचरणपंकेरु
हमवं सुरापामैश्वर्यंतदपिनमनोवांछतियतः शिवाकांताश्रांता प्रविलतकथारूपसुधया मनस्तूर्णं न तृप्तः कमपि विषयं वांछति

राम:
३९

जनः कस्तूरिकाकर्दमलेपनेन कर्पूरपाटीररसाभिषिक्तः सिक्तामितांगाररजःप्रसारं किं वाञ्छतीति प्रतिभाति चित्रैः अयं तमोलःकरणो मम दं उमासहायांघ्रिसरोजभृंगः अतो न वांछाविषये तितुष्टेस्वभावेताः श्विकपुच्छतुल्ये अयं दूमधुरस्फुर त्किरणपादप श्रीलसन्मंदरसधारयाखलुमनः परं क्रीडति तथा च मुञ्चांकरस्मरहरामराधीश्वरप्रसाद सुमुखो मनवे स्यनुलयप्रवृत्तं मनः शिवाकरशिवापते शिवशिवेति नामामृतं पिबत्यनुदिनं मनो मम विचार एवात्र न अतः परमुमापति गेतिरितिप्रपन्नं मनः किमन्यदपि वांछतीत्यपि विचारलेशोऽपि न भाग्यस्यावधेरवने स्यपि मतिर्जाता नवदृष्टेनात्तनारीणां गिरिशार्चने यद्रतिः सास्या दूवानी खलु नारीरूपमुपेत्यांकरपरांभोजार्चनासारा सा गौरीति विनिश्चयो मम समुत्पन्नः शिवाराधनात् ॥ ५१ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये उत्तरखंडे याज्ञवल्क्यजनकसंवादे नाम सप्त विंशोऽध्यायः २७ श्रीसांबशिवार्पणमस्तु इत्युक्तं कमलावचः शिवरतां श्रीष्टप्रदं सादरं श्रुत्वा तामभिनंद्य सुंदरतर शारंप्रकल्यादरात् तत्कंठकलकंठकंठलनिरदानंदप्रदानोद्यतेतद्वीणामधुरध्वनिश्रवणजानंदेनपूर्णास्तिदा सा सप्तस्वर सल्लिबद्धमधुरैर्गानैः स्ववीणाद्रवैः शोभाशोभवसांबशंकरमहादेवेति शब्दान्वितैः श्रुत्वा शंकरमंदिरं प्रति रवापूर्वोन्नतूर्णोन्नृप पूर्णानंदमसुं चकार किमिति प्रम्योगरिम्यातदा २ तद्गानश्रवणादरेवा सधराधीशोऽपि नीतामुडुः कारुः कालभयापहार चतुरो धीरो तिहारः परं तत्किं किंनरसुंदरीरुचिकरंगानं किमन्यामरीगंधर्वाधिपसुंदरीरुचिकरं गानं किमित्याहसः ततः परं तत्र

तिहारनारीविचार्यतद्धारसमूहमध्ये निश्चित्सतावत्कमलाविलासगानंययौभूपतिसंन्निधानं प्रतिहारनाम्न्युवाच स्वामिन्प्र
वेभवाजितामितमहापुण्यप्रभावैरुमाकांताराधनतत्पराहरिसतीसायंसमभ्यागता कृत्वार्हंकरपूजनंपुनरियंगानप्रियंस
लियं तगौरीप्रियमादराद्धिवपैः वपौः परंगायति तज्ज्ञानैरमरीगणोपि विनम्रास्त्रिंग्रापितत्वंमुहुः प्राणापारशिवासिधान
निनदैः दाराश्चतेतत्पराः आहाराद्विरताः कदापिनतथा तज्ज्ञानधाराधराश्चिंनोपाम पिचित्रतामुपगतास्तत्कौतुकेकेवलं श्रु
लातुगानंमङ्गलायकानां दाराश्चशार्दूलवरांगनाश्च नयांति तावद्धि दिनं सबालेमपीकुलं तिष्ठतिगानलोलं झंकारैर्विरताश्च
रंतिपरितोभृंगांगनानांगणाः तज्ज्ञानश्रवणात्तथापरभृतंनारीगणाः लिष्यति अस्मन्मत्तमरालराजवनितापरूपति तामादरा
तुत ज्ञानश्रवणातिलज्जितमनोवृत्त्यानिवृत्ताःस्वराः सासप्तस्वरबंधमेवकुरुते नोमेरामेकैकमपयस्यानंदसमन्वितास्फुटतरं रामः
तच्छ्रूयतेशोभनं नामातःपरमिंदिरापिरसविरंगानंविहायापिसागीतंनेच्छतिशांकरानतिमुहुर्दीरान्नेतपश्यति इत्याकर्ण्यवचः
सपतिरपिप्राहप्रहृष्टवचः तत्प्रस हलिनारायणं समयोनेयः शिवाराधनैः इत्येवंस्थिरतांगतो हरिरपिस्वच्छस्तदाकर्णनैः आ
नेदांबुधिवर्धके स्त्रहितेरपानंदधारावृताः १० एवंतत्कमलाकृतामितमहावीणाप्रभृतंपरंगानंशंकरनामचिन्हितमतिप्राप्य
सभूपवन्नृपः संतुष्टोविरतोनत छ्रवणात कालोपिनीतस्ततोमध्याह्नेशिवपूजनोद्यतमतिश्चक्रे शिवाराधनं ततःपरसभूपालो
दापयामासभूषणं विविधैरत्नसंकीर्णं कमलायैमनोहरं ततस्तं प्रेषयामासनारायणाभिलापतिः कमलासहितेसोपिच

२ सदाशैवकुमारेश्वरे मे सुंदरमंदिरे ॥ एतादृशस्य भूपस्य स्मरणेनापि सिध्यति ॥ सिध्यंति शंभवः श्रेष्ठः सभूपा
कः शुभावहः

यौवैकुंठमंदिरं ततः परं स भूपालः सायंकालेपि शंकरं पूजयित्वा विधानेन ययौ स्वनगरं प्रति ततो नक्तं महादेवं नैवेद्यमुप
भुज्य सः तस्मिन्शास्ति तद्राष्ट्रे शिवविद्यामृताश्रयः प्रवृद्धा एव सर्वत्र येमुक्तिः सुलभा भवेत् अत्रैवोदाहरंतीममितिहा
सं पुरातनं तस्य श्रवणमात्रेण जायते गतकल्मषः तद्राष्ट्रे कोपि विपिने संचरन् लिंगमुत्तमं ददर्श स सरस्तीरे चैकं तस्यैव पू
जनं सपुष्पहेमपद्माद्यैः नवबिल्वीदलैरपि तत्रासायमुषित्वापि कुर्वन्नेव शिवार्चनं ददर्श कालमुन्मत्तमभयं तस्मान्निर्वृतं ना
गपाशांकुशधरं ज्वालादिसमलंकृतं २० ततः स तावद्भीतापि तं दृष्ट्वा कालमद्भुतं तन्निवारकमत्रास्ति किं मिस्यति भयातुरः दू
रात् दृष्ट्वापि तं कालं कंपमानातिभीषणं तस्माच्चा नक्लेशवापि तद्दूरानपि कोटिशः किं कर्तव्यं न गंतव्यं गमनेपि बलं न मे अके
स्मादागतः कालः क्रूरदृष्ट्या स पश्यति शिवलिंगाराधनेन पापनाशो भविष्यति इत्याशाम्भूयसीनासीत्किमिदं सवाति विस्मिता
जीवितापि समयाद्दृष्टः कालोयमतिभीषणः मरणांतरं किं वा भविष्यति भयं मुहुः भवार्चनेन भयं कालाज्जायते यदि जातु तत् अस
त्यं भवेत् सत्यं किमित्यपि न मे मतिः कालांतकाराधनेपि कालभीतिर्भवेद्यदि तदा तद्धीजनाशस्यात्केन वा तान्न विद्यहे महाम
पद्यभयदेशे यमोयदि तदा कथं अन्येषां जीवनं वा स्यादपराधोपि कः परः लिंगार्चनरतस्यापि विपिने सायमीदृशो यदि काल
स्त्वद्भीतिः तदा श्रुतिकथाकुतः श्रुतयः शिवपूजालीलं स्वयं न जनिर्वा भवतीति संततं प्रवदंति वदंति तत्कथं मुनयोपीति विनिश्चय
मम हे कालांतक हे महेश्वर महादेवावमां दुर्दशामेनां संहरस्व हराशु विविधां कंपायमानस्य मे पश्यांगे परिपश्य गद्गदगिरा नस्तो

स्नातुमिच्छामि मे गौरीकांतपदारविंदभजनध्यानपिपासमन्मनः २० भोः शंभो करुणाकटाक्षमपि तव स्याद्दृग्विधेयाधुनामृत्युकः सं
त्रिहितो तिभीषणवपुः काकोदरान्विक्षिपन् आयात्यागत एव तेन करुणा किं मे न विश्वस्य ते पादांभोरुहमर्चितं सरसिजे भीतः
प्रभो तिं कुरु अद्यस्यान्मदपेक्षितं तदखिलं प्राप्तं शिवाराधनात्तावद्गौरि शार्वनामस्मरणं जातं कुमारोऽपि वीरोऽत्र जरा क
पोलमखिलं मा ग्लाधुना संवयः कायः कल्पित एव पक्वकदलीतुल्यो महेशायते विद्याराशिरपाररत्नजलधिप्रायः शिवार्पि
तत्प्रसादात्कुरु हे मनोऽपि निहितं सर्वस्वमेतन्मम आज्ञास्य च न किं वदेद्दुष्टाकलाकलंकारपादांबुजध्यानानंदरसान्वितस्त्वमलं
संसारवार्त्तारसैः मुक्तं तावदतः परं मम शिवध्यानं शिवाराधनं भस्मोद्धूलनमादरेण सततं रुद्राक्षसंधारणं लिंगे बिल्वदलार्प
णं शिवपुरे पंचाक्षरावर्तनं हारापारकथासुधानिधिमहाकल्लोलमालो ध्रुवः मूको वाक्पतितामुपैति जनितः पंगुः गिरेर्लंघनं
तावत्किं न करोति किं न धरणीनाथत्वमभ्यातुरः मूर्खं वा परिचारकं धनपतिर्वैरीश्वराराधनात्तत्सामर्थ्यमिवाक्यमेव गदितुं वेदांत
वृंदैरपि किं चिंतामणिकोटिभिः सुरतरुः श्रेष्ठैः रथैः स्वर्गसुरापारास्फटिकमगो वा कुलैर्निधिवरैर्नीरेश्वराराधनैः सर्वाभीष्टफलोदये
सति सत्तां स्वांतनसंवर्त्तते तज्जिह्वे पुनरीच्चकादिसदृशो धात्रापि सर्वात्मना नष्टं तात कृतांतभजया यदि नेयः समयो मया तदा नि
यमेन विनैव माययापि समयो मे नियमं करिष्यति ३८ न योगयागव्रतदानसाधनं न साधनानामधुनास्ति हर्षः परंतु कालः खलु का
लकालं लिंगार्चने नैव नयामि कालं रेवातीरनिगूढनीरजरजःपुंजप्रभामंडले नीलनीलमहोत्पलामलदलानीलं शिलामंडले

रामः
२८७

दत्वाबिल्वदलंसशीतरुदलंभस्मंस्वाखंडुलोबालोपिसबलोभवत्यविकलस्यात्कालकालप्रियः रेवतिारनरश्रेरोहरस्येवैः
दूर्वांकुररादराद्वीरोदारविहारदोररुचिरव्यापारहारान्वरं सन्न्यासायमिहादरेपाशुरूपाद्गांगेनलिंगंकथंनिर्धूतमयमर्चिते
सद्रूदंपध्यातंविभस्यासितं श्रीवीरेश्वरलिंगपजंकपदांभोजार्चितयद्रजस्तल्लाथामरवाहिनीजगदिदंतावल्लुनातिस्वयं ए
तावन्महिमा शिवार्चनरतःस्यातः कथंवायमःसोयंमेभयदोभवत्यवत्सरप्राप्तपिमृत्योःपरं यत्संपन्नगरमनोहरवरंहारंलद
स्कन्नंतप्राकारसवरालिरोहणामपिव्याकीर्णानिश्रेणिका तद्वारागेलकुंचितातदनघश्रीकामिनीनीविकाचोलीछेदनसाधनं
चवद्रुधाश्रीकालकालार्चनं मरुःकस्यातवन्हिप्रतिहतशिखराभसमभूतोस्तभवापातालंयातुयातुत्रिदशनगरमथतत्ताम
स्मतोकिं कालोयायातुमृत्योरहमिहनमहादेवभिन्नप्रपन्नंसंपन्नंमेमनोपित्रिनयनचरणाराधनेनप्रसन्नं कोयंकालोपिरे
कःकथमपिमरणातूर्णमभ्यर्णकान्तिमायात्रूपोपिवामेमरणमपिनमेकालकालार्चकस्य यस्यांकेसाभवानीत्रिभुवनजननी
तस्याराधकानांशंकोतकविहीनस्फुरद्गुरुमनसांकालभीतिःकुतोवा कालश्चेसागतोयंप्रतिहतगतिरप्यस्तकयस्तत्रिनेत्रध्या
नारूढोनिरूढःपरहितकरणासक्तचित्तंतमेकं हित्वान्यत्रैवयास्यत्यसमंमपिचतुरःकालकालाद्विभीतोभूतिस्मृत्वापिभीतःभवति
भवतिवाभ्रांतिचित्तोपिमत्तः अस्माकंपरमंतकांतकपदांभोजार्चनाराधनैर्दैन्यंतावदपाकृतंगतमिदंकालाद्भयंनिर्भयाः लोकेशांभ
वएवकेवलमतःकालाद्विभेतीतिधीर्धीराणांकथमित्यतःकथमितोभीतिर्भविन्नीसमं हेकालांतकशंकरामरवरापारामराराधि

नः स्वामिन्कालमपाकुरु भद्रम(प)घर्ष्येतु यांतु स्वकं घोरं मे दूरमेव वैरं वयं कः शांकरा यां भवंदातु वा यत्न तेन कृतीकृतमनेनापि
ह्यपायं खलु श्रीकालकाल यदि तेरवलु कालनाशो नात्तिस्तदाजनिजरामरणादि नाशः शक्तिः कथं वद वसति विलोदवार्ता
मार्त्तायकीर्त्तिरपि तिकथमिंदुमौले प्राणप्रयाणसमयेपरमिंदुमौलिपादारविंदमकरंदरसाभिषेकः मञ्जिन्नभृंगवरमूर्त्तिभव
त्विति अग्र संप्रार्थितोसि मुहुरीशानविस्मितोसि अद्यापि चेदिह दयानतविंदुमौले जोलायितं मम धुमनः कथमद्यनस्य किंतस्पदा
रणामन्त्राकामुतातित्रासं नत्रार्व स्पतावदितित्रोलसुतासहाय ५१ कालंधरं वदसकल्पमहं स्मरामि गौरीमनोहरमदाकुरजन्मसा
दात् एतन्निवारणामशक्यमिहास्ति किं मे त्वं न कथं नमनुनामनसाम्मतेन अद्यांतकांतकभयं यमवारणेनतावन्निवारय निवार
णे यनचिन्नं स्वस्थं त्वरविकमलामलपंजनादो तद्धि ध्रुवारयामवश्यमपेक्षितं मे प्राणप्रयाणसमयेपि न लिंगपजास्यगोमतो
न भवतीति विधिर्म्भुतापि किं तेनतावदधुना त्वदनुष्ठितेन हाहं हतं हत विधिरेव हतः कथंवा त्वत्पादपद्ममपि पंजरपिंजरं मे चित्तं
भवतु निशमिंदुकलावतंसं मन्मानसं परमहंसकुलावतंसममलामवञ्चरणवासमिहप्रयच्छ सोयं यमो यदि शरीरमिदं विनेतु
मायाति तर्हि भयमस्य न मे मनश्चेत् त्वत्पादपद्मनिहितं धनमस्य दीयं न तु न तस्य खलु शांकिरुमासहाय धनं तावल्लोके मरण
समयेपि प्रियतमं न हांतुवां चुस्पादितिखलु मे वज्ञापनमपि पुनः अस्यात्रायामिति मम मनो रूपधनमप्युमाकांतेदत्तं भवतिस
तत रक्षितमपि अस्यात्रायदि जीवन्नेतनयमप्रायः अशांतातदा तावन्मामुपयाहि निर्दयमसुं मृस्केजयंपद्मं मे त्रातायंभयतः पि

तापिसपुनः दाता पितुलेः प्रभोसामर्थ्यंकथमद्यविस्मृतमहो मोहस्तवायंकुतः तंमोहंपरिहायसायमसङ्कमत्कंजयेपश्यमां
अव्यग्रंकथमुग्रलिंगनिकरेपर्ययमस्यारने उग्रानुग्रहभाजनमयिकथंभीतिर्यमास्त्याद्दहो हाहंतातिविमोहितोसियमेतर्भा
तवचिंतनखलु हारेषु प्रवर्ततेतिभीतस्ततेकोर्तिः वृत्तांतस्यवासांताविद्दुगतविनाशसमयः प्रायस्तवायंयम प्रायःकस्यकृतां
तभीतिरधुनाकांर्त्तातवार्त्तापिकाकः कोलोपिनकालकालभजनासक्तंनजानासिमां इतितद्वचनंश्रुत्वायमःप्राहतंमास्ति
के भयंमाकुरुमत्तस्तेनभयंजातुजायते धैर्यंविचार्यतेतावद्गौरीशाराधकस्यते वरंवृणुप्रयच्छामियद्यपेक्षितमास्तिक १२
आस्तिकः महादेवप्रतर्पितिवितनभाग्यसतिहितसतोस्मितेभ्रतेकिमितिवरयेहंवरमपि वरंदातुंशक्तोनजगतितथाविष्णु
तदितिलयाज्ञातानातःपरमितिवरंनैववरये त्रिदशेशमहेशपादपद्मप्रवणांतःकरणस्यदुर्लभंकिं वरदेषुवरोहरःपरो
मवरदस्तेतवेकनिनिश्चितंवा यद्यस्यास्तमपेक्षितंतदरिवलंप्राप्तस्त्वमेवाधुनागौरीकांतपदारविंदभजनाद्द्द्यत्त्वयाकिंमम
किंतेतिष्ठतिनिष्ठुरंतवमनः कष्टप्रदानायते स्वस्त्वसापियतोभवस्यतिभयंत्वत्तःपरंनिर्दयं लिंगाराधनविघ्नएवजनितःता
वत्त्वयातनतेप्रायस्यादपिश्वासंनखलुखलश्रीकालकालार्चकः तस्मान्नोतिमुपैतिकालविलयंकर्तुंसमर्थोप्ययंकःकालो
तकपूजनेनकलयेकालान्मृर्यंनिर्भयः नजानासितत्वंशिवाचारनिष्ठप्रभावंचकालाधुनाकालकालः हितप्रायएवेतिते
दुर्मतिस्यात्ससंहारकः कोपिकालाग्निरूपः महादेवपादारविंदेमनोमप्रविष्टंप्रतिष्ठंविनष्टाघसंघ वदत्सेवतेनिष्ठुरंत्वंमे

ततस्ततः कष्टमेवाप्यते भाविकाले नरिक्तं मनो मे विरक्तं न गौरीसहायांघ्रिपंकेरुहाराधनेषु समस्तार्थदानप्रवीणेषु
तेषु मे हे शंभसोऽहं सुशक्ति प्रवृत्तः नास्माकं भयमिंदुशेखरपदांभोजार्चनात्सादरात्संसारादपि कालतोऽपि न महापा
पौघतो वाप्यम पापं न क्रियते कृतेऽपि न भयं पापांकुराशिक्ष पात्स्नात्शयास्यति शंकरस्मरणतस्त्वत्तो भयं दूरतः दृष्ट्वा हारप
दांबुजांचलरजोलेशप्रभृतान्निलं पापाद्धिमशर्मंप्रयाति सहसा लोकस्य सर्वस्य च। नार्द्य मामुपयाति तत्कथमपि प्राप्यस्त्वद
स्यागतं नाशयाति पतंगवत्खलु महोद्वानेकः पावकः पापेभ्यो न भयं पशायमतदात्वत्तोऽपि भीतिः कुतः किं देयं तव वर्त्तते
सज्ज महावाचालतां संत्यज वाचालत्वमुमासहाय भजनासत्केषु सूक्तं कथं शक्तिः शांभवपुंगवस्य सहसा ह्यातापि नैव त्वया
८१ धाष्टर्येनागतमत्र भीतिरधुना संपादिता कापि सा तु त्वं दासविभीतिमेव सहसा सान्द्रामपेष्यति उन्नेयनद्गायेत खलु
खलैः खलाः समाराधिताः स्यालीनामुदयाय किं शिवकुलद्वेहास्करं जायते यद्यद्याविधिशांकरेषु विनयः तेतर्हि सर्वात्मना
कः कालांतकतोऽपि भीतिरिति ते चित्तं परं तिष्ठतु अस्माकं तु भयं न शंकितमयि त्वत्तः शिवाराधनेनिर्लेपस्याछिन्नेम वेतनन भयं स्व
प्नेऽपि संभवितुं अत्रोभवं जनालयं प्रविशति स्त्रावस्था सदातद्भुतभयप्रदस्त्वमसि तत्र तत्कष्टतः नदीयं गृहसंगमस्तु
न न भीतिरपास्यतः यथेष्टगतिरस्कते शिवपराङ्मुखानां गृहे अस्मिन्पावनपावनेयम वने सिंहाश्वः सर्वदा सत्कोऽवेरसु
दारगोकुलसुतास्तिष्ठंति ते शांभवाः तान्वापश्यविशिष्य शांतमनसा शांतानरूपेपातदृष्टाः कष्टविना शाकाअपि भवंत्येवाति

रामः
२८३

शांतोभव त्वंनो भीतिकथापि मे नश्यतीत्येवावधार्यो हरः धैर्यपात्रं शिवार्चनार्थमधुना तावत्सर्वस्थीयते सार्थं पूजयन् शं
करं तव कथं भीतिर्नि शंभोगाद्देवत शंभोराराधनसाधनेनमनसा शंभुं परं संस्मर इतितद्वचनामृतं सकालः परमानंदमिसंभृत
पूर्वं अवधार्य ययौनतोतिमनसो तमभीतवचनैः प्रसाधभ्यः ततःपरं विष्णुरवोपदेशं तमेवतावद्गरुडध्वजः सन् पीतांबरा
लंकृतमूर्तिरिष्टदांतुतदीयंकमलासमेतः सहस्रांतविलोकेनबिल्वैरवनतानन‍ः लिंगार्चनपरोजातःशिवध्यानपुरस्सरं सा
यंकालीनमौनेनपूजयंतमहेश्वरं दृष्ट्वाविष्णुर्हरतापिशिवपूजारतोभवत् विष्णुंशिवाराधनसाधनानि संपाद्य लिंगार्चन
सादरोभवत् ततःसमाप्यशुशिवार्चनंचसत्वं विष्णुस्तमुवाचगत्वा ९१ विष्णुरुवाच आस्तिकास्ति वरोसि त्वं तेदातु
मिच्छतिमनोवृणुमेत कितवस्तितमहेशप्रसादध्यानपूतहृदयोसिवराह आस्तिकउवाच वेदैर्वेदान्यात्तमसीशंभेकसत्वामहा
देवमुमाश्रितोहं सत्वमेसर्ववरप्रदाताहातावराणांवरदोत्तमश्च यंयंवांछतिशंभवःप्रतिदिनं तंतंप्रयच्छस्फुमा कांतःसंततमं
तकांतकमुमा इतिख्यातोयत्तवश्रुतो तस्मिन्नेववरदोत्तमसतिमनोदैन्यं नजानाम्यतः किंवाद्युष्लमस्ति शंकरपदध्यानेनतन्मे
मनः योसौताळगतोतवापि कमलाकांतामराधीश्वरोगौरीचारुपयोधराधरमहाहारावलीलीलया लोकानूपालयतिस्वभा
वविभवःतेद्भुमवस्यावधिर्नोस्त्येवेतिसत्वमेवरदइत्येतन्नमन्यामहे स्वप्रेवागिरिजामनोहरपदांभोजार्चनान्मिमनोनैवासी
द्विरतंनचान्यभजनासक्तंमनस्तंचन तेनेवसितसिद्धिरिस्यापिमतिरेहिंप्रयासेवमेदैन्यारातिरुमाणतिःशरणमित्यन्यन्नमन्याम

हे यद्दौवारिकदंडमंडलकृताघातातिभीतोभवान् आद्योदेव चतुर्मुखोपि सत्राण्वीनाथोपिते केवले यत्नेयाचककल्पभूरुह
महेमोह विहायाधुनामोहध्वांतविनाशके सति शिवत्वन्नैनमन्यामहे अस्माकं गिरिजामनोहरहरापासदरासादरे स्वांतेशांतत
मेनिरंतरमुमाकांताङ्कुरेक्षसति अन्यस्मात्किमपेक्षितेकिमपिवान्नूनंजगन्मंडले पीयूषांशुकलावतंसभजनादन्यंनमन्यामहे
मृत्वाजन्मजराभिघातनिहताः सर्वान्यसंसेवनात्तंतमेमनस्त्वतावदधुनातेभ्योनिवृत्तंततः भूयस्त्वसदेसेवनं नकुरुतेतु छलत्वु
ध्यापरंतान्नूसन्ध्याशिवपूजकंपरमताप्यन्यंनमन्यामहे मृत्युर्यस्यजरापि जन्मजनितं दुःखंनयस्याभवत् तन्मत्संजयमकोमवशा
रपांम्राक्षाःसदासादरं तस्मिन्नेवबद्धाम्बनायकवरेगौरीविहारपरे चित्तंक्रीडतितेनसोहिरभितोप्यन्यन्नमन्यामहे यावत्क्रांति
रभत्युरातिविषमातावत्त्वदाराधनेप्यासक्तं त्वयिजन्ममृत्युवशागेहातेनिवृत्तंमनः कोवाजन्मजराविहीनइतितच्चिंतनंविचार्या
धुनाश्रीमृत्युंजयचिंतनेनिरतमित्यन्नैनमन्यामहे कोवारत्नविशेषरत्नविलसत्पात्रस्थदुग्धंशिवेदत्तंशर्करयासमेतमनघेना
ज्ञेनयुक्तंपरं सत्काक्षारजलंपिबत्यनुदिनंतस्माद्धिवान्मःसुरानोपास्योपिनेतनवाफलंमतोप्यन्यन्नमन्यामहे कोवामेरुशा
रासनंत्रिनयनंगौरीविहारादरप्याख्यानंजयवाप्रसाधनधनंकैलाससिंहासनं सत्काव्यामरसेवनापयतलेभीतोयथाभीतिरं
भाभोस्वबविमोहितःप्रहातिताप्यन्यन्नमन्यामहे ३ कः प्राप्यासिसुधाब्धितीरमसकृद्धीरःपिपासातुरः तत्क्षीरंपरिहायदुर्मतिसु
तःक्षाराम्बुराशिंव्रजेत् तस्मादुवविहारवामपि सुरमर्त्येभीशालपालपांमनःसत्कान्यंनामभजस्यपिस्वपमताप्यन्यन्नमन्यामहे किंकश्चा

न्यपि विस्मृतानि भवता विश्वेश्वराराधनत्यागात् सायमियं गतेयं कमलासिंधुं ततः पीडया तन्निर्मथनकालकूटकलितज्वा
लाकुलः तृष्णार्तः प्राप्तोसि स्मरतत्सरः स्मृतमतोधन्यं न मन्यामहे व्याघ्रोरविपिने वराहवपुषां लक्ष्मीविहीनस्तदा तत्ऽन्नाशन
जीवनः शिवपदांभोजार्चनानादरात् तत्किं विस्मृतमेव तत्स्मर पुनः तेनापि लज्ञानकिं तेतावहुदतेन तावदधुनात्वन्यं न मन्या
महे स्वत्वं वस्तुशुभतलेपि विदितं विश्वेश्वरस्येसतः सर्वं तस्य स एव तावद्दसहं हृतावहान्योत्तमः तस्माद्देवसमस्तवस्तूनि च
यः प्राप्तस्तदन्यस्य किं सत्वं वस्तु शुकेषुणा स पिमितरन्यन्त्वमन्यामहे भक्ताभीप्सितवस्तुजातमसकृद्दत्वा पुनर्वाञ्छितं भक्तस्या
स्ति किंचिदस्तु नुक्षपासुमाकांतेविचार्यादरात् दातृत्वं यसेननदातुमभितो वाञ्छत्यपूर्वं फलं लिंगाराधनतत्परायसततो धन्यन्न
मन्यामहे वांछायत्र न सर्वथा न विदितं नापि श्रुतं सर्वथा तद्दातुं शिवपूजकाय यततेमृत्युंजयः सर्वथा तद्देवोत्तममप्रयासफल
दं सत्कातरं नाम नः गंतुं वाञ्छति तुच्छमित्यपि कदा धन्यं त्वमन्यामहे मातर्वाश्रुहरिरेणपारतो लिंगार्चकानां सदा विघ्नेशः स
पितापितेव विहितं भक्तो नियुक्तः पुनः स्नेहांभोनिधिमालयापरिवृतं भक्तं करोत्येवतं सत्कातावहुमासहायमधुना त्वन्यं न मन्या
महे अस्मत्पूर्वजपूर्वजार्जितमहापुण्याम्बुराशेः फलं सद्वृत्तं फलमित्यवैमि वहुधा यस्मादुमावल्लभः अस्माकं कुलदैवतं परांहि
तं कर्तुं समर्थः सदा तस्माद्देवहितार्थलाभकलनादन्यं त्वमन्यामहे ॥ धन्यानां शिव एव दैवतमिति ज्ञाते शिवप्रार्थनं धन्या एव परं
विहाय सकलं संसाररूपं मलं निःसंनिमेलचेतसाप्यविकलं कुर्वन्ति दाराः परं हारा एव हरा स्मरतरं त्वन्यं न मन्यामहे ॥१२॥ संप्रा

प्राप्यापि शिवार्चनेन सकलं सर्वं शिवाराधनोपायं प्राप्य इति प्रभूतविभवाः कुर्वंति शंभोर्चनं तस्मादप्रमितं फलं पुनरमाको
तादृशं प्राप्ततः शंभोरेव शिवं प्रयांति तितमन्नाप्यन्वेनमन्यामहे १३ यद्विल्वदलमप्युमापतिरति प्रीत्या सार्य होतारं नैच्छिन्नं वा
शाठितं चनोरससमपि श्रेयस्करं केवलं मत्वा सर्वधनाधिनाथ विनतं दीनं करोसादरात् अंते मुक्तिमपि प्रयच्छतीति तत्ताप्यन्नेनम
न्यामहे श्रीकंठाद्रिगिरिराजराजतनयामेरुस्फुरद्गुरराधारश्रीपरिहारदक्षविलसद्दृष्टोजवक्षस्थलात् इंद्रादिप्रतिपक्षदक्ष
दृक्ना सालानलाक्षात्मरं स्वप्नेवा मरणेपि वा स्वकरणे रत्यन्नमन्यामहे इतितद्वचनं श्रुत्वा विस्मितः कमलापतिः धन्योसीति
तमुक्त्वैव प्रणतस्सन् कृतांजलिः ततः प्राह महाविष्णुरुपविश्य हरेः परं त्रिविलोकमरूपोपप्रणकराक्षैरुपलक्षितः विष्णुरुवाच
सर्वामराधीश्वरविश्वनाथपादारविंदे तव भक्तिरेव अनेकजन्मार्जितपुण्यसंघैः जाताप्रवृद्धाय पुनः पुलस्त्या अहोमहद्भाग्य
ममत्वेवं यतः शिवाराधनसत्कमेव मनस्त्वदालंद ह्यपि स्वेवमितैनैव तावत्स्वरमापि मुक्तिः नक्कापि दृष्टा दृढभक्तिरेव मुक्तिप्रपा
साधनमेव नूनं पुण्येन केनेयमभूत्तवेयं उमासहायांघ्रिसरोजमात्रे २० चित्तं पवित्रं तव गात्रमेतत् सविस्तमेवेतिमतिर्ममासीत्
धन्यस्त्वदन्यो भुवि कोपि मान्यस्तामान्यतस्त्वं मनुजोननूनं त्वमेव नंदी किमुत प्रचंडः स्कंदोसि भृंगी किमु वीरभद्रः किं भैरवो वाथ
षडाननो वा गजाननो वा वद तन्ममाद्य आश्चर्यभक्तिरेवं सकलसुरगणाधीश्वरेशं करेमे निसालंद प्रदानव्रतनिरतसदाचार
धीरेतिशेरे गौरीवक्षोजहारप्रतिभरचटुलोहंदेर्दंडभारप्राधारासारसार प्रसरदुरुतरोरुः सुराधीश्वरोरे दुस्तारापारपापप्र

रामः
२८५

वरगिरिदृशीद्दूरगाढांधकारव्यापारारोपकोपप्रतिभटनिटिलालोलकालानलश्रीः स्मृतावारूढापिपापप्रदहनशमनेनोपाय
एवेतिधन्ये धन्याद्यास्यात्किमेषानभवतिम हृतांसापिसंभावितापि यद्भाग्यापारपारव्यतिकररुचिरस्फारगौरीकुचारव्यापारो
दारहारप्रसरदुरुतरासारकाश्मीरधारा स्मृत्वास्मृत्वानुभूयाध्यनवरतहितस्वांतसंतानकांतेगौरीकांतेनितांते कथमपिस
ततस्वांतमप्याश्रितंमे वारंवारंस्मरारेत्रिपुरहरहरापारसंसारघोरव्यापारासारभीरुस्फुरदुरुवदिरांगारदावापसारं याचेया
चेपुलस्त्वपुनरपिचपुनः तनयाचिनयाचेत्वसादांभोजरेणुप्रकरपरिवृतस्वांतशांताद्विरेफः त्वद्दर्शनंजातमिहाधुनामेप्रदोषका
लेहृतपापजाले श्रीकालकालाचिवेत्दर्शनेनसंपत्समृद्धिश्चभविष्यतीह अयंपुण्यकालःशिवाराधनस्यस्वभावेनसर्वोपिका
लस्तथापि विशेषाधुनाशंकराराधनेनप्रसन्नोभवत्सेवगौरीसहायः महादेवविद्याप्रभावोपिभाग्यैःअपारःकथंचिन्मयाहा
तएव त्वयासाकमत्रापिसंभाषणेनप्रभृतंचपुण्यंत्वयालब्धमेव महादेवविद्याविशेषाश्रयाणांयमावासवार्त्तापिदूरेतथा
नयाविद्ययासर्वसंपत्समृद्धिःभवत्सेवमुक्तिश्चतस्याःप्रभावात् महादेवविद्याविनाशंकराचोकथंवाफलायप्रवृत्तायमोसा फ
लान्यात्रुसतेफलप्राप्तिहेतुर्वदंत्येवतामेवसंतःप्रशांताः नवेदांतविद्यापिमोक्षप्रदानेसमर्थायआशावेविद्यासमर्था तयाविद्य
यातावदत्मूलरूपस्त्वमेवंस्फुरन्मानुरूपोविभासि ३२ त्वमत्रातिधन्यःशिवाराधनेनप्रसन्नःप्रसन्नेमनस्त्वंकरोषि त्वदीयंकुलंध
न्यमेवेतिमन्येशिवाराधनासक्तचित्तोतिधन्यः महादेवएवाहमित्येवतावत्स्वभावोस्ति यद्वामहादेवभक्तः भवामीतिभक्तिर्भवेत्त्व

यंवैनवेदोपिसवेदमत्र वेदानवानो न्यमि दूरमोस्ता ॥उमासहाय प्रणतोनकोवामुक्तिंसमाप्नोतिसुखावसाने ॥ यत्पादपंक
रुहध्यंगभावंप्रभानसंतो जानितंमहेशं ॥उमासहायं० वसाने ॥६

घमत्यंप्रसंन्नोमहेशोयदिस्वसपुण्यैः महादेवपादांबुजाराधनादौनभक्तिर्महापापसंघातुशृंगे नतन्नाशहेतुःशिवाराध
नान्यस्ततस्तेनतन्नाशसिद्धिर्भविष्त्री महादेवपादांबुसामर्थ्यमन्योनविज्ञातमेवेतिमन्येकिमन्यैः शिवाराधनेनैवमुक्तिर्य
तःस्यात ततस्तंमहादेवमेकंभजामि ३१ नसंसारदुःखापहर्त्तापिलोकेशिवान्यस्तदन्यंनजानेनजाने नजानेशिवान्यंन
जानेशिवान्यंनजानेशिवान्यंसुखावाप्तिहेतुं इत्युक्तवेतंतदिष्णुंअभिनंद्यास्तिकोत्तमः शिवपूजारतोजातोविष्णुस्वनिलयं
ययौ एवंशिवाराधनतत्पराणांधैर्यत्वधैर्येनकदापितेषां नेदंभवार्त्तापिनदुःखवार्तासंसारवार्त्तास्त्वतिदूरतःस्यात् यदेवदे
वेसवंदानमंतःसंप्राप्नुवंतःसकलार्थसिद्धिं नशंकरंकःप्रणतोनलोकेमुक्तिंसमाप्नोतिसुखावसाने यंयोगमार्गेकृतापि
योगीनपश्यतिश्रीगिरिजासहायं उमासहायंप्रणतोनकोवामुक्तिंसमाप्नोतिसुखावसाने यंयोगमार्गेकृतोपियोगीनप
श्यतिश्रीगिरिजासहायं उमासहायंप्रणतोनकोवामुक्तिंसमाप्नोतिसुखावसाने॥ सिद्धाःप्रसिद्धाअपियोगसिध्यायंवै
नजानंतितमीशमीड्यं उमासहायंप्रणतोनकोवामुक्तिंसमाप्नोतिसुखावसाने यस्यांघ्रिकाराधनसक्तचित्तःकरोतिवांछांवि
षयेषुतर्हि उमासहायंप्रणतोनकोवामुक्तिंसमाप्नोतिसुखावसाने यन्नामसंकीर्तनपूतजिह्वाःस्मरंतिसंसारसुखंनतंवै
उमासहायंप्रणतोनकोवामुक्तिंसमाप्नोतिसुखावसाने त्रिभुवनानामामृतपानधीराःकेचिद्देवत्वेनभवेपिधन्याः तेषांपदांभो
जरजःप्रसादंवांछांकरोस्येवमनोममापि यमभटगणवार्त्तामंतकस्यापिवार्त्तामुरुतरसुखदुःखापारसंसारवार्त्ता विषयविष

मवार्त्तानश्रुणोसेवहारोहरचरणसरोजध्यानधारानुरक्तः १२८ इतिश्रीस्कांदेमहापुराणेहिमवत्खंडेशिवरहस्ये
तृतीयांशउत्तरखंडेयाज्ञवल्क्यजनकसंवादेनामाष्टविंशोध्यायः २८ याज्ञवल्क्यः तस्मान्नमुक्तिःशिवविद्य
याविनानानंदसिद्धिश्चभवसतोस्याः तयाविनामुक्तिकथापिदूरेकिंमर्द्धितायाःइतिमेविभाति १ इत्युक्त्वासोपिमहीपालः
सत्यज्ञानपरायणः परलोककथंतस्यास्यास्विपिचिरंस्थितः ततःपरंददर्शाग्रेतेजोमूर्त्तिविलोकयतो किमित्याश्चर्यसं
पन्नोविस्मितःसमभूत्तदा ३ ततःपरंतत्रसनातनोपिसनंदनोपिस्मरवैरिवार्त्तां कुर्वन्समभ्यागतएवदृष्ट्वातंप्राहराजावि
नयननम्रः ४ सत्यव्रतः सनंदनापूर्वमिदंप्रपश्यज्योतिःकदाचिन्नविलोकितंच नवाद्भुतंकिंतदिदंवदाशुलोकस्यत
त्वंविदितंत्वयातु सनंदनः श्रीपंचाक्षरविद्ययास्थिरमतिर्नित्यंशिवाराधकोभस्मोद्धूलितविग्रहःश्रुतिलसद्रुद्राक्षत्रिपुं
ड्रांकितः तस्मादहमुमासहायचरणध्यानातिपूतोधुनागौरीनाथपदारविंदभजनेनैवंप्रयातिध्रुवं अयंपुण्यपुंजः
स्वरूपोप्यपापोविनिर्धूतपापोविशेषेणदृष्टः अदृष्टंसमुद्भूतमेवाद्यसत्यंकिमेतादृशालोकनेशोकशाकः अपाररवि
मंडलप्रकरमालिकासंनिभंप्रयातिशिवमंदिरंसकललोकशोकापहं विलोक्यविलोकयस्मरहरारुविद्यानिधिंपुनन
यनगोचरःकिमयमद्यभूयोनृप विभातिशिवविद्ययातरणिमंडलस्याग्रयंनिरोधकृतयामितोप्यमितभानुमालाभि
तः इत्थंखलुमहत्तरंभवतिभाग्यमीशार्चनादयंभवतिशंकरस्यवर्ण्यमानस्यवेदा शिवार्चनफलंपरंभवतितावदेतादृ

शंप्रभृतबहुपुण्यवानयमुमासहायार्चकः भयंगुरुरितिश्रुतः शिवपरायणानां परंप्रदर्शनमयं करोत्यनघ शैवमार्गस्य
किं ७ महान्खलु शिवार्चको भुवनमंडलाखंडलः प्रचंडतरधातकप्रबलपर्वतानीपविः किमेवनामदमद्भुतं शिवपदां
बुजाराधनं महाघवनपावकः सकललोकसंतोषदः सयाति शिवमंदिरं शिवपदांबुजानाराधनाद्दिहेतद्दवलोकनाद्भ
वतिपुण्यराशिस्तथा सुखांबुनिधिरुस्थितः शिवकुलेषु चंद्रोदयाद्दहोभवतिदेहिनां शिवपदार्चनंपुण्यतः सकिंमम
सखापिता किमुतसोदरोवाहितः प्रयाति शिवपूजकः सन्नृदेवक्षितोवासुखं प्रयच्छति कथंसुरप्रवरशोकरराधकः क
लाचमम भरुहाभवति दुर्लभोदुर्लभः अनेनजननेनमेनरं शिवपदांबुजाराधनाद्वाप्तमतुलं महद्भवति भाग्यमानंदद

२० सतेनशिवपद्मलेपुलरपारम्भाग्यप्रदं चकारजगतीतलं सकलमेवतत्पावनं शिवव्रतरतः सदा शिवकथाविचारेरतः शि

राम: २५

वप्रवणमानसः शिवकुलानुमारस्मदः शिवंवदति संततं शिवशिवेतिनामस्मरन्शिवेभवतिभावितंसुष्टुतराशिभिः के
बले १५ शिवंसुरवरं परंवदतिसाधुवीरेश्वरं शिवंभजतिचेतसाकमलकुंदबिल्वादलैः समर्चयतिसादरं गिरिकुमारि
कावल्लभं वरं स्वकुलदेवतंसततमेवमेनमुदा श्रुणोति शिवविद्यया परमुदारकीर्तिहरं महेश्वरमहेश्वरेसमरसावभौ
महृदि विविक्षपुनरादरात्कनकवस्तुकी चंपकैः करोतिविकचार्चनं समभिपन्नवीरेश्वरं जपारजलधारयाशिरसिचैव
वीरेश्वरंचकारसुमुखंमुहुः सखलुकालकालार्चने चकारकरणं वयातिरतएवसंसारतोयुवापिसुवतींवधमपिविहाय

तेनमातरि यदेवधनमर्जितं विविधशास्त्रविद्यात्मकं तदद्य गस्तुता पतिस्मरणकारणं केवलं मनोपि शिवविद्यया प
रमपावनं तन्मम प्रयाति शिवमंदिरं सुरकृतार्थदिङोरवैः नेतनसुखसाधनं शिवपदांबुजाराधनादृते भिन्नमपि निर्मितं
नियमतोथवा निश्चितं तदेव सकलार्थदं परममुक्तिदानक्षमं नहातुमपि वां छुति प्रबलसंकटेपि ध्रुवं २० इति तद्वचनं श्रु
त्वा सराजा विस्मयं गतः तमुवाच महात्मानं शंकराराधनप्रियं सत्यव्रत उवाच दयालुरसि धर्मात्मा दीनवत्सल संततं ए
नामुद्धर संसारान्मूर्छितां शिवविद्यया २२ पश्य मुनिप्रभायुक्तां रुद्राक्षसमलंकृतां शिवार्चनपरा सेयमस्तु तापसमन्विता
इति तद्वचनं श्रुत्वा सेतां पस्पर्श भस्मना आलिंग्यांगे पुनः सापि संज्ञां प्राप विशेषतः ततः प्रणम्य सा राज्ञी राजानं च सनं
दने जलस्रवन्नामं रमुवाच चतुरं वचः २५ राज्ञ्युवाच मन दर्शनमात्रेण कृतकृत्यास्मि यद्यपि तथापि शिवविद्यां मे देया
सा मुक्तिसाधनं तयैव जीवनं धर्मं सविष्यति ममाधुना सा विद्या परमा विद्या श्रुता प्यघविनाशिनी कन्यकायां यथाशी
ति करो निजनकस्तथा मयि प्रीतिं गुरुस्वामिन् नाथ जनपालक इत्याकर्ण्य वचस्तस्याः श्विन्नशुद्धं विचार्य च शिवविद्यां
दत्ते तस्मै सन्नृपालः सनातनः ततस्ते हृष्टहृतः पापाद्यपाराण्युरगाकृतिं गृहीत्वा निर्गतान्याशु सापि विस्मयमागता २९ त
तः शिवार्चनं कृत्वा गत्वा नगरमात्मनः राज्ञा तु गुरुणा तेन नाथा दत्तानुमोदिता ततः स विस्तानगरे सारान्निधनपर्वतान् रत्नै
श्चयानपारांश्च दर्शयामास कोटिशः ततस्तेन धनेनैव कारयामास शंकरं मंदिरं सुंदरं रत्नैः भूषितं च विशेषतः रत्नप्रासाद

कृरणै: स्वर्णगोपुरवर्धनैः सुवर्णरसनिर्मोपो: सान्चकार शिवोत्सवं. प्रत्यहं शिवपूजायां निरतारत्नभूषणैः पूजयामास गिरि
शम हनिर्वलं तद्दिला पंचामृताभिषेकाद्यैः रुपचारैर्मनोहरैः अपाररत्नदीपैश्च पूजयामास शंकरं सायंकाले समभ्यर्च्य सा
शिवं रुद्रवीणया श्रीधायामास गानेन नाट्येन च मुहुर्मुहुः तां विलोक्य स राजापि शिवपूजनतत्परान् संतुष्टः प्राह समुनिं शि
शिवलोकनतत्परं स सद्गनउवाच पश्य पश्य मुनिश्रेष्ठ राज्ञीं शिवपरायणां स्त्रीणामेतादृशी बुद्धिर्दुर्लभा खलु रस्तु तत:
कामातुरा हितरूपी रमणी समुपेक्षते सापि तां रमणीं प्राप्य न मुंचति विशेषत: रमणीनिस्पृहा सेयं निस्पृहा मम बोधय आ
हारमात्रविरता करोति शिवपूजनं ४२ रत्नमासा सार्धं नापि नास्याः शंकरमंदिरे वांछा परा समुत्पन्ना शंकराराधने ध्रुवं ४२ शि
वप्रभावो विदितो न केनाप्ययापि विश्वेश्वरापदानेषु आस्थामनाथानुकरोति पूजामुत्तमयथमेवेति मतिर्ममाभूत ४४ कथं पूर्वे
भवेद्विद्वन् किमस्याः सुकृतं वद कृपापुण्यप्रभावेण शिवार्चनरता सती नाभ्यस्ता वेदविद्यापि वेदार्थो न श्रुतोपि हि न श्रु
तान्यपि शास्त्राणि कथं वा शंकरे रतिः अधीत्यैव वेदार्थं शास्त्रैर्ज्ञात्वा विशेषतः शिवार्चनरता लोके कापि पुण्यैः प्रजायते वेदमा
गाश्च विविधास्तत्रास्यार्थावधारणं सांगैः शास्त्रैर्भवेत्तेषां तदर्थस्यावधारणात् श्रुत्यादिभिः प्रमाणैस्तु वेदार्थेनधृते सति पंचास्या
नदनुष्ठानं तावत्तस्यात्कथं वद नैव वेलेन लिंगेन श्रुत्यर्थस्यावधारणं नश्रुत्यापि न वा विद्वन् श्रुद्धः प्रकरणेन वा समाख्यया नवा
वेदनस्थानेनापि विशेषतः तथापरस्परकांक्षा श्रुत्यर्थस्यावधारणे ५० प्रमाणपरिपंथित्वमत्रप्रमाणस्य निश्चितं तन्निरासोपि तैरेव

राम:

श्रुसाध्येरवधारितं मंत्रो विविधविधानार्थो नूप्रतिपादयितुंक्षमः शास्त्रज्ञानतयामतस्तस्य नयथेष्टागतिः खलु श्रुत्याद्यैरंकुशैः प्रा
यै र्मंत्रमेवाभ्यसितव्यो तन्मंत्रात् भानुष्ठानमध्यस्तति निर्णेयास्तीति किंचितन्निर्णयस्तावन्नफलं केवलं खलु तदनुष्ठानपर्यंतव्या
पारः खलु निश्चितः तन्मंत्रैरेव नियतैः तत्प्रमाणोपपन्नं हितैः तदर्थस्फुरणाय तथा तदनुष्ठानं फलायततं तत्फलं स्वस्वरूपेणात
द्यानीमेवजायेत अपर्वरूपं तद्रूपमुत्पत्तिस्तदनंतरं कालांतरोपभोग्यानि यानि कर्माणि तान्यपि तानि तावदनुष्ठानैस्सांगैरिति
विनिश्चयः तत्राधिकारविज्ञानेसति कर्माणि केवलं भवत्यधिकृतेस्तत्र विनातन्नोपजायेत शास्त्रादीनमिदं सर्वं विनोतनाधुना धी
कथं जायते फलमेतस्य कथं भवतितद्वद सतेदंमः सत्यमुक्तं त्वयाराजन् शास्त्रार्थस्तथाविधः तस्य शास्त्रस्य च ज्ञानं क
दाचित्समपेक्षितं ६ बहूनि जन्मानि गतानि येषां शास्त्रार्थविज्ञानविशारदानां तेषामनुष्ठानविशेषलाभः कदापि नासीदि
तिनानुमेयः अभ्यस्तशास्त्रपरिपाकवशात्कृतेपि कर्मण्यवश्यमनुभयत एवतेन कर्माणि तानि सफलानि फलायतेन मुक्तानि
तानि विफलानि न संशयोत्र कृतशिवाराधनभक्ति सिद्ध्येयत्कर्मतत्तस्यनविघ्नितं चेत् फलं भवत्येव ततो विमुक्तः संसारबंधे
न विमुक्त एव कालांतरे विघ्नविनाशतस्यास्तु भक्तिरीशानपदारविंदे जाता तदभ्यर्चनसाधनं स्यात्तत्तः फलेन श्रुतिराहता
पि उत्पन्नस्यापि मर्त्यस्य प्रतिबंधकसंभवेत् शंकराराधनभक्तिर्नभविष्यति सर्वथा बालकोस्तु नावास्तवद्धावास्त तथापि
किं प्रतिबंधकसद्भावे शिवभक्तिर्नजायते सौभाग्यसेतु प्रतिबद्धचित्ताः श्रीमन्महादेवसुधांबुराशिं नप्राप्नुवंत्येवमनागपीति

१ ननकृलंकथमजानिनजेत्युवे नसंभाविनोथादिनदाभवतीतिमन्ये॥ जत्यूहमाग्नप्रतिपंथिविनाशकेनगोरीममोरमण
मूर्जितचिंतनेन॥ ५

भाग्यंनतेषांदुरदृष्टकष्टैः २८ भाग्यंतस्यसत्वभूरिविभवः पुण्यैरगण्यैर्युतः। तोभक्तोकाभरणोसतत्वसुकृती तद्दूरागेवान्नतः
तन्मातैवपतिव्रताकुलसती तस्यांगनातत्सिता धन्योयस्यमतिः शिवापतिपदांभोजार्चनेसंततं भूमंडलेभूपविवेचनेपिसर्वाभ
वोदुर्लभएवयस्यात निरंतरंशांकरलिंगपूजांनिविष्टचित्तः सितभक्तिपूतः ३० भूतिर्यस्यसदाललाटफलकेरुद्राक्षमालागले
लिंगंतुंगमनंगहृत्तुरमलेरवाजलासेचनैः सर्वार्थप्रदमाशुबाल्यविलसद्बिल्वादलाभ्यर्चितं तंमन्येकृतकृत्यवर्यममराराध्यंनमे
वादरात कोवानेत्रपथंप्रयातिगिरिजाकांतांघ्रिपंकेरुहध्यानासक्तमतिःसुकृष्टसुकृताभावेभवांभोनिधेः तेनैवाशुविशोषणंसुरस
रिद्वपः सएवेतिमतस्मात्तांबुजरेणुवायुरपियः सस्पाज्जगत्पावनः शिवनामसुधाशनेनकोपिप्रथितोभूतलमंडलेरविलोपि सपुना
तिजगत्त्रयंस्वलीलागमनोत्थरजोविशेषभागैः नकापिनारीशिवपूजनेनविनायानस्यसेवविनापिभोगं तथानरोपीतिशिवैकलि
प्तः साक्षाद्वसिष्ठोपियतोवरिष्ठः शिवाराधनसक्तानांजीवनंजीवनंपरं अन्येषांजीवनंतावत्मरणंमरणादपि यावच्छंकरपूजने
मतिरुमाकांतांघ्रिपंकेरुहःध्यानेतावदिदंशरीरमसकृत्संरक्षणीयंबुधैः तस्यांगपतितोभवस्यनुदिनंतज्जन्मतावद्दृधातन्माता
पिभिवारिपीतिमतिरप्यद्याधुनाजायते कोवाप्यशशांकशेखरपदांभोजार्चनात्पादरोभस्माभूषितविग्रहःस्वहृदयेगौरीस
हायंपरं ध्यात्वातिष्ठतितत्समोपिनकदाप्याकर्णितानंविदुः साक्षादीश्वरएवसर्वजगतांपूज्यःसएवध्रुवं यस्याभीप्सितधर्मसिद्धि
रसकृत्सादांबुजाराधनाभावेनापिनहीक्षणादपिभवेत्तंकेवलंशांभवं मन्येदुर्लभमेवशांभववरंसामान्यतःशांभवोभूलोकेखलु

थो

राम:
२८९

रु ॥
वि ॥

उद्भूतो भवतीति तमन्येपरं पावनं पूर्वेस्मिं भवेराजन् विंध्याचलनिवासिनी भिल्लकन्यासम्भवन्मेरे तस्याः खलुजीवनं इयंचयु
वतीतत्रभिल्लक्रीडारतावने सातत्रेसुरतातैस्तैः सहेमेयथासुखं ततः समभवद्वृष्टिः कापिकस्मायकाल्पिता तयावृष्ट्योरूपमा
नासक्ताचपुरुषेस्तदा ततस्तद्वृष्टिधाराभिः ताभिस्तस्यकोटरेः विच्छिन्नवसनं संवंच्छिन्नमवपुरातनं ततोवातनिपातेनच
तितानवपल्लवां बिल्वशाखांसमादायशिवशाशिवमंदिरं ८३ ततस्तज्जलधाराभिः संरुध्यंशिवमंदिरं प्रविश्यचिंतयाव्याप्ता
ह्येवागंतव्यमितिस्मपि तदनंतरमुत्कृष्टेनार्मदं लिंगमादरात् विलोक्यसाजगादेयंधृत्वानल्लिंगमादरात् विलोक्यसाजगादेयंध
त्वातल्लिंगमादरात् जलधाराविशीर्णास्तेपाषाणाश्चानिलाहताः लिंगमूर्ध्निपतिष्यंति किंकर्तव्यमतःपरं महद्वृष्टिधारा
भिःसंरुध्यंचभविष्यति स्फुटितंचभवेदेवंविशीर्णंचभविष्यति लिंगरूपीमहादेवस्तद्वृष्टिविनिवारणं कथंवानकरोम्यत्रविंक
त्वेयंमतःपरं लिंगनाशनसामग्रीवृष्टिरेषामहत्तरा एतन्निवारणंकर्तुंयततेविंनशंकरः विद्युत्तस्यमहेशस्यलिंगेभिव्यक्तिरि
त्यपि श्रुतोवापीविशेषोयमशरीरसमुद्भवः यत्प्रावितप्रावितसंशयात्रभिन्नंयदेतद्यदिवृष्टिसैवैः तदातदालोकनमात्तिके
नकर्तुंनशक्यंखलुसर्वथापि लिंगंतदेवरमणीयमवेक्षणीयंयच्चंदनादिसमलंकृतमादरेण कुंदैश्चबिल्वमसकृन्नवपल्लवैश्च
संपूजितंभवतिपापविनाशनाय भाग्यंनमेकुसुमचंदनपूजितस्यलिंगस्यतावदसकृल्लसमवेक्षणेपि वत्स्यापाद्यायकमिदंखल
लुलिंगमत्रैरवातरंगसमलंकृतमुष्णाकाले एतस्यतावदधुनानकृतेयबिल्वेनवापत्रटतिचेत्स्फुटितंजलेन नमथांभवत्यपिस्तप

पु ३

ष्ठवंबिल्वशाखाशाखासमर्पणमपीहकथंमुदेस्यात् एकैकबिल्वदलसंग्रहणेनशक्तोहस्तोपिकंपसहितोद्यतनुःसकं
पा पापापनोदनसमर्थमिदंनलिंगंकिंनामदेवविमलंप्रष्ठवपूजितंचेत् इत्यक्तासातिदुःखोतोतस्यलिंगस्यमस्तकं सर्वत
श्छादयामासत्तुदृष्ट्याबिल्वशाखया पुनरानीयसाशाखांबिल्वस्यनवपल्लवां छादयामासतल्लिंगंकंपमानापिसापुनःके
पनहस्तांगुलिवारणात्लिंगालयेनाद्यवधरिवाभूत् याबिल्वशाखापिसमर्पितासालिंगस्यतत्सृजनहेतुभूता पटहीनाव
धूटीवनाद्युवेगेनसावभौ तेननाद्येनसुप्रीतोभगवानपिशंकरः ततोदृष्टिंगतासापिसंतुष्टागिरिजापतिं तुष्टावपाहिमामी
शपाहिमामितिशंकर शंभोवसनहीनामांनिःस्वसवसनांकुरु हरपापानिसर्वाणिजान्संगहृतान्यपि त्वत्तस्त्वमेवभगव
न्विश्वस्यसकलस्यच पालकोनाशकश्चत्वंजनकोपिनसंशयः भवदुःखोत्सादनकारणाय तत्संलग्नस्पाप्यथकारणाय
तन्नाशकायापिनमोनमस्तेगौरीसहायायमहेश्वराय अपारसंसारविनाशकायसंसारदुःखप्रलयोद्यताय नमोस्तुते
कारणकारणायविकारणायापिनमोनमस्ते ५ वेदांतवेद्यायनमोनमस्तेवेदस्वरूपायनमोनमस्ते अपारकल्याणगुणार्णवा
यनमोनमस्तेगिरिजासहाय नमोनमश्चंद्रकलावतंसगौरीस्फुरन्मानसराजहंस गौरीविहारान्नतकंधरांसानमोनमो
बिल्ववरात्नमांस कश्चंद्रचूडचरणांकुरसार्चनेननामोक्षसिद्धिमसहस्तमवापरूपं शंभोसमेसनवबिल्वदलांकुरेवालिं
गार्चनेनविजनेमुखवा प्रदोषबिल्ववार्यदिनवजरुनापिसहितेसदद्याद्योभवत्पासितभासितलिंगेतिविमलःसतारतदेपा

रामः

२९०

रज

मयि भवति पूज्यो जनिजराविनाशानां दुःखं धारि हरति दृष्टोपि स्वहस्ता पुष्पानि तावन्न पुण्यकृतानि यतस्मरारिस्मरणं न कृतं
अद्यापि तावन्न कृतानि पुण्यान्यथापि लिंगं नयनातिथिमे अलं पुण्यभारैरलं योगदानैरलं सर्वभंगमंडलावर्त्तनैर्वा यदा
वै लिंगं नवैर्बिल्वपत्रैः पवित्रैः प्रसन्नं न तोतेश्वरो केवा अहो महद्भाग्यमिदं वनेस्मिन् दृष्टिः प्रसंगादपि शांगलिंगं दृष्टं मम स्रा
पवियोगकालेन भाविकालात्स्यमस्त्यशेषापि सन्दृश्यस्वलोकितामहेशशिवलिंगे पुसमन्वितापि भक्त्या कृतं न सर्वं करोति
मर्त्यः सत्कृतालोपि विभूतितेनन्न ने कृतांतांतकंकः प्रपद्यातिभक्त्या लेवबिल्वपत्रैर्जलैर्वा फलैर्वा नयातिशापाराविंदद्वैरेभ
स्वभावं भवांभोधिराशेक्षपारं प्रपन्नार्तिनिर्वापयो शक्तमेकं महादेवमेवं प्रपद्ये महेशं विशेषं मातापितानंधुरेवप्रकृष्टा
निकष्टानि दूरीकरोति अनायासलभ्यैव मुक्तिर्महेशो श्रुतेपि स्मृतेपीति मन्ये तदन्यः नकोप्यस्ति भक्तार्तिसंहारहेतुः सखे
दुःसुखानां सेव्यतुमेखानो महेशं भजे तस्मरंतः सद्वानसंसारभीतिं प्रपश्यंति काले नपश्यंति दुःखानि कान्यपतो हं
महेशं विनान्यं न जाने न जाने जनिस्तेन तावद्भवं स्वं वेतन स्थितिस्तेन संहारकाले समाप्तिः समस्तस्य लोकस्य तस्याधु
नाहं प्रपश्यामि लिंगं हृतानंगभंगं ग्रहास्तावदद्याधुना मे प्रसन्नाः पुनस्तावदेकादशस्थानयुक्ताः समस्ताश्च तेतेन घोरे वने
स्मिन् प्रदृष्टं हि लिंगं मया दृष्टमेवं विनष्टानि कष्टानि दुःखप्रवाहक्षयेनैव नष्टागता वृष्टिरेषा इदं लिंगमप्यंबुना सिक्तमेवं नवं
बिल्वपत्रैर्वहस्तान्नुदत्ते अनेनैव दत्तेन बिल्वेन पापं प्रनष्टं प्रनृष्टं सुखं दातुमेव समर्थेन संदेहवार्त्तापि धन्यं शरीरं ममेदं तथाजो

वनेच बिल्वांकुरणगिरिजारमण: कथंवाप्रीतोभवत्यघविनाशकरः कथंवा मुक्तिमपावितरत्याश्रवण: कथंवावेदोनवेद
तस्यशिवकौतुकानि धुत्तूरपुष्पमपिकेतकपुष्पतुल्यंकृपाजपाकुसुममघपराधेनापि गृण्हातिदत्तमस्तकृत्सत्कृदेववा
यकिंकौतुकंतदिदमिस्वपिनेवविस्यः किंकंटकारिकुसुमान्यपिकौतुकेनगृण्हातिकिंकुशदलान्यपिकिंशुकानि भक्ताभि
तापहरणायजलानिगृण्हासत्यानितान्यतिनवान्यनवानिवाथं २५ कस्याप्यसागरइतिप्रथिताहरायंसर्वाघराशिहरणा
त्सहरोहरोपि ततोदत्तंगिरिसुतापतिमाम्भ्यहंभक्तेप्सितार्थमरदपारसुरवप्रवाहे: ओलोढ्यमेवविरमेवमयापिलोकेनिपी
तमीशचरणांबुजमादरेण संसेवनीयमखिलाघविनाशनायगौरीपतिंचिरमहंहृदिभावयामि २६ गौरीकुचारुगिरिशो
खरचारुहीरहारस्फुरत्किरिशपादसरोजभृंगः मन्मानसंभवतुतेनविमुक्तिरस्यसंभावितापिजगतामपिमाननीयः २७
मदीयसुतपारपारावारमहेश्वरः कुलैदैवतमस्माकंअकस्मात्भवत्कथं क्वाहंक्वावाविष्टिरयंप्रभातासंतोषरूपाशिवदर्श
नेन अलंकृतार्थममभालसेमकृत्संचनात: परमस्तिलोके इतिस्तुत्वामहादेवंसास्थिताशिवमंदिरे तदानीमागतामा
तातस्यास्तांदृष्टुमादरात् तांविवस्त्रांकंपमानांविलोक्यातीवदुःखिता पटखंडंददौतस्यैसानजग्राहतंपटं तामाहंजननी
तस्याःकंपमानांसुतांप्रति गृहाणवसनंबालेनग्नासिकिमिदंवद इतितद्वचनंश्रुत्वासात्कालसंभाषयांनदा शिवमंदिरमा
श्रितास्थितावित्कमानसा ततःपरंसायमुमासहायंनयैवबिल्वैर्गिरिमल्लिकाभिः समर्चयामासततनुस्वकीयांमुद्दूल

शंभुस्मरणानुरक्ता रात्रिजागरणेनैव नीता तानाद्धेन सा तया पुनः प्रातः समुत्थाय शिवपूजां चकार सा अरुणोदयवेलायां
कापि गंधर्वकन्यका तल्लिंगाराधनं कर्तुं आगता बहुसाधनैः ता सा समागत्य तीर्थे सुस्नात्वा हृष्टापि प्रसन्नमना अर्चयामा
स विविधैः लिंगं पुष्पादिसाधनैः ततः परं सा चकार गानं गंधर्वविद्यया नाट्यं चकार बहुधा स्वसर्वांगभावेष्ठिता सौंदर्यनिधि
रूपां तां दृष्ट्वा गंधर्वकन्यका शिवार्चनरतां दृष्ट्वा भिल्लकन्यामनोरमां सापि गंधर्वतनया तां दृष्ट्वा भिल्लिकन्यकां भस्मोद्
ल्लित सर्वांगां नम्रामाह विचक्षणा गंधर्वकन्यकोवाच कासि त्वं कस्य कन्यासि युवती नम्रतां गता न दृष्टा हि वने कापि किं तकुले
मिदं वद ५१ किंच पतामस्मनेयं तनुरस्पृत्तमातव केन वासि स्थिता दीक्षा दत्ता केन महात्मना ५२ ऊर्ज्जामात्रे परित्यज्य वनेऽस्मि
न् शिवमंदिरे एकाकिनी विचारेण विनातिष्ठसि निर्भया एतैर्बिल्वदलैः राशीकिं तया सायमर्चितः धन्यासि तव भाग्यस्मना
तः सर्वात्मना रक्षतु प्रायस्त्वं नाद्य वेगेन वसनं वायुना हृतं धन्यासि मम भाग्यासि समायाहि मया सह इत्युक्त्वा तां गृही
त्वैव वस्त्राण्यथाभरणानि च दत्वा मय्योः स्वनगरं सापि गंधर्वकन्यका ततः प्रसह्य मागत्य सह गंधर्वकन्यया पूजयामास गिरि
शं सापि भिल्लस्य कन्यका ततः कदाचिदागत्य बिल्वमारुह्य वगतः बिल्वपत्रार्थमेवातः पपात निलकं न्यक्रमिता तेनाविसर्ज्य
सा दृहं विमानवरमाश्रिता ब्रह्मलोके ययौ तत्र ब्रह्मणा पूजिता नृप ततश्चतुर्मुखः प्राह सभायां ससुरान्प्रति भाग्यं मे तादृशं
लोके लब्धं शंकरपूजया ब्रह्मोवाच भिल्लस्य कन्यका सैवेनेन पित्या निचारिणि जरालिंगनसंतुष्टा शिवमंदिरमागता बिल्वैः शि

वार्चनं तावत् चकारेयं मनोहरैः तेन पुष्पप्रभावेन गंधर्वनगरं गता गंधर्वनारीसहिताताभिरप्याहूता सदा कदाचिद्बिल्व
मारुह्य पतिता भिल्लकन्यका अभ्यासो बिल्वनारीणां तेश रेरोहपातनः तेनाभ्यासेन सा तत्र बिल्वादानसमुद्यता ततो
महानिलाघातात् पतिता भूतले तदा जहौ सा प्राणान्बिल्वपत्राण्युत्सृज्यातीवविह्वला शिवपूजार्थमुद्धृत्य बिल्वान्यादातुमुद्यता
सत्कृप्राप्ताप्रापलोकं मम दृष्ट्या पमोजसा बिल्वपत्रैस्समभ्यर्च्य देवस्याकृतजीवना तदा मुक्तिर्भवेद्देव शिवसारूप्यलक्षणा
अहो महेशाम हिमा ज्ञायते न सुरैरपि न वेदैरपि विज्ञातः स विज्ञेयः कथं सुरैः अविज्ञेयप्रभावस्य शिवस्य परमात्मनः स्वरूपं
कुन वा ह्येयं तज्ज्ञानमति दुर्लभं कीर्तितश्चिह्नत्वेन श्रुतिभिस्स सदाशिवः अविकारमयत्वेन कीर्तितोपि सदाशिवः स एव हि
महाबाहो देवो निर्गुणत्वेन कीर्तितः शिवो निरंजनत्वेन कीर्तितो वेदराशिभिः ६१ शिवस्वरूपं सहसा न वेदैर्विज्ञातमेवेति वदं
तिसद्भिः अस्माकमीशान पदारविंदध्यानेपरं भक्तिरभूतपूर्वा वदंति वेदाः शिवमद्वयं ते सर्वामराधीश्वरमिस्सपीति वयं शि
वाराधनमात्रसक्ता स्तद्वास्तत द्वास्तु शिवस्वरूपं धन्याः शंकरलिंगपूजनरता प्राप्तांतकाले शिवं भस्मालंकृतविग्रहं गिरिसु
ताकांतं मुकुंदः संततं स्मृत्वा वासवदेवदानवासुरवैरैराराधितः सादरं कैलासे खलु शैलजापति पदांभोजप्रसादाश्रयः धन्याना
श्रतमिंदुशेखरपदांभोजार्चनं तेन ते कालेनापि समर्चिताः सुरगणैरभ्यर्चिताः किंनरैः गंधर्वैरपि सर्वसौख्यसहिता संपन्न र
द्धास्सदा पुत्रैः पौत्रवरादिभिश्च सहिताः कुर्वंति ते मंगलं इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे या

राम:
२०२

ज्ञवल्क्यजनकसंवादोनामैकोनत्रिंशोऽध्यायः   याज्ञवल्क्यः इतिब्रह्मवचः श्रुत्वातेसर्वेशिवपूजकाः तमाहुर्विनया
नम्राः शिवस्मरणपूर्वकं सभासदस्तु ब्रह्मलस्याः कियत्कालं ब्रह्मलोके स्थितिः पुनः कदास्यादेवतारोपिं भुवि तत्सुपय
कोटिभिः इतएवनकैलासेयात्राभवतिसर्वथा तस्मात्स्वपायभ्रतस्मत्सुपयस्याप्रियदर्शनात् अत्राप्यस्याः कियत्कालंअव
स्थानेमतिर्भवेत् लोकांतरविहारेस्तु किमस्याऽपिभाविनी ७ बहवः पर्वमागस्यलोकेस्मिन्नपिसादरं स्थित्वाचरंतिलो
केषुवैकुंठादिषुशंकराः अत्रस्थितिः शोभवपुंगवानांनातिवसंतोषकराकदाचित् स्थित्वापियांत्येवमनोहरेषुस्थानेषुहारे
षुविशेषतस्तु अस्माकमत्रस्थितिरिंदुमौलिप्रसादलेशात्तदनुग्रहश्चेत् विशेषतस्तर्हिभवेदवश्यंकैलासवासः सतुकाम
धेनुः सएवतावत्खलुकल्पवृक्षः सएवचिंतामणिरित्यवैमि कैलासलोकादधिकोनलोकः सएवलोकः खलुशंकरस्य आ
नंदरूपस्यमहेश्वरस्यकैलासवासेपिमतिः सदाभूत् शिवाभिमानस्थलमेवमन्येकैलासमानंदसुधानिवासं कैलासमासा
द्यशिवप्रसादान्मुक्तोभवत्येवशिवार्चकातः शिवार्चकानां सुलभैवमुक्तिः विश्वापयानापिमहाघनाशे १० मनुष्यरूपेणगणाः शि
वार्चांकुर्वंतितेषांसुलभैवमुक्तिः अन्यस्यभक्तिर्नशिवार्चनेषु तस्यैपेयाराविविधैश्चधर्मैः धर्मस्तथाकोपिनदृश्यतेचधर्मः परेशे
करपूजनेनः धर्मस्वरूपोभगवान्महेशः तल्लीलया मुक्तिसुखानिकानि किंसृष्टमीशेनन्च तन्नविघ्नः शिवार्चनेयेनसुखप्र
वाहाः भवंतिद्वंद्वधानतेषांमद्वहिरित्येववविनिश्चयोपि सहैवत्वाम्स्मत्वाशिवचरणपद्मांबुजरजः सुराराध्यंतीत्वविषममपि

अदोषकालादगामन्त्रिवनेवंधभक्षणं ।। कतानि नानेनरमंदद्भीरविभादराम् ।। रविनीमानमक्षय्यं कोमहेश्वरविल
पदुवेः ।।

संसारजलधिं प्रयांति ब्रह्मांडस्थिति जननानाशादिकरणं महादेवं तस्मिन्दृढनिहितचित्ताः शिवजनाः १४ इति तद्वचनं श्रुत्वा
सोपि ससत्रतो नृपः संतुष्टः स्वपुरं प्राप स्मरन् शंकरवैभवं पुनः शृणु प्रवक्ष्यामि श्रीमहादेववैभवं तत्प्रभावानुकथनाद्धि रतं
नमनो मम शिवार्चनप्रभावस्य कथनादपि मुच्यते अपारपातकाकारसंसारादिति मे मतिः पुरा ब्रह्मसभासद्भिः शिवपूजन
तत्परैः पृष्टश्चतुर्मुखो भक्त्या कथं वदशिवामिति ब्रह्मोवाच राजा निषधदेशानां नाम्ना परपुरंजयः तस्य पद्मावती नाम
महिला शंकरप्रिया सा लिंगपूजनरता रेवातीरे मनोरमे कारयामास मणिभिः मंदिरं शांकरं परं तत्र नार्मदलिंगानि स्था
पयित्वा विधानतः पूजयामास विविधैरुपचारैर्मनोहरैः तत्र शंकरपूजायां निरता रजनीमुखे बिल्वादिभिर्महादेवं पूज
यामास सादरं २० ततः परं सा चकार गानं गंधर्वविद्यया नाट्यं च कारयत्येन निराहारेण भक्तितः जलेरथ्यमलैः शशांरे वायांश्री
तमानसः शिवमंदिरमालोक्य दीपमालाविराजितं धूपधूमसमाक्रांतं शिवभक्तजनाश्रितं दिव्योपहारसंपन्नं मणिमंडल
मंडितं संतोषं परमं प्राप शिवपूजावलोकनात् तादृशं रविमालोक्य भक्तिभूषितविग्रहं कृतांजलिपुटाः प्राह स्मरंती शंकरं मु
दः २१ पद्मावत्युवाच कोसि शंकरभक्तोसि शंकरार्चनतत्परः शिवार्चनप्रभावं मे वद निश्चिन्त्य सादरं कथं वा श्रीमहादेवः प्र
सन्नः पार्वतीपतिः ध्येयं कथं वा पूजापि कथं कार्या प्रयत्नतः कुत्र वा पूजितः शंभुः केन वा साधनेन सः प्रसन्नः परमार्थं हि प्रयच्छ
ति कृपानिधिः २२ भानुरुवाच धन्यासि कृतकृत्यासि पुण्यराशिरसि स्वतः प्रश्नोयं तव कल्याणि तत्तुल्ये मंगलानि मे यः सर्वे

रामः

२०३

लीवल्लिनिर्ङ्गनिमदद्धनंध्यासंलुक्ष्णः सप्ततुर्मुखः ।। नानुवाजानि हृष्टा सा प्रभावं शंकरस्मरन् ।। भिल्लभूपालमुद्दिश्य सेयं मा भवि
ष्यति ।। ... भोगान्यथा कामं मंत्रिवपूजां ... पावनिर्ये श्रिया ।। सनंदनोन्नेमिमंने ...
... इति निर्भमव्यः ... सभासद ।। एवं ... अनर्थाशि वपूजया ।। ... इति

मंगलाकांतस्तत्पादांबुजेरेणुभिः स्मृतिः कल्याणराशीनां सुदेवो जायते मुहुः यस्य स्मरणमात्रेण शोभनानां परंपरा भ
गस्येव सगौरीशः स्मृतः पुण्यवशादिह यत्कथा पावनत्वेन पावनेषु श्रुता शुभा साकथा संस्मृता श्रव्या श्रवणेनापि मुक्तिदा
शिवकथामृतसागरकीर्त्तनश्रवणतोपि न तृप्तमिदं मनः अखिलपातकनाशनसाधनं स्मृतमपि प्रयतेन विशेषतः शिव
कथामृतराशिरनेकधा श्रुत इति स्वत एव पुनः पुनः श्रवणमिच्छति पापविनाशनेकरणमेकमिदं भुवि मुक्तिदं यन्नामस्मरणे
न पापविलयो यन्नामसंकीर्त्तनादापद्रूपजलार्णवौघविलयो यन्नामसंकीर्त्तनात् सर्वाभीष्टसमृद्धिरेव तदहं वंदे मुकुंदार्चितं
गौरीनाथपदारविंदजरजःपुंजं निकुंजालयः ३६ यत्पादांबुरुहार्चनाय यतते नारायणः संततं तत्पादांबुरुहप्रभावमधुनास्म
त्स्वामतः केवलं पापानंदमनंतजन्मजमहापुण्याब्धिपूरैरिदं गौरीकांतपदारविंदभजनं जन्मापहं जायते धन्यं धन्यमिदं दिने
शिवपदध्यानेन नीतं पुनः तत्पादांबुजमेव चित्तमसकृत् स्मृत्वापि तृप्तं पुनः तृप्तिं यास्यति तत्प्रभावकथनात्तेनैव मुक्तिः परा पा
पानां विलयोपि पावनमिदं तेनैव नूनं मनः लिंगाराधनजातपुण्यविभवो वेदैर्न विज्ञायते किं देवैरपि किं मुनीश्वरगणैः नाराय
णेनापि वा किं वा पीरमणेन नागनिलया धीशेन तद्वर्णने शक्यं कस्य भविष्यतीति बहुधा चिंतेम मव्याकुले यद्यप्यर्थे शशांक
शेखरपदांभोजार्चना नादरः तद्ध्याने सति तत्प्रभावकथनं शक्यं कथंचिद्भवेत् तत्रैस खलु स्थगितमप्येतन्मनः सर्वथा सर्वाशा
स्पदमिदं कथंचिदधुना तावन्मयाप्युच्यते पुरा ब्रह्मांडविलये जगत्स्रष्टुं महेश्वरः क्रीडाविनोदसंपन्नो भवानीमाह सादरं ४१ सरा

शिवः ब्रह्मांडानि विदग्धानि पश्य पश्य वरासने एतेषां सृष्टिरधुना तव किं समुपस्थिता यद्भवेतीति विचार्येदं वद सादरं मयि के
स्कोपितवशात्ति किं विद्यते गिरिकन्यके इति तद्वचनं श्रुत्वा गौरी ब्रह्मांडमंडलं दग्धं विलोक्य तं प्राह महादेवं त्रिलोचनं ४५
गौर्युवाच भगवन्नूनं समर्दसर्वदा सज्जने सति एकांतकालः सुलभः न कदापीति दृश्यते लोकसृष्ट्या किमस्माकं फलं व्यसन
मेव तत् किं तेन व्यसनेनापि कार्यमेतेन किं तव नहि कार्यं विना लोके कश्चित्कश्चित्प्रवर्तते कृतयापि तया सृष्ट्या किं तन्नाशेन वा फलं
लब्धं यावत्कृतं कार्यं तत्कृतं कृतमित्यतः लीलया चलमेवालं विहरस्व यथासुखं कस्यापि क्वापि संचारोल तद्धि लयनादिह
अतो विहारकालोयमलं सृष्ट्या महेश्वर यत्र क्वापि परस्त संचारः शयनं वा यथेच्छया न कस्मादपि लज्जा स्याद्विहरस्व सदाशिव
अत्र हि ऽमंडलान्येव भवंसानरणान्यपि अतो यथासुखं शंभो विहरस्व महेश्वर सुधाकरकराणां वा प्रवेशः क्वापि दृश्यते ना
पि सूर्यकराणां वा सर्वथा प्रलयादिह त्वया सह विहाराय न पश्यर्थी कृता पुरा विहारसमयः सोयं न संसत्त्रशरीरिणः नन
त्रापि पवनो भूधरा नांबुराशयः न वा नारायणो नेंद्रो न ब्रह्मा नापि मानवाः कैलासवासं देवाश्रीशैलवासः सदाशिव कस्यांवाव
सति स्तावत्त्वमेवासी ज्जनान्वेष अधुना यत्र कुत्रापि स्थातुं शक्यं तथा सति विहारविघ्ननाशोपि जात एवेति मन्महे इतित
द्वचनं श्रुत्वा शंकरो हृष्टमानसः गौरीविहारचतुरो बभूव भगवान्शिवः तयोर्विहारकालोपि याति नूत्नं पुरा तदा सन्नहा
तो पि कनापि स कालस्तन्मनोहरः गौरीविहाररससागरसेवनेन हृत्तः श्रमापि शिवयोः सततयोः श्रमेण स्वैरं बुराशिर भवन्त तए

रामः
२१४

वजाता सृष्टिश्च सर्वजगतां च यथाक्रमेण सिंधुः सत्वजरुधित्वमवापकोपि गंगात्वमापयमुनात्वमवापकोपि . वापीत्वमा
पसरयूत्वमवापकोपि क्षीरांबुधेत्वमपि कोपि सरत्वनर्मं ६० सत्वशोणप्रद्वत्वं नर्मदात्वमवापसः गोदावरीत्वं संप्राप कावे
रीत्वमवापसा संप्राप कृष्णावेणात्वं स्वेदपूरस्तयोस्तदा तेनैव स्वेदपूरेण ब्रह्मांडं जलपूरितं तेनवायुः समुत्पन्नः जातं
च गगनं ततः ओंगिरिं इश्च सर्वश्च महाविष्णुश्चतुर्मुखः विंध्यश्चाहिमवान्मेरुः मंदरो गंधमादनः कुलाचलाश्च नागाश्च
सर्पाश्च मणिभूषणाः निधयः शंखमुख्याश्च लोकास्स्वर्गादयस्तदा वनान्यपि विचित्राणि धान्यान्यपि विशेषतः तेनैव स्वे
दसंघेन वेदाश्च ग्रामाअपि विद्यास्समस्ताः संभूताः गंधर्वाः किंनराअपि ततएव समुल्लासस्वेदतेमानवाअपि मनवो
पिसमुत्पन्नाः पशुपक्षिमृगादयः ७० ज्ञानेमततसमुत्पन्नं जगदृष्ट्वा महेश्वरः विस्मयं परमं प्राप्य साविगौरीशिवप्रिया ततस्ता
माह गिरिजां गिरिजारमणः प्रभुः पश्य पश्य विलासायं कथं परिणतः प्रिये सष्टार्थीयं विलासस्ते विजनत्वान्लोकनात् जना
वलोकनेवृत्तसतावत्तातएवते अतः परं विलासार्थं यदिस्थलमपेक्षितं तदा कैलासनिलयमायाहि गिरिकन्यके तत्राद्यप्रभृत्येव
नेरम्ये सर्वपुष्पसमाकुले भृंगागनागानवीतेपरभृज्ञानसंकुले सुधाप्रवाहसंकीर्णे मंदमारुतसेविते पुष्पशय्यासमा
कीर्णे फलराजिविराजिते रत्नमंदिरसंकीर्णे रत्नसिंहासनाश्रिते रत्नपर्यंकसंकीर्णे रत्नमालाविराजिते इंदुवंदुकसेविते
पुष्पमालाविजृंभिते मणिदीपसमाकीर्णे शरच्चांकानिशाकरे ब्रह्मांडप्रलयेयस्यप्रलयो नप्रजायते सर्वतुंगणसंकीर्णे

सर्वदा तद्वनं मम तत्र यक्षास्सपारापि फलानि विविधान्यपि तेभ्यः पीयूषधाराश्च प्रस्रुवंति मुहुर्मुहुः सरिद्वरापि प्रवरा त
दुद्यानस्य शोभने महादेव महादेव महादेवेति वादिनी उत्फुल्लपुंडरीकाणां मालाभिस्सा विराजिता तत्तीरे संति बहवो मरालाः
स्वांगनायुताः ते सर्वदा वदंति शिव हर शंभो शिवेत्यपि मरालैर्नादितागानानि भ्रमाणि कमलानने तत्रगं तप्यमधुना दोलात
त्रास्ति कांचनी दोला सेवापि कर्त्तव्या तत्र तावन्मनोहरः कृष्णलोकास महादेवो भवानीकरसंपुटं गृहीत्वागमनं तत्र सस्मा
राम रघुपुंगवः ततः प्रविष्टो गिरिशो गिरिजाकरसंपुटं धृत्वा करेण त्वरयान्तद्युद्यानं मनोहरं रत्नप्रासादमारुह्य रत्नसिंहा
सने स्थितः शिवयानुष्यत्रयामायारेमे गणाविवर्जितः ततः परमदोलायां आरुह्य शिवया सह इंदुकंदुकैः तत्र लीला
भिश्च कारदिनयापनं तस्मिंल्लवदिने जाताः कोटिशः प्रलयाश्चापि सर्गाश्च तावन्त्येव न संख्या कापि दृश्यते एवमेव महादेवः
शिवया सह सर्वदा क्रीडां करोति क्रीडां च स्वकां क्रीडापि तस्य न विघ्नस्स महादेवस्तस्य क्रीडां कुतो भवत् न तस्य सुरथेलापि
तस्य ज्ञानघनस्य सः ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं वदंति तं ८९ स संज्ञानमनंतं च त
द्रूस्य परं विदुः ततो भीतः स वातो विभाति सूर्यो सुरेतिसः अग्निरिंद्रश्च भीतस्मान्मृत्युर्धावति पंचमः इयमानंदमीमांसा
त स्वरूपमगोचरं यस्य प्रासादलेशेन सर्वे नारायणादयः सुरान्नराश्च तं देवशरण्यां याभिशं करं संहारकाले संप्राप्ते ब्र
ज्ञनारायणादिकान् संहृत्य लीलां कुरुते यः स एव सदाशिवः यस्य प्रसादाद्दृशिवायहारोय स्य प्रसादाज्जननापहारः यस्य

रामः
२०५

प्रसादेन जरापहारः तमेव देवं शिवमाश्रयामः शिवस्तवं यश्चरते नवमनुजस्याच्छिवालयः तस्यैव देवस्य महिमावेदनामप्यगो
चरः सहस्रजिह्वोपि न यस्य तत्त्वं स्तोतुं समर्थश्चतुराननो वा नारायणो वा खलु मासहाय मानंदकंदं हृदि भावयामः यमाङ्कु
रीत्रापरमं वरेण्यं सर्गस्थितीनामपि हेतुभूतं तमेव देवानममिंदुखंडशोभासमालंकृतमाश्रयामः यच्छीलास्विदराशिः सुर
सरिश्चलाथीश कन्यायदंके यन्मौलौ चंद्ररेखा विलसति सततं यज्जटाजूटमाला तारापामिव हारो स्फुरति सिनवलसद्विल्व
मालाविलोलातसारोभोजभृंगोः भवतु मम मनस्यत्र संसारांधः लोकभाग्यसुधांशुराशिरहितास्त्येयतदाशंकरध्यानानंदवि
हीनहीनमनसः तदुर्भगास्सर्वदा कल्पांतेपि न मुक्तिरिस्यापि मितासंसारिणस्ते सदा सर्वेनारिविपापितत्कुलमपिस्यासुल्ल
सानाकुलं यस्यांतःकरणं महेश्वरपदांभोजार्चने सादरं तन्नामस्मरणेपि तत्करवकथावात्तौनुरक्तं सदा तेषां दुर्गतकल्मषं मुनि
जनाः सर्वेपि ते केवलं वंद्यं प्राहुरमंदपुण्यविभवं भावं भवाभ्यर्चकं १०० लोकस्यैव विजयी स एव सद्गुणारंभैकभूभीसुरास्सस्यादि
द्रक्लावतंसचरणांभोजार्चकालोप्रियः सस्यादुत्तमसंपदामपिनिधिः सस्यात्कराणामपि प्रायः सेव्यईतिप्रभूतविभवोभावो
नकिं दुर्लभः स्वप्नेपि यस्य शिवलिंगविलोकनेन ब्रास्वच्छाम विष्यति भवा चनेन जातपुण्यैः तसादपच्चजरजोमणिमंजरीवधन्यो
नमोरशिरसिस्फुरतीह धीर सत्वावापि शिवप्रसादविभवेयः शंकराराधनध्यानालंकृतचित्तवृत्तिरसद्भूधद्वासहक्सादरं तंमुक्ते
प्रवदंति पावनमितिप्राहुर्मुनींद्राः सुराः तं रत्नं जगतीतलस्य सततं वंदेमुहुः सादरं २ योमन्मारजनीमुखेषु गिरिजासंपद्ज्यबिल्वा

नंनं विनारेण स्वाहारं जहौ नृप

द्रिभिः नैवद्यादिसमर्पणेनचभुङ्क्ते नाद्भिः प्रणामैरपि संतुष्टस्तनृपास्तद्दुःखनिकरंमन्यसेरवामरस्तोरे लिंगमभंगविस्व
क्रमेल्लयराधयशंगंजजे तु ७ इत्याकर्ण्यवचस्तस्यप्रेतेणाम्याभिनंदिच लिस्मशिवकथामेवंवदेत्याहविचक्षणा संसंतुष्टस्त
थासार्कंउषित्वाशिवमंदिरे कृत्वाजागरणंपश्चात्तुदयाचलमापसः स्वपिराज्ञीप्रगेशत्यास्नात्वाखाजले ततः परिधायदु
कूलानिभस्मरुद्राक्षभूषया शिवाचाररतापारसखीजनसमावृता विवेशमंदिरंशंभोः शिवाराधनतत्परा ८ रत्नकुंभस
मानीतैरेवनीरैर्मनोहरैः पंचामृतैश्चाभिषिच्यपूजयामासशंकरं ततःपरमंतुप्राप्यराज्ञीसास्वगृहंगता तत्रध्यानरतासा
पिमध्याह्नेशिवपूजने प्रजातमितिचिंतार्तापूजयामासचेतसा मानसंपूजनंकृत्वामहादेवस्यसादरं निनायकालंदुःखेन
राज्ञीदिनचतुष्टयं ततस्तामहादेवमुपचारैरनेकधा सात्वतुर्गुणितंस्वेनश्रीमहादेवपूजने ततःसायंरविर्दृष्ट्वाशिव
पूजोत्तरंनृप साराज्ञीतमुवाचाथविधृतभूतिविभूषया १४ राज्ञ्युवाच रवेगुरुर्मेजनकःत्वमेवासिशिवार्चकः शिवपूजापरि
त्यागेकागतिस्याद्वदाधुना १५ भानुरुवाच सत्काममहादेवपदांबुजार्चकोवासुरवंप्राप्तुमपिप्रवृत्तः संजीवनीचेन्नरपोस्तु
खेनस्वत्काकथंवावदजीवनंस्यात् शंकराराधनंसत्कानमृतोप्यधितिष्ठति शंकराराधनाभावेजीवनंमरणोपमं वरंमरणाम
न्वहंवरमघौघकोद्भ्राजनं वरंचविषभोजनंवरमपारणाहिंसनं वरंद्विजवधोपिवानवरमीशलिंगार्चनंव्यवायइतिमेमतिःकिमिति
तस्यवाजीवने १८ नमातृगमनेनवाभवतिताद्दृशंपातकंसुरादिमधुसेवनादपितथाविधंपातकं द्विजोत्तमवधेनवानचतथापिधेपा

राम:
२९६

तकं नयाहृष्टास्तु पशुपतिप्रियसमर्चनस्यागतः १९ अनायासेन सिध्यंति सर्वे धर्माः शिवार्चनात् तत्परिस्यागतः पापात् अनायासा
जितान्यपि २० शिवपूजनसामर्थ्यं न जानंति वै दुर्जनाः अत एव न कुर्वंतीत्थं चलिंगे शिवार्चने पापान्यपाराणि लयं प्रयांति शि
वार्चनेनैव शिवार्चकानां न तद्विनाशार्थमतिप्रयत्नः स्मृतेश्चलिंगे समहाघभंगः नकल्पकोट्यर्जितपातकेभ्यो बिभेति भावो भव
पूजकश्चेत् संसारदुःखानि हरस्वरूपं हरस्मृतं वाथ समर्चितो वा पापापहारी गिरिः पवित्रः खलु महादेवार्चनं तद्यतः संसारबुधि
बाडवोपि तद्दितिज्ञात्वा शिवाराधने कुर्वंत्यत्तमवृत्तयः शिवपदाब्जार्चनात्तद्वंत त्यागे पतितो भवेत् अनुदिनं तस्मात्स्यादविरा
मेत्रोदाहरंतीममितिहासं पुरातनं तस्य संश्रवणात्सद्यो मुच्येत पापबंधनात् पुरा हिमगिरेरेकं श्रृंगे रुचिरे परं चचार वा
रूपा कापि सर्वेशामुनती सुतः तेन नाराधितं लिंगं अन्याराधितमेव वा नदृष्टमिति संतोषः दीपकांति विराजितं नबिल्वतरु
मलानि शिवलिंगान्वितान्यपि नाराधिताः शांकराश्च मतेः सर्वं समर्जितं सुरताचारनिरतः तदाचारादरैः सह रतिं चका
र दुष्टात्मा शिवपूजनवर्जितः अहोरात्रं सततं स्त्रीं विहाय तु न तिष्ठति तेनैव कश्चिद्दिवसे न दृष्टो बिल्वतरुर्महान् सच्छायतरुसं
छिन्नं स बिल्वतरुमाश्रितः तया सह स्थितः स्तत्र तरुण्या रजनीमुखे तदानीमागतः कश्चित् शांभवः शिवपूजकः तेन दुरात्मनेमा
लोक्य विस्मितो मौनमाश्रितः अयं प्रदोषकालोत्र तरुणीरतिलालसः बिल्वमूले समाश्रित्य सति घुसघकुलाजेक्षः दृष्ट्वापिमामयं
लज्जां न प्राप्तो विरतोपि वा सुरतानुरतोमया भयापि मदनातुरः मयाद्यद्दूरदृष्टेन दृष्टोयं जारिणीरतः अतः परं कृतं गतं बने बिल्व

पर्येमहान् तन्मूले लिंगमुत्तुंगं शांगं तिष्ठति शोभनं तिष्ठंतिबिल्वपत्राणि करप्राप्यानि कोटिशः इदं गंगाजलं रम्यं अभि
षेकार्हमुत्तमं गंगातीरे लिंगपूजा शांगप्रियतरा खलु गंगातीरतरुः सोयं गंगापतनशीतलः अतएवनतां तानि तत्पत्रा
ण्यपिसर्वथा एतैराराधितंलिंगं शांगोमंगलदो भवेत् अदृष्टंप्रतिबद्धं मे किमेवं रजनीमुखे प्रायः पाणकृतं सर्वं तेनलिंगा
र्चनोद्यमे कृतेपिप्रतिबंधोयं कथं वासमुपस्थितः ९ अयसां प्रतिबंधोपि भयानिवमुपस्थितः शिवपूजनलाभोयं सुलभः
किंभविष्यति भाग्यान्यभ्युदयोद्युक्तान्यपाराणिभवंतिचेत् भवत्येव नसंदेहो निष्प्रत्यूहं शिवार्चनं घोगिरंजन्मलिखितंका
लं घिगिदृमीदृशं अस्मिन्काले यतो नाहं कुंगलिंगसमर्चनं नरासंसारबंधोपि विछिन्नः स्यादसंशयं कृतादृशं भाग्यमभाग्य
योगसायं शिवाराधनसाधनेषु सत्स्वेवलिंगार्चनमद्यतावत् नजातमेतत्प्रतिबंधकेन अहोकथं वाप्रतिबंधनाशो नजायतेजा
तुकृतं नपुण्यं विनाद्य तेनास्य कुतोधुनास्यात्सायं शिवाराधनवृद्धिसिद्धिः येषां दिनपालिनिपातकानि पूतानि जन्मांतरसाधिता
नि तेषां नसायं शिवपूजनेच्छाजातापि सा स्यादसतिप्रवृद्धा असारसंसारविहाररक्ताः कुर्वंतिनारीकुचरिरयोगं तेषां नता
वद्धिशिवार्चनेच्छा तद्दुर्भगा एव यतः स्वभावैः ज्ञात्वापिसंसारविषं पिबंतिपुनःपुनर्जन्मजरादिरूपं नतद्विनाशाय सुधां पिबं
तिमहेशलिंगार्चनलक्षणां ता कथं निधानं सुलभं महेश पूजास्वरूपं निधिरं जनेन विनानरूपं खलु पापनाशः तन्नाशजनकेवल
मित्यवैमि पापराशिरधुनानुमितो यद्विश्वनाथजननप्रतिबंधात् किंविधेयमधुनाममसायं शांगलिंगमपिनेक्षितमेव य

राम:
२९७

दिलिंगविलोकनाद्भुतंस्यादिदमायुः स्वपामेवबातदामे सफलाजनिरस्युमासहायस्मरणादुर्लभमेवदेहिनांतु किंदेहेनकि
मुत्तमेश्चनयने:फुल्लारविंदप्रभैर्वैकिंहस्तैरपिपद्मपत्रसदृशैः किंजिह्वयावातया येनेशोननतानचैरपिमुकुंदेश्रोपिनाशप्रियतोवि
ल्वेस्संस्तुतएवयोगिरिसुताकांताह्वतोतांतकः भक्त्यायोनकृतांतकांतकहृतध्यानाधिरूढाहृदंतेतावसुरवाधमेविद्धरधःपा
तायतज्जीवनं तद्दृष्ट्वायमकिंकरास्फुटतरंहृत्वापहासानयनेयः किंयममंदिरायद्रुतमित्यक्त्वेवेदस्येवन यमदूतरिपुःपरेनरा
येगिरिशानर्चकरवतनयंति यममंदिरमाशुशूलघातैःनिहतंवृश्चिककोटिकूटलग्नं यमकिंकरघोरघोरघातेवरांगं वदिशेतावदेशे
वमत्स्यजालं पततीवकिमद्भुतंनरायंविफलंजीवनमेवतादृशंहि वनेवनेनापिनकालुलोचनंबिल्वीदलैर्वाकुसुमैनवैर्वा किम
र्चयंतीतिभटावदंतोहसंतिकालस्यविशेषकाले जलंप्रक्षिपंतोपिविल्वीदलंवाप्रसन्नंभवंवाफलंवामहेशो तरंसेवसंसारपा
पाहिननंप्रबंद्धांबुराशिंस्मरंतोपिकाशीं ९० अपारोरुपापाटवीपावकानांशिवाराधनानांफलंतावदेकं नकिंत्वद्भुतापार
दुःखप्रपाशाद्यपारापिरम्यापिसौख्यानिनूनं किंयागैरतितुच्छभोगफलदैःस्वर्गोपिकिंवाछितःनुच्छत्वनिराकृतःशिवरतेःस्व
र्गस्ततेपांफलं सायंत्र्यंगसमर्चनेनसकलाभीष्टार्थसिद्धिर्यतोमोक्षोयामलकायतेकरतलेकालोपिकिंकायते ९१ इ
तिश्रीस्कांदेमहापुराणेहिमवत्खंडेशिवरहस्येनृतीयांशेयाज्ञवल्क्यजनकसंवादोनामत्रिंशोध्यायः ३० याज्ञवल्क्यः
इतिस्थिरमतिःसापिशांकरःशांकरार्चने कथंवाविघ्नितंनस्यादितिचिंताकुलाभवत् ततःसुरसरित्तीरभरुहाम्यरितोमुहुः प

इयन्त्यपि न संप्राप वने बिल्वतरुं परं तद्बिल्वमूलविभ्रलसल्लिंगमंगलदायकं दृष्ट्वा हृष्टोपि कुपितः तं विलोक्यातिविस्मितः २
ततः परं चारुशोपि रमणीभोगसाधनं चंदनादिकमादाय पश्चात्समुपस्थितं किं विलंबः कृतश्चेति कुपिता चटुलानना नाथु
नाथ्यागता सापि त्वमनुवारं समाहरात् कर्चंदनं कवामालंकदर्पादि कर्दमः कस्तूरिकाक्षतरम्याः कवाकुंकुमकेसरः ६ कुत्रास्त्यग
रुसारोपि क्षीरं वा घृतसंभृतं फलानि कुत्र पक्वानि कुत्र वा दीपमालिका पाना हेमधुना कुत्र शीतलं विमलं जलं वितानं पुष्प
शय्या वा तांबूलान्यपि कुत्र वा कवाक्षेमरहारादि तद्द्वितीयाभरणानवं क्व दुकूलानि रम्याणि कांतानि विमलान्यपि ९ इति तद्वचनं
श्रुत्वा स्वामिन्सर्वमिहाहृतं गतागताभ्यां कालोपि कश्चिदद्य विलंबितः अपराधोपि सोढव्य इत्येवाचातिविह्वलः सामग्री
मागता पश्य सर्वामपि मनोहरां ततः सर्वं समादाय बिल्वमूले मनोहरे स्थापयामास साचेटी भोगसाधनमुत्तमं ततस्तद्रम रामः
णीं दृष्ट्वा विलंबः किमभूदिति भर्त्सयामास सा भीता हृष्ट्वापरुषभाषिणी ततः परं समुत्थाय त्वावेगेन वरानना किमियं भो
गसामग्री समानीता वने धुना दीपमालास्त्वनया दर्शयेत्याह सत्वरं रमणीतरुणं दृष्ट्वा विवर्णं प्राह सत्वरं ततस्तयापि परितः
दीपमालाः प्रकल्पिताः तद्दीपकांत्याकांतानि वस्तूनि सकलान्यपि ततस्तानि विलोक्यापि स्वस्थानीत्यतिकोपतः आसीत्तज्ज २८
लमादाय लिंगे क्षिप्तं तया रूपो पश्चाच्चंदनमादाय दिव्यगंधसमन्वितं चंदनं च विनिक्षिप्तं लिंगे तुंगमनोहरे पुष्पाण्यपि विचित्रा
णि पारिजातादिकान्यपि तयाक्षिप्तानि तल्लिंगे दुकूलान्यपि सत्वरं पश्चाद्दत्तानि सर्वाणि स्यक्तानि विविधान्यपि लिंगमूले मनो

शानि मधुराणि विशेषतः ततः पपात सा कोपात्तस्मिन् लिंगाग्रे तदा ततः पंचाननोपि तं त्रिलोक्याति विस्मितः तत्सर्वं शांभवो
दृष्ट्वा दूरादेव पुनः पुनः विस्मयं परमं प्रापमानयन्ने वतामपि २० शंकरः धन्योयं कृतकृत्येयं सर्वलक्षणसंयुता पूजां चकार लिं
गे स्मिन् बिल्वमले मनोहरे जन्मांतरकृतं किं वा तया पुण्यं शानि मुख विविधैः साधनैरेवं चकार शिवपूजनं अमरी किमियं किं वा
कापि गंधर्वकन्यका केन पुण्यप्रभावेण शरीरं प्राप्तमीदृशं लोकानां शिक्षणायात्र शरीरं धृतमीदृशं एवं पूजा महेशस्य कर्तव्यो
ति निशानमुखे २४ दिव्यः कुंकुमकेसरादि सहितः पाटीरसारः परः कर्पूरागरुसंयुता मृगमद व्याप्तोपि सन् शिवे माल्यान्यमिता
नि तानि विमला सा पुष्पशय्या तया शर्करा याद्य निवेद्य चंदनयुता साकल्पिता शंकरे कर्पूरसारपरिकल्पित दीपमाला सेयं शिवाराम
न लिंगविशेषकांता युक्ता महाघवनपावकता मवाप धन्ये ममाद्यनयने शिववीक्षणेन अकल्पितः कोयमिहाद्य लाभो भूतः शिवारा
धनदर्शनेन एवं किमभ्यर्चितं शंगलिंगं दृष्टं मया पूर्वमिवं कदावा एतादृशं लिंगमनुत्तमं च रभ्यर्चितं पूर्वमवेक्ष दापि नदा कथं वाजनि
रीदृशी स्यादेतान दृष्टं खलु पूर्वमेव पुण्येन केनापि मयाद्य दृष्टं लिंगं समभ्यर्चितमादरेण एतादृशं पुण्यमयत्न लब्धं धर्मार्थ कामादि
कसाधनं मे भूतोपि सेयं शिवरात्रि रद्य सोमापि पुण्यः खलु वासरोद्य आद्रो न्विला सोयमघापहारं करिष्यती स्नत्रनसंशयो मे २०
मया तु बिल्वोदरु मात्रमद्य प्रदेयमिसेव समागतं च अकल्पितः सोयमिहाद्य लाभः शैलासजा वल्लभ दर्शनेन पुष्पादिकाभ्यर्चित
लिंगमद्य दृष्टं ततो न ष्टमिहाति कष्टं महेश्वरानुग्रह एव वृत्तः सायं शिवाराधनदर्शनेन धन्याः क्वचित् संति शिवार्चकास्ते हेयाः क

ध्वंवासुकृतैर्विनापि अस्यादृशीशुद्धिरिहाभवन्मे तद्बुद्धिजं पापमिहाद्य नष्टं शैवस्वरूपाणि अतिपावनानि दृष्टानि पुण्यैरमितैः कृ
दार्जितं अशेषपापौघविनाशनाय भवेति तावत्सुकृतैरपारैः अलं मतं चेक्षणेन पुण्यैरपि यागादिभिरप्यपारैर्न शिवः खलु
नारमेकदा नावदर्जिह्वे प्रणतोऽस्मि तुभ्यमद्य अपराधसहस्रकोटिकृतः प्रलयं याति कदाचिदादरेण शिवसन्निधानमात्रतो
नावदर्जिह्वे शिवमर्चनं नमोऽस्मि पूजाद्रव्यसमर्चनाय न धनं शक्तिश्च नातः परं तद्द्रव्यार्जनसाधनं च न मितं यद्बौद्धिकं तन्मया त्वत्ता
वत्समुपार्जितासि रसने पुण्यैरगण्यैरतः शंभो शंकर चंद्रशेखर महादेवेति वा संवद मामासं वद संवद शुरसने माहात्म्यमाद
नवाप्नेशे नापि शिवान्यनाम सततं शंभो शिवेत्यादरात् त्वं तावदृश्यादर्शयतीति सिता तुभ्यं मया दीयते क्षीराज्यसमन्वितं शिव
कथापीयूषतृप्तायसि गौरीरमणनामसुधां विहाय वांछापि ते खलु न सारस्य न रसस्ते कस्मादृशो भवतीय न तवान्यवांछास्या
दिसतः परमुमारमणं वद + भव + शु पुण्यैरपारैर्बहुजन्मसिद्धैर्योगैश्च योगैरपि साधितात्वं अतो महादेव शिवेति नामपीयूषमे
वादरतः पिबाशु तिक्तासदासामरसावसिका ततो विरक्ता त्वमिहानुरक्ता महेश्वरापारसुधास्वरूपा नामावली केवलसेनुवेलं
विलोकयेरं नयनारविंदमंदारकुंदार्चितलिंगमद्य इदं कदाचासुलभं तवभ्यादिहाधुना पुण्यवशेन लब्धं यथाधनेनैव जहाति
दीनः तथा सपश्यादुमहेशलिंगं एतादृशस्यात्कथमुत्सवस्यात्कालांतरे तन्न विलोकयेरं नभ्रालब्धकुमारवीक्षणरताः कार्यांतरा
संगताः तद्वत्वं शिवलिंगमर्चितमिदं पश्याधुना सादरं स्वप्नेऽथ स्मृतशंग लिंगरचितापूजायतो दुर्लभा पश्यदं पुनरादरे पुनरिदं

पञ्चप्रपञ्चयाद्दशात् त्वं तावन्ममपुण्यसाधनमतः त्वत्पुण्यकैरार्जितं मेनेत्र्यागविलोकनेनतदिदं सर्वोत्तमनादुर्लभं आसंस्तेनम
यदमुच्यतइतिहन्येवेत्वयासर्वथामामाप्तं तवसर्वथात्पिनयनेजानीहिजिह्वेत्तथा धन्यास्ततरवोपिरंगविलसल्लिंगांगपारोपित।
तस्सेवानिरताःपुनःपुनरतिच्छायातिदानेरलं छत्रंतीतिनचित्रमत्रसुकृतंकिंकिंकृतंतैरपिस्नातुंरावममतःपरंनसहस्रातसंनिधा
नास्सदा धन्यास्ततरवःसपल्लवकुलेरभ्यर्च्ययेसेवतेरांगलिंगमयत्नलब्धविभवास्तपोऽपूर्वैरपि पक्वैरप्यमलैःफलैःरनिल
तस्तावस्वतःप्रच्युतैःएतन्माग्यगुणानुवर्णनमपिप्रायास्मपुण्याब्धिभिः तरुरप्युरगांगलिंगभागे स्थिरएवातितरांकरोतिसे
वां अयमत्रमहानुभावएवस्वभिमानोममतान्निधानमेव ४८ इयमप्यधुनाप्रदोषकाले शिवमभ्यर्च्यसरूपणामुक्ता। स
कृदथविलोकिताशुभानांनिधिमेवमथतात्रहास्पतीह इयमालोकितायन्यापुण्यैरेवमुहुर्मुहुः शिवपूजनसंतुष्टाकथमेवं
मनोरमा ५० अयंप्रदोषसमयःकथंज्ञातस्त्वयाधुना कथमभ्यर्चितेलिंगंरागंसायंशिवाश्रितं कल्याणरूपःकरुणानिधा
ननिधानरूपःगिरिजासहायः तुष्टोधुनालिंगसमर्चनेननसायंनसंदेहविपर्ययोमे किमथकंलिंगेयदिपततिपत्रंकरगतंनवंवा
शुष्कंवाज्ञाठितमपिलिंगे तदृषिरूं अथतावद्दूरेसद्रूदपिकरोतीतिविदितंप्रसन्नाद्यै लिंगंपुनरिहकिमभ्यर्चितमिति अहोमहारव
मुमासहायंदृष्ट्वासमुद्रंनसेवदेवदः नेदवदृष्टेदृशपितत्स्वरूपंविज्ञातमेवेतिमतिर्ममाभूत् इत्युक्त्वासमहाशैवःमहापूजासमन्विते
लिंगंदृष्ट्वाप्रहर्षणाप्रणतोपिमुहुर्मुहुः ततःपरंसमुत्थायकोमलैर्बिल्वपल्लवैः पूजयामासगिरिशंपंचाक्षरपुरस्सरं ततस्ततोम

होदेवप्रणतोपिमुहुर्मुहुः विमानेप्रेषयामासगणेर्भृंगीश्वरादिभिः दृष्ट्वातेषांसमारंभंमार्गेनारायणादयः तैःसहैवतदा
सर्वेतत्रतावत्समागताः तद्दृष्ट्वालिंगमुत्कृष्टंपूजितंप्रणताःसुराः विस्मयंपरमंप्रापुःगणानूचुस्ततःपरं ५९ देवाऊचुः
भोहोगणानमःसर्वेयूयंशंकरपूजकाः अतीतानागतज्ञानसंपन्नाःशिवपूजया केनेदमर्चितंलिंगंतुंगेबिल्वसमाश्रितं
तस्यपुण्यप्रभावस्यनावधिर्दृश्यतेपरः सयंप्रदोषसमयःकामधेनुरिवागतः एतत्पूजकभाग्यानिक्षीराकाराणिदास्यति
कथंवामहतीपूजाकृतापुण्यप्रवर्धनी एतत्पूजावीक्षणेनाप्यानंदोवर्धतेमुहुः पाटीरादिरसानुलिप्तमधुनाकस्तूरिकाकर्दमैः
कर्पूरागरुसारसारसुरसैःवन्यैःसुगंधेर्युतं लिंगंमंगलदायकंखलुवनेदृष्टंप्रहृष्टंमुहुः कस्तेनार्चयितुंप्रवृत्तमधुनापुण्यैर
पारैःखलु ६० पाटीरगंधेनकिलाधुनेदंवनंसगंधंभ्रमरावृतंच एतादृशंचंदनमद्यदत्तंकेनात्रलिंगेरजनीमुखेस्मिन् यो
लिंगेरजनीमुखेतिसुभगोदद्यात्मुदाचंदनंकस्तूरिसहितंसयातिसदनेगंधप्रसन्नेमुदा यानेरत्नसमेतमेसससहंसाहा
भाग्येर्युतःशोभनंतसुपथावधिर्खनेतिविदितंमौलैरपारैरपि पुण्योद्भयोयंकथमद्यदत्तोलिंगेमहापातकनाशकोस्मिं ना
नाविधापारनवप्रसूनैःअभ्यर्चितंलिंगमिदंमनोहं अस्मिन्ननमूगमदेपूरोद्गतितिविषादकोटिकूटानां समुद्भयमपहर्तुमे
वमर्चुःगिरिवरराजतिवेषकन्यकायाः ६१ यत्रक्वापिसमर्चितंयदिमहालिंगंतदासर्वदासर्वाघक्षयएवलिंगमधुनालिंगं
सम्मेलयदि पुष्पाद्यैरपिपूजितंयदितदासांपूजनैर्वाफलैरणुभिधिसमर्पणायपतनेलिंगाश्रितःशंकरः पुण्यान्यप्यमिता

रामः
३००

नितावदधुना तत्र स्फ लायोन्मुखान्येवेति प्रमितिः किलाभवदियंपुण्यैरपारैः खलु धन्यंधन्यमिदंशरीरमधुनाधन्येमचेन
त्रीबुजेलिंगेदृष्टमभूतपूर्वमसदृतबिल्वादिभिः पूजितं इतिस्ववचः श्रुत्वाभृंगीमंगलंवचः उवाचपरमंश्रीमानी
नेदवान्शिवपूजकान् भृंगुवाच तदिदंकौतुकंदृष्टंमहादेवविचेष्टितं सन्नाकरः स्वभावेननाम्नापिखलुशंकरः दीनबं
धुरितिज्ञातः कृपासागरोहरः एतदानयनायाद्यप्रेषयामासमांशिवः इयंतुजारिणीसोपि जारजोरतितत्परः चकार
वासमत्रापिविजनेसवनेवने आनीतंस्वोपभोगार्थंचंदनादिकमुत्तमं एतदानयनेकोपिविलंबःसमभूत्खलु ७५ एतस्या
स्त्वाहूलंबनेरोषःखलुमहानभूत तेनरोषेणसादुष्टाभर्त्सयामासतंपतिं ततःपरंदीपमालातदानीतावलोकनं कर्तुंवि
रचितारस्यास्थलकर्पूरबिल्वना ततःसर्वंविलोक्यैवंचंदनादिकमुत्तमं सुरत्नकलशानीतंजलमप्यतिशीतलं तल्लिंगे
पातयामासदुग्धमासीत्ततःपरं दध्याज्यमधुमिश्रंचशर्करापातितातत्तः पातितंचकुलंपश्चात्चंदनंचमनोहरं कर्पूरे
णान्वितरम्यंतथामृगमदान्वितं पातितान्यपिपुष्पाणिदिव्यानिविविधान्यपि दुकूलानिमनोज्ञानिसुरत्नाभरणान्य
पि पुष्पशय्यापिदत्तेयंशिवलिंगस्यमस्तके दिव्यान्यन्नानिदत्तानिलिंगमूलेतयाततः रोषेणपतितासेयंप्रपातेववि
भातिसा भक्त्यानलिंगमनयापूजितंरजिनीमुखे महेश्वरकृपासिंधुस्तुष्टोनेनार्पितेनच चंदनादिसमर्पणेनलिंगेतुंगे
मनोहरे पवित्रायदिभस्माद्यैःभक्त्यालिंगसमर्चनं करोतिबिल्वपत्राद्यैःस्वदेशस्थपदस्पदः शिवाभिमानेस्मरलुमकेमेव

लिंगं तु तुंगमनामर्दं वा तन्नामर्दं वा शिवलिंगमात्रं गृह्णाति रत्नं स शिवो जलं वा कमलान्यमलानि बिल्वं मालां नव दूर्वांकु
रसं कुलं महेशः शिवलिंगनिवेदनेन गृह्णात्यमिताघौघलिंगारत्यापत्रं शंभुः भक्त्या विनापि किरु दत्तं न नंप्रसन्नि बिल्वीदला
निसंकुलदारतो गृहीत्वा भुक्तिं ददाति सुबहूनि सुखानि दत्वा लिंगार्चकाय गिरिशः शिवलिंगसंगः रोषेण दोषवशगेन विमो
हितेन लिंगे निपातितमनर्घ्यमघापहारि गृह्णाति तावदुद्दलं मुखेमनु लिंगे शंगस्यतावदिति ममतिरित्स्वयेवेमि. लिंगाराधनसा
धनानि विविधान्यानीय भक्त्या मुदा यो लिंगार्चनतत्परः शिवरतस्तस्मै महेशः स्वयं दातुं वाञ्छति वाञ्छितार्थमसकृत्तन्नोदयम
स्यास्मृतः तत्सर्वं खलु दुर्लभं चलमते विश्वेश्वरानुग्रहात् ९० फलमपि सजलं वा शंकरो भक्तियुक्तैर्निहितममललिं
गं वंद्यबिल्वीदलं वा गिरिवरसुतयायं साकमेव प्रभुर्गृह्णात्यपि पुलरपि मूर्ध्नि तद्विधत्ते महेशः ९१ स्नेहं करोति गिरिशो निज
पादपद्मपजारतेति विरतविषयेषु बाले हृदुविवास्यवस्तुअपमुखतुल्यमेव लंतावदाभुमनुते त्वसुखं सुखानि भजनीयोय
रिमुदा तरां मृकंजयः परं भजनीयस्तत्समानो दयालुर्न भूतो न भूतः आनंदयत्यसकृदादरतः पितेवा दत्वा सुखानि विविधानि
विपद्विनाशं कृत्वा विमुक्तिमपि तां च ददाति भक्त्या संपूजितः सकृदुमारमणोऽत्र लिंगे तस्मादयं नास्ति लोके पुनर्लभक्त्यातात व
द्विल्वदायायविमुक्तिं दत्वापरस्य सादरेणानुरक्तेः लिंगार्चयो लिंगपूजांप्रियोयं ९५ लिंगे संनिहितो यथा स गिरिशस्तद्वन्न कुत्राप्यतो
लिंगाराधनमेव साधनमिदं साक्षाद्विधानं परं तत्तावद्भुवि नाति काम्यमसकृन्मुक्तिं प्रयच्छत्यतः तस्मादप्यधिकं किमस्ति भुवने तत्रैव

जानीमहे लिंगादेवसमस्तमेतदधुनाजातंजगन्मंडलंयेनाखंडलकोटयोपिजनिताः भूर्वैविधानोगणाः किंनारायणकोटयो
नजनितास्तस्मात्तदस्तत्वमंशौगलिंगमुमासहायनिलयंमन्येतदभ्यर्च्यते सएतदेकंशिवलिंगरूपेनिधानमीशाननिधान
दाने समर्थमेवेतिमतिर्ममासीदतोपिलिंगार्चनेनमिष्टहेतुः शांगलिंगमनुस्मरन्शिवशिवसंभुर्जरन्संचरन्काशीनाथपु
रे विभूतिकवचारुद्राक्षभूषाश्रयः श्रीवीरेश्वरमर्चयन्अभिनवैर्बिल्वादलैःकोमलैः इंद्रस्यापिचकारनैवगणनांहारःप्र
वीरःखलु हारापामतिदुर्लभेनभुवनेहृष्टेप्ययंदेहारस्त्वसतिदुर्लभेतरस्तिरत्किं दुर्लभेवाभवेत् रुद्धोयनविशेषतःसु
रमपि तस्यापिकिंदुर्लभः कावस्तस्यनकाचखंडविषयेवांछापितुच्छाकथं १० हारतेसुरभूरुहःसुरमणिस्तत्कामधेनुःपु
रास्तस्मादप्यधिकंनवस्तुविषयेदृष्टंश्रुतंवासुराः तस्माप्याशुमहेशपूजनरतःप्राप्नोतिसाक्षात्छिवंसंप्राप्याशुसुखंबुधानपि
ततोहारःसलोकोत्तरं इत्युक्तेतद्वचःश्रुत्वातेसर्वेत्रिदशास्तदा विस्मयंपरमंचक्रुःदृष्ट्वातांपतितामपि पश्चाद्गौरीसभागतम
भूतिपूतांचकारतां ततस्तामाहसुभगेधन्यासिवरवर्णिनी २ एहिरत्नविमानंतेसमनीतमिहाधुना प्रेषितंगिरिशेनेदंवि
चित्रंमतिसुंदरं इत्युक्तेतद्वचस्तावत्तयानश्रुतमेरवा गाढनिद्रासमाक्रांतापश्यंती स्वप्नमुत्तमं स्वप्नेददर्शसालिंगमुत्तुंग
गिरिसन्निभं दृष्ट्वातत्सजनोद्युक्तासाताबहिर्व्यसाधनैः पंचामृतप्रवाहाद्यैःअभिषिच्यमहेश्वरं पूजयामासबिल्वाद्यैःपल्ल
वैरतिकोमलैः पुष्पाद्यैरपरैश्चपाटीरैरसकर्दमैः दिव्याभरणैर्दिव्यैः दुकूलैरपिभक्तितः धूपरासिसमुत्सन्नभ्रमराजिभिरत्र.

मैः शोपमालासमहैश्वनैवेद्यगिरिभिर्मुदुः चंद्रमंडलसंकाशैर्वितानैरर्पिकोटिशः रत्नकुंभैरपारैश्च ध्वजैरप्युरुचामरैः गा
थैर्गानैश्च विविधैः पूजयंती सदाशिवं ददर्श शांभवस्वंप्नं शिवार्चनसमुद्यतं स्वप्नेतामाह भगवन्कुतोयसमुपागतं गत
वंतेकुवाविद्वन्निहसंवसस्संवस समर्चयमहादेवं साधनैर्विविधैरपि अपक्षितं चेद्दयंतेमयाधनमनुत्तमं उत्तमासि सभाग्या
सि शांभवासिद्विजोत्तम १ शांभवायधनंदेयं मयातावदुपार्जितं दानपात्रमयाहृष्टं अद्यैवसुकृतैरिह त्वत्तुल्यं दानपात्रंच
नहृष्टंभुवनत्रये हारामनोहराः संति केयूराद्यानि संतिमे दिव्यान्याभरणान्यवरत्नानिविविधान्यपि गोधनानिविचित्राणिसंति
मेरत्नमंदिरे तिष्ठसेकं गृहाणत्वं कृत्वाथोस्मियतेधुना किंचापरंशंकुरुमेशैवमंत्रस्यैकवक्तं विचित्राः संतुमंत्रास्तेषांकृस्नेन
मसुने शिवपंचाक्षरेणैवपूजनीयः सदाशिवः सत्वरोचेत्तमह्यंदेयः पुण्यदिने शुभे सर्वपापहरत्वेन श्रुतः पंचाक्षरो मया अ रामः
नस्तमेवमेदेहि सर्वपापविनाशकं २० मंत्रराजतयाज्ञातः शिवपंचाक्षरः परः तन्मेवोपदिशाद्याशुपुण्यकालोयमद्भुतः पंचा
क्षरोपिद्विविधः संहितोपनिषकृतः तत्रयोरोचतेमंत्रं सदेयस्त्वावदादरात् इतितद्वचनंश्रुत्वासोपिशांभवपुंगवः तामुवाच
विरक्तोसौसर्वसाधननिस्पृहः शांभवउवाच किंधनेनंभ्रैरभैः किंमतेमेविभावो: नरत्नमंदिरे यापिकृत्यमस्तिममाधु
ना नचित्रवसनैः कृत्यं नवागोमंडलैरपि किंचभूमंडलेक्वापिनेमभवतिसर्वथा नस्वर्गलोकवांछामेसत्यलोकोनवांछितः ३० र
वैकुंठलोकसंछापिनास्तिसर्वात्मनामम सर्वेतेप्रलयंयांतिमहाप्रलयवन्हिना उडुंबरफलोपुन्नमशकाइवभांतिमे नतन्म

शाकवांछास्ति लोके कस्यापि सुव्रते पठितो दुर्वरफले स्वर्गे वा तुल्यधीर्मम दुर्भगाः खलु वांछंति स्वर्गवासं तथासति तत्रा
पि वांछास्ति सत्र वांछा तव धनेन कथं यद्यस्ति धनमुल्लुंठनदातरधुना धनैः पूजयस्व महादेवं विलंबं मा कुरु प्रिये २० पद्मप
त्रस्थजलोपमं मनो जीवनं च चलमेव तच्चिरं नाधितिष्ठति ततस्त्वमीश्वरं पूजयस्व शिवलिंगमस्तके यदेव धनमुल्लुंठनस्त
वै लिंगमस्तके प्रयच्छ त्वं च विषये तुच्छा सा खलु सर्वथा प्रार्थनीयो महादेवः पुनः पुनरुमापते विषयेच्छाविनिर्मुक्तं कुरु मा
मिति सादरं विषयास्ते विषप्रायाः सर्वे साम्यास्वभावतः विषयेच्छालुरकानां सुखं स्वप्नेपि दुर्लभं विहाय विषये वांछां कुरु
शंकरपूजने शिवपूजनसामग्री संपन्ना खलु तस्य दुर्लभं मानुषं देहं आसाद्य शिवपूजनं यदि न क्रियते मोहात्तदा जन्मनि
रर्थकं भारभूतं शरीरस्य दानीशार्चनसाधनं शरीरस्य समेतावत्सतां शंकरपूजनं अभाग्यैर्यौवनोन्मत्तैः सर्वदा मदनातुरैः
नाराध्यते महादेवं स याति नरके ध्रुवं तरुणीरमणीं दृष्ट्वा सहसंति वदंति च न वदंति महादेवं पाहि पाहीति सर्वथा बाले माम
हि मां हि मामहीति वदंति ते उन्मत्तास्ते शिवं तावन्न वदंति कदाचन अमूल्यानि विचित्राणि दुकूलानि प्रिये त्वया ग्राह्यावी
ति वदंत्यज्ञा शंकरानर्थितान्यपि दिव्यं मृगमदोपेतं चंदनं दातुमिच्छति वधूस्थानमहत्वाय लिंगे दातुं स वांछति हारानुदारान्नादा
यमुवतीस्तनमंडले ददाति न महालिंगे हारं दातुं स वांछति रत्नताटंकमानीय वनितायै प्रयच्छति नश्वरे लिंगे दातुं वा स्य
वांछा प्रजायते दिव्यगंधफलीमालां मृदो बालालागलेपनं प्रयच्छति महालिंगे तां न दातुं स वांछति अभाग्यास्ते समुत्पन्नाः

वैभवारतांगताः नहारत्वमनुप्राप्यकुर्वंतिशिवपूजनं शिवंवांछतियोनित्यंसत्वंशिवपूजनं करोतितावदन्यस्तुनकरोति
शिवार्चनं तस्माच्छिवंजन्मनिजन्मनीतिमन्येनयस्यास्तिशिवार्चनेच्छा शिवार्चनेच्छाशिवहेतुभूतासातावदस्यत्तमगाक्षि
तास्यात् कल्पांतेपिजहातियोनमलसाविश्वेशलिंगार्चनेवांछां तस्यहरेणपुंभिर्जगदिदंपूतंभवत्यन्वहं तेनवंदेमुहुरादरेणाविर
तंसंसारवार्त्तारसिकसारातिसमर्चितांघ्रिकमलध्यानादरंसंततं संतःशंकरपुंगवाइतिमयाज्ञातास्तदाराधनाहीशाःपूजितए
वतस्यसुकृतांभोधेपरांभोरुहं हृद्देवपल्लवप्रयाय्यधकुर्वतस्मैनमस्तत्परं मन्येशंभवपुंगवादपिपरांकिंभूतलेतिष्ठति शिवंव
इतियःसदाशिवमनस्मरत्यन्वहं शिवार्चनरतःसदाशिवशिवेतिवाचावदन् पुनातिभुवनत्रयंसशिवएवनकेवलंनरंपरम
लिंगमित्यपिवदंतिधन्योत्तमाः १५२ इतिश्रीस्कांदेमहापुराणेहिमवत्खंडेशिवरहस्येतृतीयांशेउत्तरखंडेयाज्ञवल्क्य
जनकसंवादोनामैकत्रिंशोध्यायः ३१ श्रीसांबशिवार्पणमस्तु याज्ञवल्क्यः इतितद्वचनंश्रुत्वावारणस्यापिभा
मिनी तत्रप्राप्यातिवनिताप्राहभक्तिपुरःसरं १ वारणांगनोवाच यदुक्तमधुनाविद्वंस्तत्सत्यंनात्रसंशयः विषयेषुनवांछा
मतावदघंप्रजायते २ शिवपूजनमात्रेणतावदघंप्रजायते विषयेविपरूपेधीनजाताद्यविशेषतः शिवएवसदाकिलार्चनीयः
शिवदानप्रवणामहेश्वरेमे मतिरद्यकथंविदेवमेतःकरणांतत्रसमर्पितमयापि येनांतःकरणेनशंकरपदध्यानंक्षणंवामुकुः
जातंतत्सकलार्थदाननिपुणंमन्येतरत्साधुना दत्तंशंकरपादपंकजरजःपुंजेतरत्यार्चितंतेनक्रीडतितावतापिजननंतावत्कृतार्थं

मम शृंगारदर्शने शृंगारकथासुधायां शैलेंद्रसंगे पि शिवालयेपि इच्छा प्रवृत्ता कथमद्य सेयं स्थिरा भविष्यति धुनावेदर्दं ६ शौनक
र उवाच धन्यासि ननं सुभगे तवाद्य यतां मतिः शंकरलिंगपूजां कर्तुं प्रवृत्ता किमिति विभाग्यं ततो धुना तां कुरु सावधानं पुरा
कश्चिद् भूद्राजा हिमवद्गिरिमंडले स सर्वभाग्यसंपन्नः पुत्रपौत्रसमन्वितः तस्य कन्या भवद्धन्या कमलामललोचना सा
तावद्बाल्यमारभ्य शिवार्चनपरायणा। शिवगानरता नित्यं शिवव्रतपरायणा श्रुत्वा शिवकथामेव न कारद्दिनयापनं सा
हिमालयकूटस्थं दृष्ट्वा शिवमंदिरं प्रासादवरमारुह्य वीणावादनतत्परा शिवालयस्थलभृंगात्कश्चिद्वायुरुपागतः तेन वा
तेन संबंधः सुगंधोप्यागतस्ततः तेन गंधेन हृष्टापि सुगंधानि प्रतीक्ष्यं ततः परं पुष्पमालाप्येका तावदुपागता तां मालि
कां विलोक्य शुभ्रमद्भ्रमरसंयुतां विस्मयं परमं प्राप केयं कस्मादुपागता भूमंडलेन दृष्टानि पुष्पाण्येतादृशानि तु एतच्च
सूननामापि ज्ञायते न नरैः खलु सुरमंदारपुष्पाणां किमियं मालिकाथवा लोकांतरस्थमंदारपुष्पमाला किमीदृशी गंध
वैर्नरो समुत्पन्नपुष्पमाला किमीदृशी यद्वा किंनरलोकस्य पुष्पमाला भविष्यति नागलोकसमुत्पन्नमंदारकुसुमोद्भवा मा
लिकेयमुतान्येति चिंताव्याकुलमानसा ततो विमानमारुह्य सा ययौ शिवमंदिरं सा तत्र मंदिरं दृष्ट्वा शंकरस्याति विस्मिता र
त्नगोपुरसंकीर्णं रत्नभित्तिविराजितं रत्नप्राकारसंयुक्तं रत्नद्वारविजृंभितं तत्र लिंगं ददर्शाथ मणिमंडलमंडितं दीपकां
तिसमाक्रांतरत्नमालाविराजितं हारतोरणसंयुक्तं दिव्यपुष्पसमर्चितं हारकोटिसमाक्रांतं स्तुतं वैदेरनेकधा ददर्श कन्यका

श्रि -२

तत्रनाट्यगानविशारदां सौंदर्यनिधिरूपांतांप्राहबालांमनोरमां कासिकन्येविशालाक्षिसंप्राप्तनिवयौवने कः पितातव
माताचकाभर्त्तातिवर्ततिष्ठति गानविद्यासमस्यस्ताकुतोवातेगुरुश्चकः इतिपृष्टामुदाप्राहसातांगंधर्वकन्यका गंधर्वकन्यको
वाच गंधर्वनगराधीशः पितामममहाशोभनः सएवमेगुरुर्गानमभ्यस्तमतिसुंदरं ममव्रतमिदंनित्यंश्रीमहादेवपूजनं
निसगंधर्वनारीणांसर्वासामपितद्व्रतं पुरुषाणांविशेषेणाव्रतंशंकरपूजनं श्रीमहादेवपूजायांचित्तंमेनिरतंसदा अनेनजी
वनंधन्यमस्माकंशिवपूजनं धनंधान्यंनिधानंचजीवनंचफलंमहत् इतितद्वचनंश्रुत्वासाबालाविस्मयंगता तामुवाचाति
यत्नेनगृहीत्वापुष्पमालिकां येतानिकानिपुष्पाणिपुष्पनामापिकिंप्रिये कुत्रास्तिवनमेतेषांतत्प्रदर्शयसादरं इत्युक्तं
तद्वचः श्रुत्वानाट्यकालोयमीदृशः गानस्यापीतितामाहसातत्रोवासमंदिरे आसायंतत्रनाट्येनिरतासायंकालेमनो
हरे स्नानार्थंनिर्गतातत्रस्नातागंगाजलेशुभे ततोगंधर्वनगरादागतान्शिवपूजकान् दृष्ट्वातेःसहसाप्रापदिव्यंशंक
रमंदिरं तत्रोपचारैर्विविधैःपूजयामासशंकरं पुष्पैरपारैर्विविधैर्वस्त्राद्यैर्मनोहरैः ततोनिवृत्तास्तेसर्वेपूजयित्वामहेश्व
रं सातत्रगानेरतानृत्यन्मंदिरेस्वकं ततस्तांप्रमदांदृष्ट्वातामाहयुवतीमुदा एहिभद्रेस्वनगरंसमाप्तमपिपूजनं प्रदोष
कालोपिगतःत्वस्यैसाहसादरं सातमाहप्रियंलज्जांस्यक्त्वाभागरतितथा गंधर्वनार्युवाच गच्छगच्छरथेष्टत्वेयत्रकुत्रापि
रोचते ममात्रैवास्थितिस्तावद्यावद्देहविसर्जनं दुर्लभंखलुसंप्राप्तंइदंशंकरमंदिरं अतःपरंनगंतव्यंकुत्रापिनरतिर्मम ५०

नि

रामः
३०४

कालेनैयामयासायं श्रीमहादेवपूजया अलं जीवनवार्त्ताभिर्भोगवार्त्ताभिरप्यलं अपूर्वभोगो न क्वापि योभुक्तो विषयः पु
रा तत्रतावन्ममवांछा नाहारेपि मतिर्मम अत्रनाट्येन गानेन पूजयाम्यमहेश्वरं प्राणनीयोमया प्राप्यं कैलासस्थलमुत्त
मं अपारजनिदुःखानि विनश्यंति शिवार्चनात् कैलासेतु विशेषेण श्रीमहादेवपूजया व्यर्थं जीवनमित्येवं मे गिरिस्थान
मर्चनालेवलं तत्तावत्सफलं भविष्यति तदा विश्वेश्वराराधने संसारेकिमसारेस्तु विषये बुद्धिः सतांजायते किंतच्चर्वित
चर्वणैरपिचिरं वार्त्तारसैरप्यलं इत्युक्त्वा विरतातेन वार्त्ताभिरपिसादरं गाननाट्यरतानारी शिवार्चनरतापि सा तां विलो
क्य प्रहृष्टासा राजकन्या मनोरमा चचारवसतिं तत्र शिवार्चनपरायणा रात्रौ जागरणं कृत्वा नाट्यगानपुरस्सरं अवापपर
मां प्रीतिं पश्चान्मुक्तातया सह एवं भाग्येन संप्राप्य जन्म शंकरमंदिरे पूजयित्वा महादेवं प्राप्नुवंति परं सुखं अतः संसा
रवार्त्ताभिरलं कमललोचने पूजनीयो महादेवो विभवे सति साधनैः ५० तज्जीवनं व्यर्थमिति स्मरंति ये नरा पादांबुजं मर्त्ति
तेन तज्जीवनं धन्यमिति स्मरंति येनार्चितं लिंगमपारपुण्यैः धन्यं मन्ये जीवनं तस्य लोके यस्येशान ध्यानमेकं वरेण्यं आशा
संस्पादन्यदाशास्यमस्मिन्लोके नास्तीत्येवमन्ये सतां तु विरतः सततं लोकाः पूजयंति सदाशिवं लिंगवीस्वैर्जलैर्वापि फलैर
पि मुहुर्मुहुः कोवा शिवमनाराध्य सुखं प्राप्नोति मानवः क्षुधितो भोजनेनापि विना तृप्तोपि किं नरः सौभाग्यकामा अपि पूज
यंति महेश्वरं पापविनाशकामाः ते स्वर्गकामा अपि पूजयंति तं मोक्षकामा अपि पूजयंति ५४ स्वर्गापवर्गप्रदमेकमीशं मत्वा शिवा

वाचारताः प्रशांताः लिंगे महादेवमुमासहायं समर्चयंति प्रमथाधिनाथं अल्पायासेनैव संसारबंधो विच्छिन्नः स्यादिति मतो
लिंगपूजां कुर्वंतीति सकलः प्राप्नुवंतः स्वाभीष्टार्थानि ते पुनः पूजयंति कल्पानि नश्वरं संसारखिलानितानि यैरिष्टलाभोपि ना
देवोपि महेशलिंगार्चनमात्रेणातः शिवार्चनेनैव सुखानि लिप्स्ये शिवप्रसादोपि शिवार्चनेन भवत्यतस्तेन हितार्थसिद्धिः ना
न्येन तत्सिद्धिरिति स्मरामि नान्येन सा मुक्तिकथा विनेनं संसारदवसंक्रांताः सकलाः परितापिताः शिवार्चनमहावृष्टिधारां
नोऽभुतिसंततं पापानलमहाज्वालाजालविच्छेदसाधनं शिवार्चनं सरिताः परयत्नाभिवांछितं संसारकंटकदुष्टानां दुर
दृष्टमेति भवेत् सा मतिः सहसा तावत् न नश्यत्यशिवार्चने शिवार्चनानलेनैव कष्टराशिर्विनश्यति सर्विजललवैः शां
तः कदाचिदपि जायते महाप्रलयकालाग्निस्वरूपाघकुलक्षयः शिवार्चनमहावृष्टिप्रवाहे रुपशाम्यति यावन्न संसार रामः
महाग्नितापस्तावच्छिवाराधनवृष्टिपूरः संपादनीयस्त्वरयात दातु तदर्जनं किं भवतीह शक्यं संसारदुःखदवकोटिविनाश २०५
नाय लिंगार्चनांबुधितरंगपरंपरायां सृष्टिः कृताखलु शिवेन कृपापयोनिनान्येन तस्य विलयो भवतीति मन्ये जंबूद्वीपनि
वासिनां खलु महद्भाग्यं शिवाराधनादाप सर्वतनाशेने सति मुहुर्भोग्योदयो जायते पश्चान्मुक्तिरपीति मान्यमतुलं संप्राप्यते
केवलं लिंगेशं रूपे न जनेन न तदिदं साक्षात्सन्निधानं स्मृतं न स्वर्गेपि तथाविधं सुखमिति ज्ञातं मया सर्वथा कैलासेपि न सर्वथा भुवि य
था लिंगार्चनाल्लभ्यते लिंगाराधनपुण्यजातजनितः कैलासवासोयतस्तल्लिंगार्चनमेव तावदधिकं पुण्यपुण्योत्तमं इतितद्

चनंश्रुत्वासापिसंतुष्टमानसा शिवपूजारताजाताविविधैःसाधनैर्मुदा ततःसैवाथसंप्राप्तगणोऽक्षवचनैस्तदा समुत्थायातिविं
तार्त्तोनिमीलयनयनांबुजे ततःपरंगणैरुक्ताविमलंवरमुत्तमं आरुह्यायाहिसुभगेकैलासभुवनंप्रति इतितद्वचनंश्रुत्वासाता
नाहातिविस्मिता रोषाक्रांतापितेषासुहितानाहितपुरस्सरं ७२ चारुणानार्युवाच पुण्यसाधनमेतस्यशिवलिंगार्चनस्यच विघ्नं
करोतिकांतस्यगतिर्भवतितद्वद इतितद्वचनंश्रुत्वा भृंगीप्राहातिविस्मितः शिवज्ञानांकुरस्येयंभरकत्वरितिसादरं भृंग्युवाच स
म्यक्सृष्टमिदंभद्रेभद्रमस्तुतवाधुना शिवार्चनेकथंभक्तिःतवजाताविमुक्तिदा धन्यासिकृतकृत्यासिमान्यासिमनुजेश्वरैः अभक्त
पूर्वातेबुद्धिरधुनासमभूत्कथं प्रश्नोत्तरस्यश्रवणादपिपापविनाशनं भवत्येवनसंदेहःप्रश्नोप्यघविनाशकः अत्रैवोदाहरंती
ममितिहासंपुरातनं पूर्वमत्रैवसनकश्चकाराशिवपूजनं रम्यैस्सुरसरित्तोयैःउत्फुल्लैःकनकांबुजैः चंदनाद्यैरपारैश्चकनकैरपिनि
र्मलैः बिल्वैर्द्रोणैर्जपापुष्पैःकेतकीकुसुमैरपि करवीरैरर्कपुष्पैर्नवदूर्वांकुरैरपि अर्कैर्मंदारकुसुमैर्देवकांचनसंयुतैः हेमगंधफ
लीपुष्पैःपुन्नागैरन्यैरपि कर्पूरदीपमालाभिःधूपधूमैर्मनोहरैः क्षीरान्नैरपिपक्वान्नैःकदलीफलसंयुतैः द्राक्षालसालसंयुतैः
जंबजंबीरसंयुतैः अन्यैरपिफलैर्युक्तैःपूजयामासशंकरं शिवार्चनप्रभावेणासकंपमवनीतले शिवार्चनतपोभूमिःकिंकर्तुमभिवांछ
ति इदंपरंतपस्तस्माल्किंवावांछतितत्फलं इतिदेवाश्चसंक्षुब्धाःकिमयंवांछतीत्यपि विचारपापरंश्रांताःसुराजपिपरस्परं शंभवोः
किंलशःश्रांताश्चारणाःकमलानने किंवापदंवांछतिसोयमीशांलिंगेसमभ्यर्च्यविशेषतोद्य वैकुंठवासंहिपदाभिवांछन्नतस्याऽलि

गार्चनतत्परस्य यतेतितुच्छत्वमीतिःप्रभुतावैकुंठलोकेपिविशेषतस्त स्वर्गादिलोकेषुनतस्यवांछानिधानवा - - - - एवं
शिवाराधनतत्परोसौ तद्वधमेनकथमिंदुमौलिः संपूजितस्या किमभीष्सितंवातस्यास्तिनसायतएवसत्यं अहर्निशंलिंगसमर्चने
ननयस्यैककालमतःपरंवा नजायते तद्विरतिःसहस्रासालिंगपूजासकलार्थहेतुः इतिसर्वेविचार्यशैरंभामूचुःपरस्परं तस्माद्यया
त्वयाविघ्नःकर्तव्यइतिसादरं इत्याकर्ण्यवचस्तेषांरंभापिभयविह्वला तानुवाचातियत्नेनकृतांजलिपुटातदा ॥२२॥ रंभोवाच तपो
निधिःस्तत्रशिवार्चनेनमकालंनयत्सेवजितंद्रियापि तद्विघ्नमात्राचरणप्रवृत्तिःकथंममस्यादितिखिन्नचित्ता यमिनांसवरस्तस्यशि
वार्चनरतस्यच कथंमस्यहलेशोपिप्रसरिष्यतिवस्ततः तत्रमस्यहृदयस्थानमनोपिप्रवर्तते स्वारस्येनतत्रस्तत्रकथंविघ्नोभविष्यति
यःशिवार्चनविघ्नार्थंयतेतमोहतस्तस्य प्रवृत्तस्यैवविघ्नस्यासमुतास्यापकारकः शिवार्चनेनाशुजितेतोकोटिःयस्तत्रविघ्नावसरोपिको
वा सूर्योदयानंतरमंधकारः किंलक्षतोवाभवतिप्रवृत्तः महाघशैलस्यहेतुमतःशिवार्चनाकारपविःसविघ्नान् तृणास्वरूपानप
हर्तुमाशुकथंनशक्तोबदतद्विचार्य अस्माकंभाग्यहीनानांसर्वदाशिवपूजने नबुद्धिस्ताहशंभाग्यंबहुपुण्यफलंखलु यःशिवार्चन
विघ्नार्थंमोहाद्यत्नंकरिष्यति। सततस्कलमवाप्यापिदिंजीवतिविशेषतः यःशंकराराधनविघ्नहेतुःतज्जीवनंव्यर्थमितिस्मरामि स
एवतावत्नरकेविवासंकरोतिकल्पावधिसर्वथापि मुदाशिवार्चकान्दृष्ट्वायेनमंतिप्रयत्नतः तेपियांतिशिवंनूनंतैःसहैवशिवार्चकैः शि
वार्चकःकिलापारपातकानलएवसः विघ्नतूलाशभागस्यसकिंनैवविनाशकः पूजनीयाविबुधोपिमान्योपिशिवपूजकः तद्विघ्नाचरणे

रामः
३०६

नैवकृतं स्वस्यात्मकार्ये अहो दुर्बुद्धिरुत्पन्नातीद्ध्यायातिमोहितः पापं ताद्वशबुध्यापि समुत्पन्नं न संशयः देवत्वमेतत्त्वत्तो वृथा
स्यात्तद्विघ्नहेतुत्वं विचारयेत् न कोवाविषं वांछति जीवनेच्छाकर्तुं प्रवृत्तोपि निरयं धर्मापि इति तद्वचनं श्रुत्वा रम्भा मनुदिवौकसः ससमु
त्तं त्वयाथापि तद्विघ्नो हृदि चिंत्यते शिवार्चनाकारतपः प्रभावः कंपयत्येव सुरान्ततस्तं तद्विघ्नमुत्पादयितावतानः स्वर्छं मनस्या खलु
नान्यथातु इत्युक्ते तद्वचः श्रुत्वा भाविभावीति निश्चयात् सा ययौ तत्र यत्रास्ति स महाखपजकः सा तत्र गत्वा स्वनिजांसे हेतुं संपाद्य तेना
पिविलोकि ताथि ततस्तदंतःकरणं सकंपं जातं सचिंताकुलचित्तवृत्तिः १० स्थिरं मम मनः कथं सपदि चंचलं जायते शिवार्चनरतिर्नमे
किमिदमद्भुतं दृश्यते अदृष्टमिदमीदृशं भवति नानुभूतं पुरा किमेतदिति चिंतया विगतविघ्ननाथार्चनः ततः परं समुत्पन्ना कापि वाग
शरीरिणी सा श्रुता रम्भया वा पीनया विस्मयमागता अयं जितेंद्रियो रंभे स्त्रीरूपेण न सर्वथा अत्र प्रवृत्तिर्विफला केवलं पापसाध
नं संसारवासनायस्य तस्य नारीविलोकने प्रीतिः स्याद्यं सहसा न प्रीतिस्त्वयि वस्तुतः १४ शिलानारीं दृष्ट्वा यदि भवति बुद्धिः क
लुषिता न सता वद्रूपं भवति न वदृश्येय यदि न सा १५ तदा किं तेह स्यं भ्रममपि विहायात्र तरसानंतस्पर्शेच्छा भवति खलु या हि स्व
भवनं १५ प्रस्तरायस्त्रिवावलोकनाशीतिमामवति तर्हि नन्मनः त्वय्यपि प्रसरतीति मम मतिः का तनापि रमणीय तावद १६ स्थ
लोष्ठलालोकनतः सुखं चेत्तदा त्वदालोकनतः सुखं स्यात् कुचेपि तस्योपल बुद्धिरेव सवर्तुलस्तनरत्नस्वेवेति संसारिणामेव हि
बुद्धिरिष्टा नारीषु संसारविरक्तचित्ता नारी परंप्रान्तरमेव मत्वा तिष्ठन्ति विश्वेश्वरसक्तचित्ताः न लोहितं तस्य तथा शरीरे न मांसम
गादिकवासनापि ततः कथं चात्वयि चित्तमस्य तदानुरक्तं विरतं विशिष्य तदृहचेष्टाकरणाय चित्तं यदि स्वं तत मोहतस्यात् तदास

शापेनविनाशमेवकरिष्यतीतिशमित्तिर्ममासीत् २० नायंब्रह्मानापिनारायणोसाविंद्रश्चंद्रोवानुराग्निर्यमोवा वायुर्वायंकिं
तुशैवाग्रगण्योनायमिस्यग्रस्तेरवासमाधीः २१ भीतैर्देवगणैस्त्वमस्यतपसासंप्रेषिताकिंततोभीतिर्मोस्त्वनासंदेशुसहसा
वाल्लीकरोस्यवन तुच्छत्वेनविनिश्चितास्तिमतिंत्वामयाहिप्रियेतस्यैशिवपादपद्मभजनंकल्पावसानेष्वपि इतितद्वच
नंश्रुत्वासारंभापिततोगता तद्विघ्नाचरणोपायंमवतीत्यपिनिश्चयात् पुरातुबहुभिर्भ्रांतैःशिवार्चनविघातकैः संप्राप्तोन
रकावासःतेतैनेवातिदुःखिताः इतितद्वचनंश्रुत्वासानमाहगणेश्वरं अयमर्थस्त्वयाज्ञातःसर्वज्ञत्वाभिमानतः अहंचशिवपूजा
र्थंस्वप्नेखलुसमुद्यता तद्विघ्नःकिंकृतोज्ञात्वाकथंवातन्ममाभवेत् स्वप्नेजागरणेवापिशिवलिंगार्चनंसमं तद्दर्शनेनयत्पुण्यं
तत्तुल्यमुभयोरपि येनानेनपूजायांप्रवृत्तालिंगमस्तके तद्विघ्नाचरणोपायंकथंतेनभविष्यति उत्साहोपिमहान्वृत्तःशिव
लिंगार्चनेमम तदुत्साहविघातेनेतत्पापंभविष्यति। शिवपूजनसामग्र्यास्वप्नेसाकथंमया प्राप्तव्यातादृशीभाग्येनकृते
खलुसर्वथा २९ तादृशांलिंगमुत्कंठस्वप्नेदृष्टंमयातदा तल्लिंगसदृशंलिंगंनास्तिब्रह्मांडमंडले नक्षत्रलोदितल्लिंगंशास्त्रे
द्रमसंखलु तादृशंकुत्रवालिंगंवदब्रह्मांडमंडले मलयानलसंकाशशीतलापिकुत्रसा पुष्पाचयाश्रुतेकुत्रपुष्पमा
लासमुच्चयाः कुत्रोपहारगिरयस्तादृशाःसंतितान्वद कृतान्यामरपान्यद्यपुनःपुरमस्वरा ब्रह्मांडमंडलव्यापछत्रछत्राणि
कुत्रवा ईदृशोपरमंमार्गंदृष्टादृष्टाभिसारं तत्सागमस्यापिहरणंनूनमेवत्वयापरं मच्चेष्टासमानातेचेष्टापिखलुसर्वथा तदा

नंदविनाशाय प्रवृत्तिस्ते कथं वद हाहा हताहमधुनागतजीवा हा कथं धनमिदं गतमेवं हा कथं न करुणां गिरिशास्ये स्वयं दु कृतहृता
तवप्रवृत्तिः न यमेपि करोति लिंगपूजां मनिता नंदवि धानमीदृशास्ते सुखपरविनाशकोयमेनाधुनानेय इति स्वपापत्रासे ५० नु
तपापविनाशहेतुभूता यमलोकस्थितिरेवैतन्ननूनं तवयातनयाविनान मुक्तिः खलु पापस्य शिवापराधात् हाहा हताहं हत
पुण्यराशिस्त्त सुपुण्यराशिश्च कुतो मम स्यात् इत्थं चकैर्वाचमुदीर्य सैव पपात लिंगाग्रवाद्यन्तदेहा तां दृष्ट्वा शोकसंतप्तां पतितामा
वनीतले तेसर्वेविस्मयं प्रापाः किमासीदिति सत्वरं महेशाद्भुपयासयं शिवभक्तिपरायणा जन्मांतरार्जितपुण्यं तस्याः खलु महत्
तरं अपारैः पुण्यगिरिभिः भक्तिरेव प्रजायते नसुपुण्यपरिपाकोपि भक्तिरूपेण वर्द्धते कानि पुण्यानि चीर्णानि पुरा तेनाफलं कथं
भक्तिपर्वं समासाद्य संपन्नमधुनानवं ईदृशी भक्तिरेतस्याः शंकरानुग्रहात्परं समुत्पन्ना न संदेहः सर्वपापविनाशनी दुर्लभा भ
क्तिरस्माकमीदृशी खलु सर्वदा स्वल्पा विषयवांछा सा भक्तिमापकथं शिवे आशास्या भक्तिरस्माकमीदृशी दुर्लभा खलु वांछया
पिनतत्प्राप्तिः मुनीनामपि दुर्लभा तपोघोरतरं तप्तं सेवनेषु मुनिपुंगवैः तथापि तादृशी भक्तिः न प्राप्ता तत्तपस्यया अपारापयपि दा
नानि कृतानि जगतीतले भूपालैस्तादृशी भक्तिः न प्राप्ता शंकरे खलु गोकोटीनां प्रदानेर्वा तादृशी भक्तिरीश्वरे न भवत्येव सहसा
शंकरानुग्रहं विना तुलाकोटिप्रदानैर्वा तादृशी भक्तिरीश्वरे न भवत्येव सहसा शंकरानुग्रहं विना रत्नराशिप्रदानैर्वा तादृशी भक्ति
रीश्वरे न भवत्येव सहसा शंकरानुग्रहं विना रत्नाभरणदानैर्वा तादृशी भक्तिरीश्वरे न भवत्येव सहसा शंकरानुग्रहं विना दुकूलगिरिदा

नैर्वा ताहृशी भक्तिरीश्वरे नभवत्येव सहसा शंकरानुग्रहं विना दिव्यचंदनदानैर्वा ताहृशी भक्तिरीश्वरे नभवत्येव सहसा शंकरानु
ग्रहं विना कर्पूरराशिदानैर्वा ताहृशी भक्तिरीश्वरे नभवत्येव सहसा शंकरानुग्रहं विना घृतकंबलदानैर्वा ताहृशी भक्तिरीश्वरे
नभवत्येव सहसा शंकरानुग्रहं विना कन्याकोटिप्रदानैर्वा ताहृशी भक्तिरीश्वरे नभवत्येव सहसा शंकरानुग्रहं विना गजकोटि
प्रदानैर्वा ताहृशी भक्तिरीश्वरे नभवत्येव सहसा शंकरानुग्रहं विना ६० वाजिकोटिप्रदानैर्वा ताहृशी भक्तिरीश्वरे नभवत्येव
सहसा शंकरानुग्रहं विना अन्नराशिप्रदानैर्वा ताहृशी भक्तिरीश्वरे नभवत्येव सहसा शंकरानुग्रहं विना ६१ केनस्वरूपेण
महेश्वरोपि भक्ताघनाशायकरोतियत्नं केलापिनस्यायतएवनूनं तज्ज्ञानमप्यक्षयपुण्यहेतुः ६२ धन्याः कृतार्थाः शिवार्चनेन
भवंति मुक्ताश्चमहाघबंधात् संसारबंधोपिविनाशमेति महेशलिंगार्चनपुण्यलेशात् धर्मास्तु सर्वेसवसहस्रशोपि कितैः फ राम:
लं शंकरपूजनेन यद्यन्यदेवतत्समभ्यनन्यंनपुण्यमित्यस्तिमतिस्वभावात् अहोमहद्भाग्यफलप्रदाने समर्थमेतद्गिरिशार्च
नंहि इदंतथैपुण्यमहाब्धिपूरैर्विनाभवेद्ध्यत्यपिदुर्लभत्वात् एतल्लिंगविलोकनेनबहुधा नैष्टपुपापक्षयं तल्लिंगबहुपुण्यराशि
रघुनाक्षिप्तस्ततः शंकरः संतुष्टो गिरिशास्वभावतइतिज्ञेयः सलिंगार्चनाशीतस्यादितितस्यदिव्यमहिमाज्ञेयः कथं माहृशी ज
सामिरपि पुण्येनदृष्टंलिंगमिदं शुभं दास्यस्येवनसंदेहः शुभलिंगमिदं यतः शुभप्रदानोद्यतमेव लिंगं शांगनतुंगं किमिदं प्रदृष्टं स
मर्चितं दृष्टमघौघनाशी वृतः परं कौतुकराशिहेतुः अल्पेह संसारमहाघपाशाविनाशहेतुः शिवलिंगपूजा दृष्टाप्रदृष्टं चमनोनिव

नः कष्टांबुराशिः सच पापराशिः ॥ ७० ॥ प्रेरितास्म कथं वाद्य महेशेन महात्मना ॥ एतल्लिंगं दृष्टमेवं सकृत्पापविनाशकं ॥ अस्मत्सुपुण्यम
हांबुधिश्च ववृधे विश्वेश्वरानुग्रहाल्लिंगं दृष्टमिदं वनेऽपि वनजैः स्वयं चिंतयन्त्यत ॥ यतस्माद्धिको न लाभ इति मे तावत्स्वत्र मनः संसार
हांबुधिं प्रबनाभवति नो लिंगार्चनालोकनात् ॥ नारीणामपि बुद्धिरद्भुततमा लिंगार्चनालोकनात् ॥ अस्तापामरतापिवानरगुणानष्टापि
तुष्टः शिवः ॥ तत्कष्टं विलयं गतं किमधुना लिंगं वनेऽन्तरूपने कर्पूरागरुचंदनादिविलसद्गंधान्वितं शर्मदं ॥ अस्माभिः शिवलिंगमर्त्तिरंधु
नाविश्वेश्वरो दृश्यते काशीमामिरेनन तावदधुना संभाविता सर्वथा ॥ वीरेशानवबिल्वपल्लवयुतैर्गंगाजलैः रचितस्तत्सुपुण्यं न किं दृश्यते
व महाधिष्ठानमालोकिते ॥ ७४ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे याज्ञवल्क्यजनकसंवादे
नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ श्रीरस्तु ॥ श्रीयाज्ञवल्क्य उवाच ॥
इति ते तावदुक्त्वापि गणाश्चिरस्त्रासंयुताः ॥ अतः परं विधेयं वा किमत्रेत्यति विस्मिताः ॥ अस्मद्दासाश संबधानस्मानेव चकार सा ॥ अतः
परं किमस्माभिः तत्वं तन्नाविग्रह ॥ कथं वा शंकराज्ञायाः कर्तव्यं परिपालनं ॥ एनं नेतुं वयं तावच्छक्ताः कुंठितागतिः ॥ कदाप्यकुंठिता
शक्तिः कथमद्याति कुंठिता ॥ किमुत्तरं परं देयममुमाकांतायसत्वरं ॥ कथं नाद्भुतकायोपायमवहास प्रभुसंनिधौ ॥ सा सा द्व्याकथं तत्रनं
दिकेशादिसंनिधौ ॥ शिवाज्ञोल्लंघनाद्यपापं तावदुपागतं ॥ तदुल्लंघनमात्रेण शंकरः कुपितो भवेत् ॥ कुपिते शंकरे तस्य कोपज्वालाकु
लं जगत् ॥ स पापाद्दग्धं भवत्येव किं कर्तव्यमतः परं ॥ अस्मत्प्रशासनः शंगोप समादुय इति स्मतः ॥ उग्रोभारज्वलनज्वालामालाकुलंज
ग्र

३ प्रश्नाधिकरूपाके गुणरूरु हतान्ये वनान्नपि ॥

गत् कोपित्तत्कोपजज्वालाग्रामको नास्त्यतःपरं किंकर्त्तव्यंक्कगंतव्यंगमनेनाक्कुतःसुखं नत्रारण्योस्त्यिलोकेपुकुपितेश्रीमहेश्वरे
तत्कोपानलसंदग्धंब्रह्मांडमखिलंपुरा ब्रह्मांडमंडलंदग्धालीलयासमहेश्वरः क्रीडांकरोतितिष्टिक्यांकैलासमपिमंडपे नाया
तिसहसाकोपःशंकरस्यकृपांबुधेः आप्यातिवस्तकोपस्याद्ब्रह्मांडदहनक्षमः दग्धान्यनेकधातानिब्रह्मांडान्यपितान्यपि अपार
नारायणानाशकोयमपारवापीपतिनाशकोयं अपारचंद्रेंद्रविनाशकोयमत्तजयोमत्यविनाशकोयं कल्याणरूपायसुमासहायः
कल्याणदाताकरुणाकरोयं यद्यद्यदेवात्कुपितस्तदानींनकोपिसंरक्षककइत्यवैमि ७५ नारायणाद्यमरकोटिविनाशकोग्रघत्को
पजानलंकथाेपिसदेवदेवः अस्माकमद्यसुसुखंसभवेत्कथंवासोत्स्ववकोर्यविलयेसतिचंद्रचूडः अस्माकंदुरदृष्टमेवमधुना
जातंकिमेषामयागंतुसत्वरमेवहास्तेनिहतासाप्युस्थिताकोपतः तत्कोपाधदपिपापमर्जितमिदंतत्तुंगलिंगार्चनंस्वप्नेकर्तुमिहो
घतापुनरपिक्रुद्धानिरुद्धानसा ततःपरंपुनःस्वप्नेभ्यादृद्दृशिवार्चकं तामाहसाशिवरतंभवाम्यविनयान्विता वारणीउवाच
स्वामिन्नद्याधुनादृष्टस्वप्नेशंकरमंदिरं तत्रलिंगमयादृष्टंपूजितंतदनंतरं मयापिपूजितंलिंगंपुष्पाद्यैश्चमनोहरैः नर्तनंचकृतं
तत्रशिवलिंगाग्रतोमया तदानींयुवतीकापिदृष्टातत्रलालसा सखीसमहसंयुक्तानानाभरणभूषिता तदानीमागतस्तत्रत
त्रतींमदनातुरः तामाहयुवतींसोपि तामाहयुवतीसापिधृत्वानहंसादरात् एहिभद्रेगहंरम्ये हर्म्येपुष्पविराजिते विलासस
दनेस्थितारात्रिर्नेयाययासुखं इतिलइचनंश्रुत्वारमपोरसपांप्रति यहियाहीत्युदासीनवचनेराहसत्वरं उदासीनवचःश्रुत्वा

सयुवामदनातुरः बलाद्दृरोपयोगोयोनयोस्त्वनमरंप्रति ततस्तन्नगरे दृष्टं तया शंकरमंदिरं ततस्तमाह सा बाला भर्त्तारं मदना
तुरं दृष्टे शिवालये तत्र वर्त्तव्यं लिंगपूजनं इदं व्रतं मया बाल्ये स्वीकृतं गुरुवनुज्ञया एतद्व्रतपरित्यागे प्राणहानिर्भविष्यति मत्तेमं
वामयातत्रनत्याज्यंलिंगपूजनं इदं व्रतं मया बाल्ये स्वीकृतं गुरुवनुज्ञया प्राणप्रयाणसमयेप्राप्तेपि शिवपूजनं नत्याज्यमितिमेभक्तिः
जाता बाल्यावधिप्रिया तद्विघ्नाचरणोद्योगस्त्वया यदि कृतस्तदा तवापि नरकावासो भविष्यति न संशयः शिवलिंगार्चनेभक्तिः
नभाग्येन विना ततः उत्पन्नापि शिवे भक्तिः विघ्निता दुरदृष्टतः संसाररूपविघ्नोयः स तावदनुवर्त्तते तत्रापि मध्ये विघ्नोयं भर्त्तु
रूपः समागतः ३१ कालभेदपरिज्ञानं नेतमदनविह्वल शिवार्चनस्यकालोयमस्तं यातिदिवाकरः धिग्धिक्कुयौवनमतत्ते धिग्
स्त्वायुवतीजनेगच्छगच्छदुराचारं मंदिरं प्रति सत्वरं बलान्मान्नेतुमधुना यदि इच्छसि तदा तव हानिः संभाविता इत्थं रथो यायात्
भविष्यति यदि तेमन्मथावेषः तदातांगार्दभीं मृतां अनुयाहि रतिं तत्र कुरु तावद्यथेच्छया संसारविरतां नारीमेतामिवविलो
कय सुरतार्थे यतस्तस्याः सुरतेन मतिर्मेता मदाशास्त्वन्नजानाति विरतिश्च न जायते शंकरानुग्रहाभावान्महादेवपराङ्मुखाः
शंकरानुग्रहे रत्ने संसाराद्विरतिर्भवेत् तदभावेरतिस्त्वत्रकल्पांतेपि न शाम्यति वार्त्तामिरत्नमेवालं सायंकालः प्रजायते इतितद्व
चनं श्रुत्वा सुतं याहीत्यवाचसः ततस्सताडयामास हुंकारैः क्रूरया घृणान् तेन संचलिता एवं बहुघाताडिता अपि ५० रथ्यावि
प्रसन्नदातमद्वर्त्ती व्याकुलस्तदा ततः प्रविष्टालयासा बाला शिवमंदिरं युवतीं चलितां दृष्ट्वा पानुगंतुंसचोद्यतः दूरं रुद्धं द्वारवातीव

त्रु द्वाभ्तत्प्रतिबंधतः ततः सासरसि स्नात्वा शिवालयं गता मुदा उद्धूलभस्मनांगानि धृतरुद्राक्षभूषणा दुकूलवसनादि
भिर्होरैरेवं महेश्वरं पूजयामास सा भक्त्या भस्मनार्च्य यथाविधि ततः संस्मारसा बालापूजाद्रव्यमनुत्तमं तदाप्राप्याति दुःखेन
प्राह वाचं मनोरमां अहो गौरीपते शंभो पूजासाधनमुत्तमं नप्राप्तमिह दुर्भाग्यं दुर्भगायाः कथं प्रभो क्षीरैरप्यैर्घृतसंयुते
स्तैः लिंगं नासिक्तं मधुना च दध्ना नशर्करापर्वतराशिनीरैरिहाभिषिक्तं तव लिंगमद्य पुष्पैरनेकैर्घृतसारयुक्तैः पाटीरसारैरपि
नार्चितं ते लिंगं न धूपाद्युरयधूपपंक्त्या कर्पूरदीपैः सप्रसापि शंभो दूर्वांकुरैर्वा न समर्चितं ते लिंगं न बिल्वैरपि पूजितं च अतः परं ह
रसमर्पितो न प्रीताभवा द्याद्युकूपानिधाना नचोपहारैर्मधुरैश्च पक्वैः फलैश्च नाभ्यर्चितमेव लिंगं तु गंतवदंभयभंगहेतुः संसार
भंगः कथमद्य वा स्यात् संसारभंगाय शिवार्चनेनानि कुर्वंति संतः सततं महेशाः ददाति मुक्तिं स ततः कृपाब्धिः सत्वं महामोहविना रामः
शकोपि मोहनसंसार इति स्फुतस्यास्तवत्वं भयोनरकादिभोगः तत्कथं तत्त्राशय मोहमादौ मोहांधकारार्कसहस्रमूर्ते आर्तिर्नो
शामुपैति नगणकृपयालिंगार्चनेसततं लिंगाराधनमेवतावदधुना कर्तव्यमिति सनधीः जाता सा कृपयातनैव बहुधा दृष्टिं प्रयातु प्रभो ३९
तद्व्यापरस्मिंहृन्नारजनसंसार इति जायते इति स्तुत्वा महादेवं प्रपाता पि पुनः पुनः नसंतुष्टा शिवार्चायामप्राप्तसाधने सति तदानी
मागतः कोपि किरातः शंकरार्चकः शिवार्चनस्य सामग्रीं गृहीत्वा विविधामपि तमुद्धूलितसर्वांगं रुद्राक्षाभरणान्वितं तमागतं स
मालोक्य हृष्टाः शांभवदर्शनात् ततस्तत्र समागस्य लिंगपूजां चकार सः पंचामृताद्यैरुत्कृष्टैश्चंदनैः कुसुमैरपि उपहारादिकैः सम्य

मपूजयित्वा महेश्वरं ननर्त नाट्यनिपुणः शिवलिंगांगणे स्थितः ततः परं गानलोला गानैः प्रीतं महेश्वरं चकार गानविद्यायाः तदभ्या
भ्यसनाद्यपि ततः परं तमालोक्य बालाः पूजितशंकरं एतादृशं क्व मे भाग्यं इति चिंतासमाकुलो तदानीं व्याकुलं बालं सदृष्ट्वा
किंनरस्ततः तामाह विनयेनैव किमेवं व्याकुलेऽस्यपि खिन्नासि किमिहां वत्स सर्वं खेदहरो हरः नाराधितः किं रेवदस्य वार्तामपि परित्य
ज संसारदुःखहरमीश्वरमाशु दृष्ट्वा लिंगं च सायमसकृन्नवबिल्वपत्रैः पुष्पैश्च गंधसहितैः रुपहारजालैर्मुक्तो भवत्यसकृदेवं सकृद्विलो
क्य संसारापीवशोषकं खलु महादेवार्चनं मेनिरे धन्यास्ते तरुमिंदुशेखरपदांभोजार्चनात्सादराः तल्लिंगानवलोकनेऽसति भवेद्दुःखं तदा
लोकने तद्वार्तापि न सर्वथेति विदितं तल्लिंगमालोकय शिवलिंगावलोकने रतिर्यद्विजाता बहुपुण्यपर्वतेः अमितं सुखमश्नुते समेदा
न च संसाररतिश्च सर्वथा शरीरमासाद्य शिवार्चने चेत्करोति बुद्धिं विबुधस्य सिद्धिं प्राप्नोति तत्रापि न संशयात्र मुक्तो भवत्यवशरीरया
ते जीवन्मुक्ताः शंकराराधकास्ते तेषां दुःखस्य मकालेऽपि नातः दुःखांतं ते प्राप्नुवंसेव नूनं वार्तां तावन्नैन कुर्वंति दुःखे शंकरेऽसति दुःखदुः
खनाशके शंकरस्य कथमीदृशं वद ह्येमेनस्यमपि शंकरो यतो नाशयत्यखिलदुःखसागरं तावद्दुःखपरंपरातिमहती संभाविता स
र्वथा यावच्छंकरलिंगपूजनरतिर्नो हेति चित्तमुद्धुः साचेतश्चणमेव दुःखविलयः संभावितः सर्वथा तद्वार्तापि न जायते खलु सतां वि
श्वेश्वराराधने विश्वेशास्मत एव नाद्य सहसावीरेश्वरो विस्मृतो न ध्यातं विकटापदां बुजयुगं सिद्धेश्वरीन स्मृता दुंढिस्त्रोपि सवि
स्मृतः किमिति वा श्रीभैरवो न स्मृतः दुःखांभोधिविनाशकः खलु महादेवस्मृतो नुस्मृतः इति तद्वचनं श्रुत्वा काशीसं स्मरखासति वि

लोकितानकाशीतिसापिदुःखसमाकुला हाकाशीनमयादृष्टाविश्वेशलिंलयामुदुः संसारपाशसंबद्धा किंकर्त्तव्यमतःपरं विश्वेश्व
राराधनायनप्रवृत्तंमनोमम संसारवार्त्तीविरतंनममनःपापसंचितं ७४ श्रीवीरेश्वरलिंगपूजनरतिःजातानजन्मांतरेतेनेदंजननंसमा
भवदतोनष्टंवयोमेवृथा हाहाकिंहतजीवनेनजननीक्लेशप्रदानोद्यतंव्यर्थंजन्मशिवार्चनेनरहितंकष्टातिकष्टंवयः कर्पूरगौरचरणांबु
जेरघुभिर्मेनक्रीडतोस्यपिमनोमरणंवरंमे किंजीवनेनशिवपूजनवर्जितेनधिक्धिक्धिगेतदधुनाकिमिहास्तिहर्षं विश्वेश्वरोननत
एवनवीक्षितोपिबिल्वादलैश्चकुसुमैरपिनार्चितोपि व्यर्थंगतंजननमेतदतःपरंकिंदग्धंगृहेनफलमस्तिजलावसेकैः हाहाहतदुरा
त्मनाकथमहंत्संगोपिविद्मयतास्वस्कुनाभवदिदंदुईशरवरणदांभोजार्चनेसर्वथा नदृश्यंभवतुत्रिलोचनपुनःजन्मांतरेवाभवत्पादांभोजर
जःप्रसादनिरतंचित्तंममास्तप्रभो धिक्धिक्पातकसागराकरमिदंचित्तंधिगाशुभप्रभोत्वत्पादांबुरुहार्चनेनरहितंचेतस्तदद्याधुना
निर्मलंभवतुत्वदीयदृष्टयाचित्तांतरपान्वयेतेनाशनाद्यमहेश पूजनरतंचित्तंभवेत्सादरं हरहरहरपापपापनाशायस्मात्पदमर्पित
वशंभोशंकरेमेप्रवृत्तं यदिभवतिमनोमेघोरसंसारनाशोभवतिभवनिदाघेर्मव्यनाथंतवेशः इतितद्वचनंश्रुत्वाकिंनरोविस्मितस्त
दा शिवपूजनसामग्रींददौतस्मैप्रणाम्यसः सामग्रींतांसमादायप्रहृष्टासापिशंकरं पूजयामासयत्नेनपंचाक्षरपुरस्सरं ततस्स
किंनरःप्राहतामेवनवयोवनां शिवार्चनरतांदृष्ट्वाप्रहृष्टोतीवविस्मितः किंनरउवाच किमंबावेक्षितंलोकेतद्वदाद्याधुनामम त्वसर्व
मपिपश्यतुमेशक्तिरतिशिवार्चनात् अंबमांपुनभावेनपश्यपश्यातिसादरं शिवभक्तास्मिमेमातास्तत्वंताहितिमेमतिः संसारविरताया
स्तेशिवलिंगार्चनेरतिः समुत्पन्नातातोनिसंपूजयस्वमहेश्वरं मनुष्याःप्रायशःसर्वेमातस्संसारिपाशतः तैःसहैकत्रसंवासपूजाविघ्ना

रामः
३११

भविष्यति विघ्नितायदिपूजास्यात्पुनः संसारत्वेच्छया नशिवार्चनमपिस्यान्नुकर्त्तव्यं शिवपूजनं श्रेयःपरंविदुरिदं शिवपूजनं
तुविघ्नैर्विनाभवतिचेदपिवाञ्छितानि सिध्यंति तावदसहूत्सहूदेवनास्त तत्सिद्धिदायकमितिप्रवदंतिशैवाः इतितद्वचनंश्रुत्वा
प्रणतेर्ऋनरंमुहुः शांकरंप्राहतासाध्वीश्रीमहादेवसन्निधौ राजकन्योवाच संतिभाग्यान्यपाराणितेषांसंख्यानदृश्यते शिवा
र्चनोपयुक्तानिनभवंतीतिदुःखिता तेनदुःखेनसततंखिन्नंममनस्ततः तद्दुःखनाशनोपायश्चिंतनीयस्त्वयाधुना संतिर
त्नान्यपाराणितैरंकशिवमंदिरं कर्त्तव्यमितिमेबुद्धिःतत्कथंस्यादिदाधुना भर्त्तांकिलातिक्रूरोमेसर्वदामदनातुरः सर्वशिवपूजा
यांविघ्नमाचरतिस्वतः नतस्यशिवपूजायांवाञ्छासर्वोलनायतः जन्मांतरेपिसंसारीसतद्वासनयायुतः संसारवासनादु
ष्टासाताव्रकृतसंन्निभा पिशाचनिकराकाराशिवध्यानविरोधिनी पिशाचयोगमंत्रेणाकदाचित्तन्निवारणं भविष्यतिनसं
सारवासनाचेन्निवर्त्तते संसारवासेनाभ्रत्तास्त्यक्तशंकरपूजनाः चरंतिमरणांतेतयास्यंतियममंदिरं शंकरार्चनहीनेष्यः
ल्पितंयममंदिरं जनस्तद्वासनाक्रांतास्तत्रयांतिनसंशयः यतेतकामिनीयोगंकर्तुमत्त्यायथातथा नकरोतिमहादेवपूजने
मतिरादरात् अमृतंखलुतावदक्षरंशिवनामानुगतंतदादरात् नयनंपिवतीतिनारुतुतंरसनातत्सहकारिणीत्तथा १०० इति
तद्वचनंश्रुत्वाकिंन्नरोहृष्टमानसः तामाहराजतनयांशिवसंविष्टमानसां राजकन्याहिसुभगेसर्वलक्षणसंयुता शिवपूजन
संसक्ताजातासिखलुभाग्यतः असंसारिनकोप्यस्तिमहादेवंविनाप्रभुं सर्वेसंसारिणोदेवाःकिंनराश्चारवाअपि गंधर्वा

अपि सिद्धाश्च मुनयो यतंतस्तत: असंसारी न दृष्टोस्ति सर्वे संसारसंकुला: आज्ञानिको यं मार्गो नेत्स्तन्मार्गस्य निरोधनं अशक्यमेव
सहसा तस्मय स्तोनजायते शंकरे पीवस्तयोयं संसारस्तु सर्वथा नापकाराय धन्यानामुपकारोपि जायते अभाग्यानां तु संसारा
दुःखमेव प्रजायते तदेकमन्यानां तु विरक्तानां न सर्वथा विरतिश्च भवेदेक काले भवेन्न तथा सति तेन दुःखं न सहसा विवेकेन महात्मनां
विवेकोपि भवेद्दव शंकरानुग्रहात्सरं तेन संसारदुःखानि न भवंत्येव सर्वथा संतानार्थोपि संसारस्त्ववन्ने तेमुनीश्वरा: तेन संततिवृद्धि
श्च सा सुखाय भविष्यति नयस्य संततिस्तस्यापि न रोदुःखितास्ततः तद्दुःखनाशस्तेतस्या भविष्यति न संशयः अत्रैवोदाहरंतीम
मितिहासं पुरातनं गंधर्वनगरे कश्चिद्द्विश्चानसुरितिस्थित: तस्यैश्वर्यं महत्तस्य कलत्राणि बहून्यपि तेन संसारवार्त्तापि सत्का परिण
योत्तरं ततस्तस्य कलत्राणां संसारस्त्वा महत्तरा जाता तथापि तैः सर्वैः सत्रास्थान न तासदा तस्य त्तापि न संसारे कुरुते विरतिं त
तः अकुर्वन्नपि भार्याभि: संगं तु न चकार स: शिवार्चनपरो नित्यं सर्वदा शिवमंदिरे चकार वसतिं तत्र निशापनयनं च स: शिवध्याना
नुरक्तः स्वध्यानच्छेदैः कदापि न तथा च तस्य नारीषु न जाता रतिर्धीरपि एवं मन्दविनीतोपि कालस्तेन महात्मना शिवार्चनान्न विरतिः कृ
ताल्पापि चतस्य तु तदानीं पितरस्तस्य द्विजवेषमवाप्यते समागताः शिवध्याननिरतास्मृतिभूषणाः रुद्राक्षमालावलयास्त्रिपुंड्रां
कितमस्तकाः महादेव महेशेति वदंतः सादरं मुदा तान्दृष्ट्वा शिवपूजांतेप्रहृष्टहृदयस्तदा आसनानि ददौ तेभ्यः पूजयामास सा
दरं ततः परमुवाचापि तान्दृष्ट्वा विनयान्मुदा कुतः समागतं कुत्र कृतं शंकरपूजनं इति तद्वचनं श्रुत्वा ततमाहुर्द्विजेश्वराः स्वस्ति

रामः

३१२

पूर्वकमेवादौ शिवस्मरणपूर्वकं २३ पितर ऊचुः सुमेरुशृंगादस्माभिः आगतैः शिवपूजनं कृतं कैलाससदने शिवलिंगे शिवाल
के शिवप्रसादसंपन्नाः सर्वदा शिवपूजकाः नचासाध्यं किलास्माकं भुवनेषु विशेषतः शिवप्रसादेन वयं सुराणां पूज्याः सदा प्राप्त
समस्तकामाः सर्वेषु लोकेष्वपि संवसामः स्वस्थापरं तत्र गतिर्न नूनं अस्माभिरागतं हि वा स्वर्गलोकमयत्नतः तत्रेंद्रेणार्चिताः
सर्वे वयं तावद्यथाविधि ततः परं गताः सर्वे ब्रह्मलोकमनामयं तत्रार्चितास्तु सर्वेपि ब्रह्मणापि वयं तदा तत्रा दृष्टमस्माभिर्ब्रह्मणः
द्विर तद्वृत्तांतं प्रयत्नेन वक्ष्याम शृणु सादरं तत्र ब्रह्मसभामध्ये प्रहृष्टाः सर्वदा स्थिताः प्रफुल्लवदनांभो= स्तुतं तदा=जाः शिवध्या
नपरायणाः शिवतत्वज्ञानरूप सुधापानादिसुंदराः तेषां स्वभावः केनापि ज्ञातेम वनज्ञा नमते हृदिध्यातावामहादेवमानंदरससंप्ल
वाः शिवानंदनिमग्नास्ते नान्यं पश्यंति सर्वथा नशृण्वंति कथामन्यां रहस्यं शैवमुत्तमं श्रुत्वा तत्त्वकथारूपसुधया हृष्टमानसाः
पंचाक्षरजपासक्ता श्रीरुद्राध्यायनप्रियाः भस्मोद्धूलितसर्वांगास्त्रिपुंड्रांकितमस्तकाः शिवलिंगानि दिव्यानि कोमलैर्बिल्वप
त्रैः कुसुमैरपि मंदारतरुजैः पूजयंति ते तेधन्याः कृतकृत्याश्च सर्वे वैक्लव्यवर्जिताः शोकवार्तां न जानंति शोकस्तेषां न सर्व
था तत्र केचन विश्वेशं पूजयंतोपि साधनैः निस्तेजस्काः स्थितास्तेषां मनः शोकसमन्वितं नहि लक्षणेन स्वस्थं च रविन्नमब्रवीहि
नोमनः तदा पृष्टो विधिः केन खिन्ना रहस्य सदादिभिः ब्रह्मोवाच शृणुध्वं सावधानेन वक्ष्ये तेषां शोककारणं एतद्देशसमुत्प
न्नाः काश्चिच्छिवपरायणाः विश्वावसुरिति ख्यातः सर्वसौभाग्यसंयुतः सदा शंकरपूजायां निरतो भस्मभूषितः सर्वदा भस्माभि

नलभ्यो विनाशंकरपूजया निसंशिवार्चनेनैवनयस्तेन विनीयते ५१ नजहाति शिवध्यानं कामुकः कामिनीमिव सुवापिका
मिनी संगं नजानासिवसर्वथा ५२ अतंतस्यकलत्रामां तद्यौवनमनुत्तमं रूपंचतेषामुत्कृष्टं भाग्यमप्यविनश्वरं मंदिरापय
पिरत्नानां प्रासादाश्चविशेषतः गृहशोभानवचसोविषयः सर्वेहारवल्लु वनक्रीडापिसदृनेतेषांयदिकदाचन इच्छा चेत्तद
नेसर्वैपुष्पंहृष्टं विजृंभितं पुष्पाणियानिनान्यत्रतानि पुष्पाणितद्वने तिष्ठंतिपुष्पभव्याकृतरवस्तद्वनेतुन मणिसोपानसंब
द्धदीर्घिकाः संतिकोटिशः तस्मिन्वनेसुरनदीकुल्यारूपावर्त्तते प्रतिपादपमूलेपिपयोगंगास्वलस्ततः तद्वनाद्बहिरायाति
दीर्घिकास्वयितिष्ठति स्वर्गपापयवपुष्पाणि तस्मिनुद्यानमंडले तत्रास्त्येकं शिवस्थानंरत्नमंडलमंडितं रत्नगोपुरसं
युक्तं रत्नप्राकारमंडितं रत्ननंदिगणाकीर्णं रत्ननंदिध्वजान्वितं तस्मिन्नेवशिवस्यानेलिंगंमणिमयंमहत् तिष्ठसेकंतद
त्कृष्टं तद्दृष्टैरपिपूज्यते नागलोकात्समागत्यशेषस्तल्लिंगपूजनं करोतिप्रयतोभक्त्यारत्नैरवमुहुर्मुहुः तत्रविश्वावसुर्नि
त्यंकुरुतिशिवपूजनं अपारवनपुष्पैस्तेस्रग्वैः अन्वहंमुदा स्वतस्ततरवस्सर्वेपुष्पाण्यानीयकोटिशः प्रयच्छंतिप्रयत्नेनशि
वलिंगार्चनायते सैतरप्यर्चनंकृत्वातत्कलैरमृतोपमैः उपहारैश्चसंपूज्यतिष्ठत्याहारवर्जितः नतस्यविषयेवांछाकलत्राणि
नपश्यति पुत्रपौत्रादिवांछापितस्यातावन्नजायते तस्यैनेपितरस्सर्वेतत्कुलेशांशेनादिह तिष्ठत्यथापितेखिलातस्यसंतस्य
भावतः संतसभावेतद्दृष्ट्वा निरुद्धशिवपूजनं तस्मिन्निरुद्धपातस्याद्दस्माङ्गाकादतः खलु अधपातमपरेते रिवत्रास्तिष्ठति

रामः
११२

सर्वदा न पिबंति सुधां मे तेन ताः नरा न जायते शिवार्पितो पि सुसुधा तेरन्य स्मै प्रदीयते किं तया सुधये त्येव सुधा विच्छेद दर्शनात् १० गृहीतयापि सुधया कदाचिन्न सुखोदयः तस्संतति निरोधेन दुःखितं तन्मनो यतः असमर्थं न जानाति सर्वविश्वावसुरीश्वरं पूजय न्तं निरंतरं तस्य नास्ति संसारवासना स्त्रिया चान्नेन पीयूषपानं पीतो निरंतरं तेनाहाररसः सावन्न ज्ञातो पि करोचन आहारसेवनेनैव यदि पुष्टा भवेत्तनुः तदा रतिः कलत्रेषु पुंसां भवति वस्तुतः आहारो पि न रोचते खलु सदा विश्वेश्वरा दृते जातेति तन्तु च्छमति श्च भोगविष येनारिजे न दुर्जने धन्यानो शिवलिंगमात्रभजनेनैतिस्य योयापनं तत्राव तु न मिस्तवैमि महत्तां विश्वेश्वराराधनं १६५ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे याज्ञवल्क्यजनकसंवादो नाम त्रयस्त्रिंशोऽध्यायः ३३ श्रीयाज्ञवल्क्यः
इति लिङ्गवचनं श्रुत्वा वयमप्यति दुःखिताः ब्रह्मलोके पि न सुखं किमेव मिति विस्मिताः अतः संततिरस्माकं पावनाय तु दुर्लभा संपादनीया यत्नेन विद्याविनयसंयुता शांभवी संततिर्भार्या येयदि तावद्भविष्यति तथा शंकरपूजायां तुष्टो भवति शंकरः २ शो चीन संततिर्यस्य तदुद्देशेन शिवार्चनं तदभावे पतंत्येव पितरो नरके पुनः श्रुतिश्च जायमानो वै ब्राह्मणस्त्रिभिरित्यपि तथा प्रजापि यत्नेन साधनीया सपि श्रुतं यस्मादधीतस्नानादि सपिंडदारजापरं संपादनीया यत्नेन सा सुखाय भविष्यति यद्दत्तं पूज्यते लिं गं त्वया तस्य पुनः कथं पूजा भवति देहांते तव शान्ति मिहैतेव तत् पूजाशक्त्यं गृहे लिंगं यस्य तावद्भविष्यति तत्पुत्रश्च जा ब्रह्मलोकवासि नो पि च्यवंति हि लिंगरूपी महादेव पूजाभावविनिश्चयात् तस्मात् जकाय मुनिः चन प्रयच्छति सर्वथा अविच्छिन्नो लिंगपूजायाः संपा

द्यितुंक्षमः तेनपुत्रःसमुत्पाद्यतेतनतावन्नमुह्यति यदिशंकरपूजायांविरतःसुरेतरतः सयातिनरकेघोरमन्यथासुखमश्नुते
पुत्राःसंपादनीयाश्चशिवनामांकिताःप्रियाः पूज्जोतस्याविच्छिन्नालिंगेत्वसंजेतसदा इदंलिंगंमणिमयंत्वयासंपादितुंखलु ए
तस्जास्त्वविच्छिन्नाकुलेतस्महात्मते जातिप्रियतमंलिंगंतवेदंसर्वकामदं संपादितंप्रयत्नेनपूजाहीनंकथंभवेत् महतीयदिप
जास्यांलिंगेस्मिन्बहुसाधनैः तदामुक्तस्त्वमिस्नेहंमहादेवःकरिष्यति लिंगार्चनमविच्छिन्नंत्वयापुत्रैःकृतंततः धन्योसीतिमहा
देवस्त्वयितुष्टोभविष्यति भाग्येनशांभवीलाबस्संततंभाविनी तव संपन्नात्वसामग्रीनतत्संपादनेश्रमः कलत्राणांचतारूपं
मधुनाप्यनुवर्त्तते नयातियावत्तावत्तुसुतान्संपादयाहरात् तेजाताःशिववद्धांचसंपाद्यातिप्रयत्नतः शिवार्चनरतास्तानत
भविष्यतिनसंशयः तान्दृष्ट्वातत्रसंतोषोहृदिग्रास्यसंशयं शिवभक्तप्रियोसित्वंशिवार्चनरतःसदा शिवार्चनरतान रामः
स्मान्दृष्ट्वाप्रीतोसिशांभव शिवार्चनत्वंसंतोषबीजमस्मासुदृश्यते त्वयाबहूनसंबंधकदापिखलुशांभव तथापिशांभवत्वे
नस्नेहःखलुविजृंभते यःकश्चिदस्तिलोकेस्मिन्सामान्येनापिशांभव तत्रापिमहतीप्रीतिस्त्वतावत्संजायते पःशांभवोत्तमस्त्वा
यस्तस्मिन्प्रीतिरत्नवायुना कथंप्रवृद्धानभवेत्शांभवप्रवरश्रुता शंकराराधकानुग्रानपाराम्परयसादरं पौत्रांश्चपौत्रान्निशंस
संतोषोमहान्खलु यस्तशांभवपुत्राणांसपांपश्यतिमानवः सोपिमुक्तोभवत्सोवतसितालुक्तरवहि धन्यस्तस्यपिताधन्याजन ३२१
नीतस्यसंततं तस्यमत्निर्महादेवनत्कुलंधन्यमुत्तमं यस्मिन्कुलेनसंजातःशांभवाग्रसरोत्तमः तत्कुलंनरकेतावत्पतितंनात्रसंशयः

त्सपुत्रा भविष्यंति शांभवा एव सर्वथा न तत्र संशयः कार्यस्त्वद्बीजमधुनोद्यत भूतिरुद्राक्षपूतांगामंगनां शिवतत्परां ऋतुका
ले शिवं ध्यात्वा सुरतैः प्राप्स्यसे सुतान् तेन ते शांकरा एव कुमाराः कुशला अपि भविष्यंति न संदेह यथा तव पितुर्भवान् एवं सति सुखं
येन संभवस्यधुना मुद्रः ततः सहस्रगुणितं सुखं तावद्भविष्यति इति तद्वचनं श्रुत्वा विश्वावसुरथापरं तथास्त्विति साहतानादीपूजया
मासप्रसादं तद्योगामृतधाराभिः तर्पिताः पितरस्ततः तेयमुग्रैः ससरनं संतोषपरिपूरिताः ततः सोपि कलत्रेषु पवित्रेषु व्रतिशांभ
वः ऋतुकाले प्रवृत्तोपि पुत्रार्थे शंकरं स्मरन् ततः पुत्राः समुत्पन्नाः शंकरध्यानतत्पराः जटामंडलवीतांगाः शिवलिंगार्चनक्रियाः
भूतिरुद्राक्षसंयुक्ता बाला नानालोकमनोहराः तं बालकान्समुद्दृष्ट्वा यः शिवनामजपोत्सुकान् उमाकांत महादेव नीलकंठ सदाशिव त्रि
पुरांतकेश्वरेति नाम तेषां चकार सः स तानध्यापयामास पुत्रान्शिवरतान्पिता भूतिरुद्राक्षसंपन्नान् गौरीपरिवृढोत्सुकान् आदाव
ध्यापयामास रुद्राध्यायमथापरं रुद्रसूक्तान्यथान्यानि रुद्रनामानि तान्यपि शिवस्तोत्राणि पुण्यानि तथा शिवकथास्तथा शिवध
र्मोक्तविविधान् सर्वसिद्धिप्रदानपि ते सर्वे शिवनामांकवेदभागावबोधनैः शिवार्चनपरा एव जाताः सर्वे सुताः खलु ५० शिवपूजार
तान् दृष्ट्वा तान्पुत्रान्नित्यशांभवान् प्रहृष्टः परमं प्राप संतोषं शिवतत्परः विलोक्य तान्मुनींद्रांश्च शिवपूजनतत्परान् संतोषं परमं
प्रापुस्तद्दर्शननिश्चयतः शिवलिंगार्चनप्रियान् आलिंग्य स्वसुतानाह जीव जीवेति सादरं ततस्तमाहुस्ते पुत्राः प्रणम्य शिरसा मुदा
+ कदाचित्स सुतान्दृष्ट्वा + कृतांजलिपुटाः सर्वे दृष्ट्वा तातं शिवार्चकं कुमाराः प्रसीद तात वद नः शिवधर्मान्सनातनान् यद्धर्मश्रव

गाहेवशिवशक्तिः प्रजायते सर्वारिष्टविनाशश्च पापनाशश्च जायते जायेते संपदां वृद्धिः अनुवारमसंशयं इतितद्
वचनं श्रुत्वा पुत्राणां वेदसंमतं अहृष्टोधन्यमानातेअमन्यत शिवार्चकः विश्वावसुः ध्येयः परः शंकर एव धीरैः हरिरपारै
रभिसेवितायं अभीष्टदानोद्यत एव नित्यं हाराय धीराय विशारदाय मत्तेभकुंभगलन्मदोरक धुनीक ह्लोलमालाकुलानीला
नीलशिलाश्चयोश्च परिघासंघावृतैर्नीवृतैः आशाधारपुरापितानिकरगाप्युत्सृज्यहाराः परंहारापार विचारसारस्म
नोवृत्यानिवृत्याचिरं ध्येयशंकरपादपंकजमनेनोपेंद्रादिभिः सादरं ध्येयं तत्सहर्शनवस्तु भुवने दृष्टं श्रुतं वासुत तद्ध्यानेन
सुरवाबुराशिरसंभूत संवर्त्ततेमानसे तस्मादेवभवंति तावद सद्भूत लोकास्समस्ता अपि तस्मादंबुजपूजनेनसुष्टुतोभो
धिप्रवृद्धो भवेत् पापापारद्वानेष्ठापि सुतरां शांतो भवेदं ततः संसारश्रमराशिनाशकमिदं विश्वेश्वराराधनं तत्पुत्रास्सनिधान
मवनिधयस्तेनप्रेसताः खलु देवाम्महारेवइति प्रसिद्धो देवपुस्सर्वेष्वपि तन्महांतं आदित्यवर्णो तमसः परस्तादिदं तिवेदश्च मुनी
श्वराश्च पुत्रान्यदेवसदृशानमहेश्वराय देवोत्तमाय मितिते मतिरस्तु नित्यं तत्रान्यदेवसदृशत्वमतिर्यदिस्यात्सा नाशहेतुरिति
वेदविदोवदंति अत्रैवदाहरंतीममितिहासं पुरातनं अस्यश्च यथा मात्रेयादृढा भक्तिः शिवे भवेत् पुरानारायणस्याभूत्कुमारो
मदनाभिधः तस्यान्यदेवतुल्यत्वमतिरासीन्महेश्वरे सेवाभवन्मतिस्तस्य प्रलंब्यानरुमालिका तामालोक्यापि मदनो हरा
द्विहृलमानसः ययौ वैकुंठभवनं यत्र नारायणः पिता तस्यांतकंपमानोसौ नत्वा प्राहातिविस्मितः मदनउवाच महाप्रलयका

रामः
३१५

ऽयंमागतः प्रलयानलः अतःपरं क्वगंतव्यं कोवाऽस्माकंशरणं प्रभुः पश्यपश्यानलज्वालांदीर्घाम्प्राप्तांदिगंतरां तन्निवारण
सामर्थ्यंतवकिंनाधुनावद चक्रंप्रेषययत्नेनतेनवातन्निवारणं गदावातद्विनाशायनोचेज्जीवनमेवन एतस्मिन्नंतरेकाले
ब्रह्मापिसमुपागतः इंद्रादिदैवैःसहितःसकलैर्गिरासह ६१ ससमागत्यतेब्रह्मादिकमलासहितंहरिं परिम्लानमुखांभो
जोमुंचन्नयनजंजलं मंदंमंदंगद्गद्वाग्भिःवाग्भिःकृपाकुलोविधिः सत्कृत्यविनयवार्त्ताचकिंकरोमीतिसत्वरं ब्रह्मोवाच पश्यप
श्याधुनाविष्णोप्रलयानलमागतं तत्तेजसापरेतावद्ब्रह्मांडंनाशमेष्यति अतःपरंक्वगंतव्यंअकस्मादयमुत्थितः प्रलयाग्निकिम
स्माभिःअपराधःकृतःशिवे मयाशिवार्चनंकृत्वाऽस्थितंमत्सदनेखलु लघ्वापराधोनकृतःकोपिरुद्राग्निरेषकः रौद्रएवानल
स्सोयंसर्वसंहारसाधनं एतदुत्पत्तिबीजंकिंचिंतनीयमिहाधुना त्वयानशिवपूजायाःसंकोचोद्यकृतःखलु शिवपूजासाधनं
वाविस्मृतंनखलुत्वया म्लानपुष्पप्रदानंवानकृतंखलुमाहतः कीटादिदूषितैःपुष्पैःनार्चितःखलुशंकरः उद्धूलनंवानकृतंकिंवा
शंकरपूजने त्रिपुंड्रधारणमंत्रोनान्यथापठितःखलु स्वरहीनोनमंत्रःकिंप्रयुक्तःशंकरार्चने अक्षालितैर्बिल्वपत्रैरर्चितःकिंम
हेश्वरः भक्तिहीनंचचंदनंवाशंकरायसमर्पितं धूपदीपप्रदानंवानादरेणकृतंत्वया परिष्काराद्यनकृतोयमभिषिक्तोनुकस्यवा द
त्तःकिमुपहारोपिकीटकेशादिदूषितः शाकादिकंवानकृतंशिवनैवेद्यसाधनं नदत्तंवाघृतंपात्रेतसात्रपरिशोधकं पवादरेणान
कृतंकिंनैवेद्यनिवेदनं ध्यानंवानकृतंसम्यग्वेदमार्गेणयत्नतःभवं प्रगेवानकृतापूजामहेशस्यातिसादरं महेशध्यानसमयेनोवा

ध्यातापि किं मुहुः शिवा नाराधिता भक्त्या तया कमलया पि वा साशिवा संधना सक्तान किमद्य समयस्ततः त्वया वा लिंगपूजायां
विलंबः किं कृतो भवेत् शिवार्चनोपचाराणां लोपः किं वा कृतस्त्वया प्रणतिर्वा विस्मृता किं तया ध्यानं कृतं न वा सोऽवस्थपरमेश्व
स्य भक्त्या अति विनयेन च इति तद्वचनं श्रुत्वा विस्मितो विष्णुरब्रवीत् आहं भद्रे समीतोपि विधिं नारायणः स्तदा ८० श्रीनारायणः
प्राप प्रयापोपि मया कथं वा साज्यं शिवाराधनमादरेण साज्ये तु तावन्न शिवार्चनस्य साज्यत्वमुक्तं प्रलयेपि नूनं किं त्वेष रपिरंक्षि
तैर्यदि मे हारस्वार्चनेन नादरो देहं न तिष्ठिमास्तिष्ठ स्तमधुना तान्नैर्धनैर्वा सुतैः यस्मिन्नेव कृतं न त्वंगभजनं काले तदा किं तनुः सोप्यास्ति किंतु
विसर्जनेन परमं प्राणा स्युःसौ स्वप्नभवत् को वा न विहिते काल करालतिशिवपूजनं आहारमपि संसक्ता विशुद्धजनकोदितः भिज्जन्म
तस्य दौर्भाग्यं येन नाराधितः शिवः सर्वदेवोत्तमस्त्वं न शोतो गौरीमनोहरः सत्का शंकरपूजनं यदि मनः पातुं सुधा जाता तातस्तावज्ज्व रामः
लनप्रविष्टमथवा चक्रपात छाद्यतां किं तेनापि न येन साधु मनसा नाराधितः शंकरो न ध्यातो न निरीक्षितोपि मुहुरप्यद्य दारेण च्छु
ति लब्धं तत्र पस्या मनःखलु मया विश्वेश्वराराधनध्यानार्थं नियमेन तद्धि हि शिव ध्यानारतं तन्मनः यास्यैस्मिन्नवलयेन तेन फलमथ
स्यास्ति सर्वात्मना तन्न्यारानहमेव शंकरपदध्यानानुरक्तं न चेत् देहस्यास्य विलक्षणेन महता यत्नेन संरक्षणं तावत्कार्यमुपायकोटि
भिरयं यावच्छिवाराधने कर्तव्ये सति यद्दशा अधिभवेत्तन्नानुवलुस्तदानो चक्रविघट्टनेन नाशितस्याच्छिलोमदेवहि जिहानैः दशिवाभि ३१६
धानमधुना कर्तुं प्रवृत्ता तदा किं तत्कर्त्तनमत्र सत्वरमतिः क्रूरपावकेन जन शुद्धासा शिवनामधेयसुधया साध्वीप्रवृद्धा तया नाशैव खलु

नामग्रहातइतिज्ञातेमुहुः सादरं मंत्रःकोपिनविस्मृतःशिवपदांभोजार्चनेसर्वथा पूजासाधनमर्जितंचबहुधाकिंभस्मनोद्धूलनं
स्पतं विस्मृतमेववाकिमधुना फाले त्रिपुंड्रं विधेयइयदंनिटिलेविभूतिविपुलःश्रीजालकोलंमुहुः यद्यस्मद्विलमायमाहतिमिरा
क्रांतंभवध्यानसंतर्हिस्यादशिवार्चनोद्यतमिदंभाग्येतिमंदेसति तदूहंस्मारकहृदंवदितशिवाकोताङ्घ्रिपंकेरुहध्यानानंदरसाज्ञिमग्नम
सदृशसंत्रिसस्वपुनः गौरीकांतपदांबुजेपिशापथस्तावत्कृतःप्राङ्मया यस्मिन्नेवदिनेत्रिलोचनपदध्यानारतंमन्मनः तस्मिन्नेवदि
नेशरीरमसदृच्छित्वापिकाशानलेऽप्यग्नेसमपामितिप्रबोधसहितास्यैवप्रतिज्ञामम अन्यत्किंममदृष्टसमस्तिशिवशिवाध्यानंशिवापूजनं
त्यक्त्वातेपितरौममेतिमुहुरप्यत्याहरादर्चितौ तावेवाम्बहमिस्मवेस्मिमनःकस्मैतयातत्सुनःवक्तव्यंशिवपूजनंप्रतिदिनंकर्तव्य
मित्यादरात् किंचान्यन्नचराचतममशिवध्यानंविनातत्परंसर्वत्राघमशिवानंहसमनुदिनंसंपत्सदानोन्मुखं सर्वेस्यापिशिवंवदद्दानिशि
वंदयस्मात्स्वरूपंतथासिद्धंतस्यतथासतिप्रियतमंसांबपरंधीमहि शिवध्यानेतानद्धनमितिमतिमेसमुद्भवत्तःकोवालोकस्य
अतिधनमप्यर्जितमहाधनंवासंस्याज्यंशिवदशिवपादांबुजरजःप्रभावध्यानाख्यंधनमतिमहदुस्त्यजमपि अहंलाउप्रलयान्तरा
मितशिवश्रीजाज्ञमस्वदजापारांभोधिनशीनदाभिविलसत्कल्लोलमालाजलैः संक्षयेनजगत्सुनःपुनरुमाकांतःसदावमयाम
पातीतइतिस्मृतोपिमुहुरप्याराधितःसादरं ८५ इतितद्वचनंश्रुत्वाहृष्टवाशचीपतिं स्मयोहीनपितानाहक्रोधसंकुलितेक्षणः अहो
वाव भवेत्किंस्तावदुन्मत्तःनहृतेशांकरार्चनं अतएवागतःसोऽयम+अस्त+हाप्रलयपावकः मयासमाराधितएवकालेसकालकालो

हरिणापि लक्ष्म्या अतः परंतस्य भवद्भिरेव कृतानपेक्षितिविनिश्चयो मे परिज्ञेषत एव निश्चयोऽयं कृत इत्यत्र भवद्भिरेव पूजा न कृता
गिरिशस्य सद्यस्तत एवायमुपैति पावकः अहो दुराचारैस्तैः सुरैर्वा किं किंनरैर्वा फलमस्ति सख्य अयं समायाति महानलोऽद्य
श्रीकालकालामरुभालजातः १०० किं वा विधेयमधुनामधुसूदनाद्य सर्वानशांकरवरांप्रलयानलोऽयं दग्धानशांतिमुपयास्यति
मानमुच्चैस्सर्वं भवंतमपि तत्करसंगमेन १ हा हंतहंत विषमः खलु कालएष श्रीकालकालकलनारहितं किलायं गंतव्यमप्यहह
कुत्र किमद्भुतोऽग्निरायाति मृत्युगपार्श्वनिभ एव नूनं हरेः सहाद्य भुवनानि विसृज्य दूरं गंतव्यमेव गमनेऽप्रपलाय्यैव शात् नायाति
चेद्यमिह प्रलयानलोऽपि स्याज्जीवनं खलु हरिंगतनिवासतो वा विश्वावसुः इत्युक्त्वा हरिणा सार्धं कुटुंबेनान्वितेन सः स्वपुत्रेण
यमौ देवैः सपुत्रैर्वनितान्वितैः सकुटुंबासुराः सर्वे सपुत्राः सानुगा अपि यमुः पातालमेवाशु विनाशभयविह्वलाः तानागतान् पाश	रामः
पतिः दृष्ट्वा नारायणादिकान् अतिखिन्नो जुगोचेदं किमासीदिति सत्वरं देवाद्युचुः अस्मास्वेकेनकेनापि प्रायज्ञेन शिवो चिं	३७
तः अतः प्रलयकालाग्निः सुरनाशाय मुत्थितः यस्यां सभायामेको वा पातकी सा सभा परं निद्यात्तावद्बहिः कार्यो नत्संयोगेन व
स्तुतः एवमेवासुरः कोऽपि शंकरानंदे कोऽपि यदि तदासुराणां सर्वेषां विनाशः समुपस्थितः अतो न शरणं लोके शंकरानंदे कानु
यात् अस्माकमिहागतं च ततः शीघ्रपातवमंदिरं अमितास्ते विषज्वाला प्रलयानलनाशने स्तंभने वा समर्थो ऽसि कुरु यत्नं तथापि
पा प्रायः कृतापि यत्नस्ते विफलोऽद्य भविष्यति रुद्रकोपानलस्तंभनेकः समर्थो जगत्त्रये अस्माकं कुंठिता शक्तिः शिवानंदे कस

ग्रामात् अतःपरं क्व गंतव्यमत्रामत्राप्यायाति चेत्स्तु कूर्मेस्तिष्ठतियत्रैव तत्राध्यायाति चेत्स्तु कूर्मेस्तिष्ठतियत्रैव तत्रापि गम
नेसत: रुद्रकोपानलोद्भवानस्यस्यतिनर्संशय: अकांडप्रलय:कोप्यमद्यतावदुपागत: इत्युक्त्वा:कूर्मनिलयंप्रापुर्लोशय
पाद्यम: स कूर्म:आहतान्श्रीतान्दृष्ट्वानारायणादिकान् किमत्रागतास्थ कैर्वनगंभीरयागिरा तमाहहरिरत्र कैर्वै:किं कुरु:कूर्म
कूर्मणा प्रलयानुभीतानांदृष्टमागमनंतव के पृष्टं न कुशलं किंचित्किमेव मुक्तिं तव आत्तोयात्रिमेष्टानेनपुनरात्रिर्भविष्यति त
न्निवर्तनं नचितपिकापिकार्यात्वयाखलु इत्युक्तोहरिणासोपि कूर्म:आहपुनःसुरान् श्रीकूर्म: येननाराधितोरुद्र:तन्नाशायपरंम
हान् रुद्रकोपानलोजातोसनंसर्वविनाशक: २० रुद्रकोपानलोवस्सर्वहोरुद्रपूर्वके सतंसंहृत्यसहसाप्रयास्यतिनसंशय:
सर्वेषामपिनाशायनप्रवृत्तस्य सर्वथा महाप्रलयकाले किंसायंयत्नाभयंभवेत् इतितद्वचनंश्रुत्वाविस्मितोहरिराहतं सम्यगु
क्तमितिप्रीत:सविचाररतोभवत् महेशार्चनेनयेनकृतंवाशिवदूषणं तन्नाशायसमुत्पन्नसोयमित्यवधारित: यन्नाशायाय
मायातिरुद्रकोपानलोमहान् सबहिष्कार्यएवातस्तेनस्यात्करविनावयं एकार्थमद्यसर्वेषांनाशःसद्य:कथंभवेत् अतःपरं
शिवद्रोहीक:सुरघातिनिश्चय: नदीयनविनातावत्तस्यतावद्विनिर्णय: दिव्यंकिमस्तिवतीश्यामितिचिंताप्रजायते इतितावं
ह्विचारेणतप्ततैलानिमज्जनं परंमदिव्यमित्यस्मात्कादृष्टोनारायणस्तदा ततःपरंसमाहूयलक्ष्मीकांत:शिवार्चक: चतुर्मुखंसमा
लोक्यप्राहसंतुष्टमानस: श्रीनारायणउवाच दिव्येननिर्णयस्तावद्दोषस्यभविष्यति तेनैवतावत्तन्नाश:भवत्वत्रादरेणकिं अ

शैवादरमात्रेण सर्वनाशो भविष्यति नरके यदपि संवासो भविष्यति न संशयः किमशैवादरेणापि कार्यमत्र विलक्षणा तन्नि
र्णयोत्तरं तस्य मन्त्रनाशो भविष्यति अशैवनाशनाया हि सर्वः शंकरलीलया अतो मदीयकार्यस्य नकर्त्तान्यो भविष्यति न
शिवद्रोहिणा संगो मंगलाय भविष्यति अमंगलप्रदत्वेन तत्संगो निश्चितो यतः अलौकिकलाशैवजनानुरंजनैः महाघसं
पादनहेतुभूतैः यत्संगमेनाखिलदुःखभोगो भविष्यति सर्वविनिर्णयो मे अशैवविशेषाशनिनाशनाय यत्नः कृतश्च सफलः स
मद्य सुखाय तावद्भवतीति मन्ये धन्योपि तेनैव भवामि नूनं अशैव सर्वाखिलपापरूप तन्नाशनाया घकृतः प्रयत्नः सुखप्र
वाहा जनयस्य वरयं तन्नाशनोपायविनिश्चयोऽस्ति यत्राशैवाः संति तत्रैव गत्वा चक्रं तावत्तच्छिरः कृंतनानि कृ बातावद्दूरमा
याति गत्वा तस्मात् शक्तिः कुंठिता तत्र नूनं प्रबलारिविनाशनाय चक्रं गिरिशेनापि तथा पुरैव सृष्टं प्रबलारिरशोकरस्ततस्तोत् रामः
खलु चक्रेणापि विनाशरवतस्य चक्रेणाशैवनाशे कथमपि न सुखाभावः बुद्धिर्भविष्री तेनानंदप्रवृद्धिर्भवति चवकुधात्वद्विनाशा
यचक्रं उद्यतं चेति मन्ये सततमपि न तत्क्षमामन्य इति मे वदुःखनाशाविशेषाद्दादपि दहनकुलादन्यतो वायमाद्वा ४० धन्ये जीवन
मेवतावदधुना विश्वेश्वराराधनः ध्यानस्तद्धि सुखार्त्तिसाधनपरं चित्तं यतो जायते पुण्यैरेव समुपार्जितं खलु मनः तेनास्य तोषो म
हान्वृद्धिं यास्यति संपदा सह सदा श्रीविश्वनाथेच्छया ४१ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे उत्त
रखंडे यात्रावल्लभजनकसंवादो नाम त्रिचतुस्त्रिंशोऽध्यायः ४३ श्री शिवार्पणमस्तु ७ श्रीरस्तु ७

याज्ञवल्क्यउवाच इत्युक्त्वासहरिस्तत्रचतुर्मुखमुखान्सुरान् तत्रैवदिव्यसामग्रीसंपाद्यनरतोभवत् ततःसेपश्यसामग्रीरि
व्यस्यसहरिस्तदा तस्सैतैलकटाहेषुप्रविष्टस्वयमास्तिकः महेश्वरानर्चनभक्षवाद्यैर्जातानिपापानिलयंप्रयांतु अनेनदिव्येन
ममेतिमत्वातेषुप्रविष्टःकमलान्वितोपि पश्चाच्चतुर्मुखस्तत्रप्रविष्टस्त्वदनुज्ञया सरस्वत्यासहश्रीस्याशिवप्रजापरायणाः इंद्रः
पुलोमजायुक्तोजयंतेनसमन्वितः तप्ततैलकटाहेषुप्रविष्टस्वयमास्तिकः स्वदनुज्ञया (स्वरस्वत्यासहश्रीस्याशिवप्रजापराय
णाः) सर्वेदेवाःप्रविष्टास्तेस्वकुटुंबसमन्वितः स्वपुत्रैरपिसंयुक्ताःस्वदायादसमन्वितः तस्तैतेषुप्रविष्टास्तान्कटाहेषुसुरान्मुकुंदः
पश्यन्खिन्नाननोजातोमदनःशिवदूषकः ततस्सर्वेसमुत्थायकटाहेभ्यःप्रहर्षिताः तान्दृष्ट्वासुतरान्विव्रीडोमदनोविनताननः
ततस्तंमदनंदृष्ट्वाहृष्टोनारायणस्तदा प्राहतंमदनंमत्तंशिवनिंदानजोऽश्रयं नारायणउवाच रेरेमदनदुर्बुद्धेकिंत्वयादूषितः
शिवः जयंप्रलयकालाग्निंत्वदर्थंसमुपागतः १० रेरेमारदुराचारदुष्टशिष्टविदूषित शिवःशिवप्रदस्तेननज्ञातोनिंदितःकथं
सर्वामराधीश्वरमिंदुखंडकरप्रसादाकरशेखरंते जानंतिसर्वेमुनयस्सुराश्चसनिंदितःकिंस्वविनाशकाले अकालमृत्युःखलु
कालनिंदानलोनूनमुपैतिदूरात् तेनैवदाहोभवितातवेति ज्ञातातकिंदृष्टतमोदृशांते मनोहरःसुंदरविग्रहोसिसौंदर्यराशिस्त्वमिह
स्त्रिलोक्यां कथंतवासीद्विशिवापराधो हापुत्रहापुत्रहतोहतोसि इदंनविज्ञातमहोविचित्रंपुत्रोपिशत्रुत्वमुपागतोसि त्रिपात्रानिं
दाकरणेनतावच्चक्रप्रवृत्तिस्त्वयिनोचिताकिं महेशनिंदाकरणाद्धतानोनाशात्यचक्रेखलुसष्टमादौ अतःपरंयत्रमिदंसुसोहताश

मयास्यतिवन्हितुल्यं कोवाजीवतुमिछतित्रिनयनाहंकारशंकाकरो रंकादेवसपश्यतित्रिपुरभूदावानलालीलया सर्वानप
मरानपारकुशलश्रीकालकाले स्वयंकस्तेनास्तिसमः सुरेषुसशिवोदेवाधिदेवोभवः एवंद्याताविवपश्यतित्रिनयनस्तस्मा
न्सुरान्सर्वज्ञाकोवातद्रूपानीयतामुपगतोयन्दृसभस्योरपि ब्रह्मांडप्रलयःकलोपिवहुधाद्वेधाःसुराःसोरगाःपर्वशिक
रनिरयाश्चवशास्तेनापितुल्योस्तिकः श्रीविश्वेश्वरसागरेनयममीमीराजवःकेवलेकःकालोपिपुरंदरोविधिरपिव्यग्रस्तथे
वास्म्यहं तत्तत्पेनपरंनयामिदिवसान्सांकालकालःकदाकर्तुंवाछतिकालपाशवशगःक्रोधानलेनेखपि अंधास्तावदमीवयंसु
रगणाःसर्वेपिवदास्तथागंधर्वाअपिकिंनराश्चमुनयःसिद्धाश्चतद्भैरवः पारावारइवामरैरपिनविज्ञातोयगाधोयतःतेदेववयम
प्रमेयविभवंगौरीधवंभावयेत् २० यन्नेत्राज्वालानलकोटिकटपटलासंगस्फुलिंगांगजज्वालाजालरुचापिलोकविलयंकर्तुंप्रवृत्तो
धुना नसामर्थ्यमपारवेदनिकरागम्यंचरम्यंमहत्कामंचेतिनकामनाविषयतांप्राप्तंसदेवःशिवः वंकुकोपिसहस्रकोटिरस
नाजालाश्रयोवास्वयंसामर्थ्यंगिरिशस्यशंकइतिवाबुधःप्रबुद्धाभवत् नंवदात्तवचोविचारविरतव्यापारसारहरंवंदेशंकरमी
श्वरेश्वरमुमाहारादरंसादरं धिग्धिग्जीवनमेवमारतवकिंतालिंद्याजीवनंकिमेवोरपिनिरंकःपरमपुहाहाकुबुद्धिःकथं द्र
ष्टातेविलयायकेवलमियंसामस्करिस्यवलेनालिंदामतितिरस्यवेमिधिगिदंतजीवनंदुर्मते इतितन्मस्तनोद्यतेसतिनारायणोतदा वि
धिरहहहरिकोपाभ्रकुटीकुटिलाननः २४ ब्रह्मोवाच किंदृश्यतेतच्छिवनिंदकाभ्यंतवापिकिंदुर्मतिरेवमासीत् पापिष्ठवर्यःशिवनिं

रामः
३११

दृकोयं तद्दर्शने नाथ घकोटयस्तु: लोके कोपि न दृष्ट एवं बकुधा देवेषु बन्धेषु वा गौरीनायकनिंदकोऽज्ञ मदनं स कामं अनंतपरं एतत्सं
हरणाय तावदधुना ब्रह्मास्त्रमप्यागतं नूनं जीवनमस्य नेति विदितं तज्जीवनाशां सज चक्रेण त्रिपुरारिनिंदकमुखच्छेदेन तज्जिह्वया
साकं तन्मुखमप्यमेध्यपतितं दृष्ट्वा न दृष्टादयं श्यामा याम परं भयातु मदनस्त हृतपाद हततत्तक्रूरनखाग्रदारितवपु: पापे: परं
तिष्ठतु इति तद्वचनं श्रुत्वा कमलाकुललोचना कमला कमलाकांतमशांतमंदमोहसा कमलोवाच अनेन यद्यप्यपराधस्त्वेव
तच्छिवाकांतविनिंदकेन एतच्छिलाशाय कथं प्रवृत्ति: पितुस्तवापीति निवृत्तिरिष्टा शिवार्चनायायमिह प्रवृत्त: कान्यत्राशु विलंब
मात्रं विहाय सोयं स सहाय एव करोतु विश्वेश्वरपूजनं च विश्वेश्वराराधनसक्तचित्तं कुमारसेनं कुरु मा रमाशु एतत्सम: कुत्रसु
तोस्ति लोके पश्यास्य सौंदर्यमपारमेजं कथं पुरा सिक्षित एव नायं त्वया विरूपाक्षसमर्चनाय असिक्षयो तावदियं किलासीद्वि
श्वेशानिंदनिरतोपि मार: पित्रा सुत: शिक्षित एव बाल्ये सदा सदाचाररत: परं स्यात् दोषस्तवायं जनकस्य नूनं दु:खं कथं वातव
नाधुनापि पुत्र: श्रीभवविद्यया यदि भवेद्द्वासवित्रस्तदा तत्पुत्रानवलोकनेन जनक: किं जीवनं वांछति स्वस्यापीति कथं न तेमति
रभूत् सर्वसुत: शिक्षित: तातानरस्य मद्धिहेतुरिति किं न ज्ञात एवासरात् हाहा मारसम: कथं भुवि भवेत्पुत्रस्त्रिनेत्रार्चक: सोयं वेदमतामृ
तमयं भाग्यं तत: किं भवेत् एतद्भाग्यसमं न भाग्यमिति मे भात्येव सा दुर्भगाय त्पुत्रस्य न फाललोचनपदांभोजार्चनायादर: इति तद्व
चनं श्रुत्वा हरि: खिन्न: पुन: पुन: खदाश्रुलोललनयन: कमलामाह दु:खिता शिक्षितोपि बहुधा मदनोयं नेशपूजनरतो रतिलोलु:

दुर्भगोयमतएवखलयोस्यप्राप्तयेवदुरदृष्टवशेन शंकरार्चनपरोप्यवमारज्ञातिरिस्यपिमुहुर्मुहुः रुक्तः सुखएवबहुध्यानंकरोतिमा
तरिंदुमुकुटाभरणोर्चा शंगलिंगकलेवमदनोयंसंगवेपिनकरोतिकुशीलः दुर्भगोयमतएवनसायंतनंशंगलिंगभजनंनकरोति
किंकरोमिकमलेममभाग्यताहशंखलुनजातमपारं चनमत्तनयतामुपयातानाभ्यचन्द्रिशिरपूजनशीलः शूलपाणिचरणांबुजप
जाजीवनोयदिसुतापिनजातः दुर्भगःखलुसएवपिताप्यादिसेवेमिकमलेसकुशीलः शंकरार्चनपरोयदिमारोदिंकुमारगण
नापिममास्यात् किंतुकेवलवयंशिवयेप्रसादोहरपदेपिशपामि मारस्यापियदित्रिलोचनपदांभोजार्चनंसादरस्तर्हिस्यात्कु
शालीसदाध्वरमहोमकालभीतिःकुतः भीतिर्मेप्रलयानलादपितथाभाग्यंकुतस्यादिदं भाग्यंशंकरपूजनेरगणितैःस्यादिसवे
मिप्रिय एतदूक्षपासाधनेनकमलेविश्वेश्वराराधनेजातंपूर्वमतःपरंकिमधुनातन्नाशकालेसति किंतसज्जनयोग्यतापिद रामः
ह्लाक्रांतेकथंमदिरेक्रूपस्यालखनितोजरेनसकथंतद्भातिहेतुर्भवेत् इतितद्वचनेश्रुत्वाकमलाव्याकुलामुहुः विललापतया
साकंरतीसुरतलालसा तद्विलापपरंश्रुत्वाविललापपुलोमजा वाणीचचुक्रुशोर्दिवाःकिंनराअपिचुक्रुशुः तद्रोदनध्वनिश्रुतास
र्वेपिगिरिकंधराः प्रतिध्वनिसमाक्रांतास्तेविलापाकुलाइव चकंपेवसुधाचेलुःशैलाअपिकुलाचलाः दिग्दंतिनःसंक्षोभास्तेसकु
मेंजपिसिंधवः ध्वनिश्रुतःसएकासीद्वार्याकैलासमंदिरे सापिकंपसमाक्रांताजयामाहविचक्षणा गौर्युवाच जयेकोयंध्वनिः ३२०
कस्माद्दुसन्नःकंपसाधनं किंकैलासाचलस्यापिवार्तापान्यस्यकाभवेत् ससपातालमल्लानिभित्वामूलानिकेवलं कैलासस्यास्य

तिष्ठन्ति कंपः कस्मादभूदिदं रोदनध्वनिरेतावानश्रांतो गिरिशं हर कथमद्य समुत्पन्नः प्रळयः किमुपागतः महाप्रळयकालीनध्व
नितुल्यध्वनिः खलु समुत्पन्नोयमधुना किं भविष्यति तदिदं इति तद्वचनं श्रुत्वा जयाप्यत्यंतविस्मिता तामाह गिरिजे नाहं जाना
मीति विशेषतः ततः परं शनैराह गिरिजा विजये जये गिरिशो वद सर्वेत्र प्रष्टव्य इति सादरं ततस्तामाह विजया गिरिजे त्वमहे
श्वरः क्वाहं सा कं महेशानवक्तुमिच्छामि वा कथं अधुना शंकरप्रायः कुपितो ध्वन्यथा कथं कैलासाचलकंपोप्यधराकंपोपि वा शिवे
प्रायः सुरश्रुयः कोपि दुरात्मा त्रिपुरांतके चकार सुरसामान्यमतिः स्वविलयाद्यतः देवाधिदेवो गिरिजे ध्वस्तसर्वामरा राध्यतमः
ससोमः अवाप्तकामोन्यसुरासमानस्त्रिलोचनोपीति वदंति वेदाः तं कालकालं विदुरिंदुमौलिमतः समस्तं जयइत्यपारैः वेदांतवा
क्यैस्त तएव तेन तुल्यो न कोप्यस्ति सुरेषु गौरी सुराः परं शंकरकिंकरास्ते सर्वेप्युपेंद्रेंद्रचतुर्मुखाद्याः तज्जन्मनाशस्थितिहेतुभू
तः सभूतनाथः खलु विश्वनाथः यल्लीलया विष्णुचतुर्मुखाद्याः सर्वे सुरास्थावरजंगमाद्याः जन्मास्थितिं नाशमुपेत्य भूयो भ
वंति तावद्द्वसजकास्ते अपारमैश्वर्यमुमेशिवस्य महेशदृष्टिप्रसराश्रयोन्यः सएव धन्यो जगतीतलेस्मिन्नुमेरदेवगंधर्वसमर्चितोपि
अपारकल्याणगुणार्णवस्य महेश्वरस्यामितविक्रमस्य कोवा समस्याद्भुवनेषु गौरि स सर्वदेवार्चितपादपद्मः हृषीकनारायणप द्म
जादीन् शिवसमुत्सावसपालनं च कृत्वापि संहारवशान्करोति स्वलीलया केवलमिंदुमौलिः उमेतपस्तावदपारमेतत्त्वयापिये
नेंदुकलावतंसः भर्तातवासीत्कमलापि दासी हासास्सुरास्ते हरिपद्मजाद्याः इदं महद्भाग्यमहो भवानि प्राप्तं त्वया शंकरपूजनेन

इत्येधिकं किं वद भाग्यमंबलं बोदरस्ते स सुतः कुमारः अंबास्माकमिदं खलु महद्भाग्यं स भाग्या वयं त्वत्प्रसादात्खुरु ह्यवलोकनसमुत्
न्नौरुधर्माश्रयाः धन्यास्त्वजगत्त्रयेपि त्वद्बुधामान्यास्त्वदीया वयं किं न स्यात्तव तत्र स्वतामुपगतस्त्वत्प्रसाद्गुकारायकः अद्याशक्तिर
मंबजननी लोकस्य शर्वप्रियातद्ध्रीलेयमुमासहायचरणांभोजार्चकाः केवलं सृष्टिं च प्रलयं च कर्तुं मसकृदुक्तास्थितिं सापरं शक्तिः
शंकरस्त्रीलयैव भवतीसस्माकमासीन्मतिः भाग्यं ते गिरिराजराजतनये दिव्यं निधिं मया यद्दृष्टं तव गुणैरपि प्रथमतो न ह्येवमेवामरैः गं
धर्वैरपि किंनरैरपि तथा सिद्धैर्मुनींद्रादिभिः दुर्ज्ञेयं खलु तन्न पारसहितं तन्नाशवार्त्तापि न एवं संभाषणेनैव युगास्तावद्गतास्ततः शिवनि
दानरुज्वालाप्रविष्टासुरमंदिरं वैकुंठभवनं प्राप्तास सत्यलोकं ततः परं स्वर्गलोकं ततःप्रापदिग्गतान्विसत्वरं ततः परं प्रविष्टासा पा
तालं भोगिमंडलं कंपयामास शेषो पापलाय्य गतं ततः सा सत्पाताल विभेदेन न संप्राप कूर्मं स चकंपमाप ततः स कूर्मः प्रलयानलं
तं प्राह्यतिनं दृष्टप्रपातोतिनम्रः कूर्म उवाच नमो नमस्ते प्रलयानलाय नदीनदांभोनिधिशोषकाय भूमंडलाखंडलनाशकाय त्रै
लोक्यशृंगाग्रविनाशकाय नमो नमो फालविलोचनाग्निप्रभूत सत्स्वावयवाय तुभ्यं तवाहुतिस्याज्जगदेव सर्वं आपोशनायास्ति जलं
समस्तं नारायणास्यादुपदंशकारेन चतुर्मुखः श्रेयतयाप्रसिद्धः लेह्यास्त्वंद्रस्त्ववशोदितोरेवं नमो नमस्ते वरद प्रसीद कालानलस्त्वेन जग
त्त्रयेपि नमः प्रसिद्धाय नमो नमस्ते अद्याद्युनैव प्रपाताति नाशं कुरु प्रसाद प्रपतोस्मि तुभ्यं आर्त्तार्त्तिनाशाय तव स्वरूपं संकल्पितेनात्र
विलोचनेन सस्यसंकल्प इति प्रसिद्धं तस्मै नमस्तात्म पुनर्नमस्ते यना पराधोस्ति ततः स एव विनाशनीयः स नरक्षणीयः तद्रक्ष

पाप्रस्कृतनाशाएवस्वस्यानुकूल्यंखलुनत्रनेदं सर्वस्वतंत्रंतमुमासहायमन्येवदन्यःपरतंत्रएव त्वंविष्णुरिंद्रोपि विधिर्यमोपिस
र्योपिचंद्रोप्यहमथवश्यं अत्रास्पहंस्थापितत्वयपूर्वंमहेश्वरपोचयमातकेन अतस्तत्रहाहाबशगायमहादयाविधेयागिरिशेननूनं
त्वयापितावन्नदयाविधेयाकिमद्यमहद्यंशिवपूजकाय शिवार्चनंमेव्रतमिंदुमौलिःपिताचमाताचसखाचबंधुः अत्रेदमस्यद्भुत
शंगलिंगंपश्याधुनापत्रसमर्चयाशु कालानलाभंकमलासनाद्यैःइंद्रपुरापूजितमेघलिंगं इत्पस्बिल्ववनंप्रपश्यसरांसिपश्या
मृतसंकुलानि नीलोत्पलान्यत्रविलोकयाशुतेरर्चयेयंगिरिजासहायं हृष्ट्वापिलिंगंपुरतोपिशंगे योनार्चयित्वापयतःप्रयाति सपा
तिनाशंनरकंव्रयाति त्वयापितत्तेविदितंशिवस्य इत्युक्तंतद्वचःश्रुत्वासतदाप्रलयानलः भक्तिंधृत्वाविशेषेणपूजयामासशंकरं नीलो
त्पलैर्बिल्वपत्रैःकमलैरमलैरपि ततःप्रपाम्पसंतुष्टःकूर्ममाहसपावकः प्रलयानलः धन्योसिकूर्मसततंशिवपूजापरोभव इदमस
त्तमंलिंगमुमाकांतप्रियंखलु एतल्लिंगार्चनान्मुक्तिःप्रवृद्धातेभविष्यति धन्योसिहृतमेतच्चरक्षणीयंप्रयत्नतः एतैर्बिल्वदलैर्नित्यंप
जयस्वमहेश्वरं सत्वाभीष्टदोलोकपूजितःशंकरःखलु इतितद्वचनंश्रुत्वासकूर्मःप्राहपावकं अतिश्रांतोसिविश्रमकियत्कालंव्रजा
दराल मधुराघृतकुल्येयंघृतंपिबयथेच्छया घृताहारस्यतेतावदपारंघृतमस्तिच युगाश्चबहवोजातास्तवपर्यटनादपि गतंदिगंतप
र्यंतंत्वयातिक्षुधयाखलु अशनंकापिनप्राप्तंत्वंकेनापिनाशनं यस्माद्वुहूसितालोकाप्रलयानलभीरुभिः इतितद्वचनंश्रुत्वास
श्रांतःप्रलयानलःप्रपोयुगांतपर्यंततद्घृतंशर्करार्पितं मधुपीत्वाततःसाधुसुधांपीत्वापुनःपुनःप्रहृष्टःकूर्ममासाद्यतमुवाचकृतांजलिः

मलयानल उवाच पुष्टोस्मि घृतपानेन तुष्टोस्मि गिरिशार्चनात् अतो जगन्नकष्टोस्मि शिवः प्राणैः किलाधुना युगानामयुतं जातं
मम पर्यटनासरं शिवलिंगानि दृष्टानि वैकुंठारिषुकोटिशः न दृष्टमीदृशं लिंगं कुत्रापि सुखदं परं भुक्तिमुक्तिप्रदं लिंगं इदमे
वेति मे मतिः १० शिवार्चनरतोस्मि त्वं शिवधर्मान्वदाधुना यद्धर्मश्रवणादेव स्यादेवं मम विप्लुकः दुःखान्यज्ञानमूलानि तन्नाशो येन
जायते तद्धर्मान्वद निश्चितं सखासि त्वं यतो मम शिवार्चकः सखा भ्राता पिता माता च जीवनं शिवार्चकात्परः कोपि हितकर्ता जग
त्त्रये इति तद्वचनं श्रुत्वा कूर्मो भस्मविभूषितः रुद्राक्षमालाभरणः स्मृत्वा साहं महेश्वरं कूर्म उवाच श्रृणु तं सखे परं भक्त्या पुरुषं नूनमाप्य विं
गलं धुर्धरं तं विरूपाक्षं विश्वरूपाय वै नमः एतादृशं महादेवं ज्ञात्वा यः पूजयेत्सदा स तरत्येव संसारसागरं पातकाकरं संसार
मलयानल नव कुद्धातमाः पर शंकरं विस्मृत्यैव पुनः पुनः जीनिजरानाशाग्नियां खेचते तेषां शंकरपूजनेन रतिरित्स ज्ञानगर्त्ते परं रामः
मग्नास्त एव भवंति भग्नमनसो भुग्नाश्च संसारतः जहोन जालं तिमेहशाशक्तिसंसारबंधं मलमपहृत्तं साशक्तिरीशस्य परं समग्रा ज्ञातुं
न शक्या विषमेन वाचां यथा कथं चिद्गिरिशार्चनेन कालो विनेयः खलु सावधानं विनानेतनास्ति च जीवनं तु तेद्व्रतावत्स्व सुजीव
नं च अस्माभिः शिवलिंगपूजनविधिर्हातानि सर्वो मजा श्रयाधरियकेवलं श्रुतिमता भलिले ललाटे परं का चित्रास्वति भाग्यतः स सलिलं
बिल्वीदलं दीयते लिंगे मंगलदायके शिवशिरे स्कन्दानमाँतेपठेत् अस्माभिर्मनसे यथावदधुना लिंगेप्रदेयं मुदा तेनैव दूरतो महेश्वर ३२२
पदांभोजार्चने सिध्यति सिध्यंत्येव फलानि तावदसकृत्सम्पाद्य पारायतः चित्तं स्वस्थमिदं भविष्यति परा मुक्तिर्भविर्त्री ततः महेश

लिंगार्चनमेकरूपं लब्धं निधानं निर्धनेनापि तेन नचापि तावत्प्रभवंति सत्संते किं पुनः सापि नेतेन मुक्तिः लिंगात्मकं साधनमेक
मेव सुखं महेशेन विशेषतस्तु तन्मुक्तिबीजं सुखबीजमेकं सर्वार्थसंपत्करमेकमेव किं किं पुराणं व्ययमपारमाद्दौ कृतं शिवाराधन
बुद्धिहेतुः इदं परं जीवनमेव पुण्यं धन्यं शिवाराधनसाधनं मे ते साधवस्ते बहुपुण्यरूपाः तत्पुण्यमूलैकफलं परं च हा येशं
लिंगार्चनबुद्धिहेतुना भूताः प्रहृष्टाश्च तथाति पुण्याः लोके दुर्लभ एव साधुरिति मे बुद्धिः स साधुः परं शंगाराधनतत्परः सित
लसन्मूर्तित्रिपुंड्रांकितः तेनैवेंदुकलावतंसभजनानंदप्रवृद्धेन मे प्रीतिर्वृद्धिमुपैति तेन सह मे संगः सदा वांछितः शिवार्चकाला
पनमेव लोके संसारदावानलजालरूपं मन्ये तत्स्तेन सहास्तु संगः समंगलानायकलीलया स्यात् असाभिरेधेंदुकलावतं
सप्रभावविज्ञानविशेषपरान्वैः शांगागसंगे न विनय एव कालः कथं विकलिनाश हेतुः अमृतपर्वफलमेकमेव यच्छंगलिंगा
र्चनलक्षणं मे अनेन तावत्प्रभवंति लोकाः कालाललमात्रार्चितापितस्यात् स कोलाललवेनापि कालकालः समर्चितः द
दाति भुक्तिं मुक्तिं च किं पुनः कुसुमार्चितः जीवनेनार्चितो जीवान् जीवयत्येव शंकरः अतो जीवनमात्रेणाप्यर्चनीयः सदाशिवः
यदि स्याज्जीवनापेक्षा जीवानां जातु जीवनैः पूजनीयः सकृद्वापि जीवने सति शंकरः करोति कौतुकं लोके संगौरी कामुकः ख
लु छिन्नपत्रार्पणेनापि तुष्टो मुक्तिं प्रयच्छति कैवल्यकामारमणं करोति करोति भस्मं दुलनायकं च सहृलसमृतेनापणेनापि म
त्नासमर्चितो वा गिरिजासहायः एतादृशोयं गिरिजासहायः कृपांबुराशिः सुकृतातिपुण्यैः नित्यं समाराध्यत एव तेभ्यो ददा

तिमुक्तिं प्रददाति भुक्तिं अन्याः परे शंकरपादपद्मप्रणामपूजानिरतानमूनं तेषां कृतां तां कलयपूरणाय निर्मापयामि त्ययमति
मेमाभवत् लोके कोपि न शंकरार्चनपरो दुःखालयो जायते संसारानभिभूत एव स परं भुक्त्वापि भोगान्बहून् मुक्तः शंकरकिं
करैः सह सदा कुर्वन्शिवाराधनं कैलासाचलमंदिरांतरमहाध्यानपरं क्रीडति उन्मादन विना शिवार्चनपरो भूतित्रिपुंड्रांकितो
रुद्राक्षाभरणोरमापतिलसन्नेत्रारविंदार्चितं स्मृत्वा शंकरपादपद्ममनिशं बिल्वीदलैरर्चयन् लिंगं शंकरमिंदुमौलिमजनासक्तः
कृतार्थो भवति १२८ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे याज्ञवल्क्यजनकसंवादे नाम पंचत्रिंशोध्या
यः ३५ याज्ञवल्क्यः इति तद्वचनं श्रुत्वा फाललोचनपावकः कूर्ममाहात्म्यसंतोषं जनयन्परं १ कूर्म उवाच प्रक्रयानल
धन्योसि शंकराचाररत तस्माच्छंकर त्वद्दर्शनेन संतोषः समभूद्द्युमध्रुवं २ फाललोचनसंगेन यत्करं समभूत्पुरा तन्निद्रियो राम:
गतान्यस्तेन दुःखमभून्मम ३ तद्दुःखापगमो वृत्तो लिंगस्यास्य विलोकनात् एतल्लिंगार्चनेनापि श्रमोपि विगतोधुना ४ शिवो ३२२
पहारभक्तस्य घृतस्यास्याशनादपि शिवोपहारसंभोग्यमपूर्वः खलु देहिनां हस्तघान्यपाराणि दर्शनादपि वस्तुतः हारोपहार
स्तस्मान्भोजनैर्मुक्तिराप्यते ६ हारोपहारमाघ्राय मुक्ताः पूर्वं मुनीश्वराः सतां च न्मुक्तिकरणं यथा शंकरपूजनं ७ हारोपहाराघ्रा
नवीतपापाः शिवस्वरूपाः सुकृतानुरूपाः विध्वस्तसंसारविशेषतापाः प्रनष्टकोपाश्च गतातिशापाः किंचित्त्वया भक्षितशेषभारो
धृतः कथं वा विधृतातियत्नैः विना न तद्धारणमिस्त्येव मे धैर्यं कथं वा तव जातमेवं इति तद्वचनं श्रुत्वा कूर्मं प्राह अतिहर्षितः तस्यापि ज

नयन्तोषं स्वरूपकथनादपि कर्मडुवाव धृतामहीशंकर लीलयैव निमित्तमेवाहमिह प्रयत्नः नकोपि मे पावकनाव कोवालो
कस्यकस्यापिविशेषकार्ये कार्येपितावद्धुद्धुधाभवंतिमेहशलीलाप्रसरादवश्यं सएवकर्त्तासिरक्षकोपिसएवंहतानिशली
लयाहि १२ यल्लीलाप्रसरात्भवंति भुवनान्यस्तं तुतानिप्रभोशंभोस्तस्य किमस्त्यशक्यमधुना भूधारणादीन्यपि सद्यस्तत्करणा
लवप्रसरतः तावद्भवंतीतिमेबुद्धिस्सिद्धिमपिप्रयच्छतिलिधीनानंदसिंधुनपि यत्पादांबुजरेणुरेणुकलनात्संसारभारोमहान्न्रा
शंयातितदंघ्रिपंकजरजःसंसेवनेकिंभयं तंप्राकुर्निगमाःपरंशिवमितिव्यक्तेतरंगाङ्गदेःनाकेशरिंदुकलावतंसमगजाकांतमप्रशांत
मुक्तः तंदेवात्तममप्रमेयविभवंयःपूजयेदादरात्स्वानंदोदयएवतस्यहृदयेसंसारपीडाकुलः तेजानंतिपरंपरास्तरंतेशांकराः
शांकरंध्यानाराधनपूजनादिकधनास्तेमानहीनाःपरं धन्यंतंविदुरिंदुशेखरपदांभोजार्चनेतत्परंसंसारार्णवकर्णधारगिरिजाभ्री
पादपद्मार्चनं लोकेदुर्लभमसतेनबद्धुधासंपत्प्रवृद्धिर्भवेत् इत्येवाप्तिरनिष्टनाशनमपियत्कंमदीयंवचः भ्रांताःकेचनकार्य
मेतदधुनातावन्मयासाधितंसंधानेनपरेणतावदीतितेनावजगेहंचकाः कर्ताशांकरइत्यवेमिविभमलोमानाभिमानैर्विनातत्व
तःसइतितत्वयापिविदितोलोकेमयापिध्रुवं अत्यत्रापलमध्यसंस्थितमहामंदुकनीरप्रदःकोवातिष्ठतिभूतलेतिचतुरःसर्गोपि
सत्वेपिवा वैकुंठपतिकुंठिताःसुरगणास्वांगानुयोगेपितत्समादंबरचूर्विसुंदरेजटाजूटोदितार्धजटिः नारिदुर्भरगर्भधारण
गुणव्यापारपारंगतोनोपेद्रोजननीकठोरजंसंवासप्रपासालसः इंद्रोप्यानेचतुर्मुखोपिसततथाभूतस्तदन्यस्तथातस्मादंबर
जठरा

चुंबिसुंदरजयजूटोद्दिताधूर्जटिः आरक्तांबुदगर्जितान्वितवरासारांकुरोद्धाहनव्यापारप्रवरादृयेतिचतुरो [illegible] कोवास्या
दधुनाशिवेतरसुरेष्वन्येषुवोमतले तस्मादंबरचुंबिसुंदरजटाजूटोद्दिताधूर्जटिः ततावद्गिरिशं जगत्त्रयहिते तावत्प्रवृत्तपरंसंसारां
बुधितारकं विदुरमाकांतप्रशांतात्मया: तेतावत्वहनुग्रहेणाहृदये तंभावयंतः परंगौरिकांतमनंतशोकविलयं कर्तुंप्रवृत्ताश्चिरं त्वयापि
तावद्गिरिशप्रसादाद्गागतंकः किमिहागतोसि नात्राभिमानःखलुसंमतास्ते महेशलीलेयमितिस्मरामि तमेवनावन्महतोमहां
तमहंभवरंप्राकुरुमापतिमें भजामितावत्वहनुग्रहेणतमेवलिंगेत्रसमर्चयामि भ्रमारलेशोपिममाधुनाकिंलिंगार्चकस्यास्महं हो
बिभर्त्ति महेशलीलापरमिस्वैमिनोचकृतंजीवनमेवनूनं कालस्तावद्भूतोभयान्नेवसंभाषणानयोः तदानीमद्भुततेजःतात्मा
दृष्टेनयावहं तदृष्ट्वापावकःआहतंकर्ममतिभीषणं किमेतादृग्विशातंवृत्तांतदेवसादरं २७ कूर्मउवाच देवास्समागतास्ता
वत्सर्वेनाशायवादयः त्वदीयेलक्ष्ययैनैवव्याकुलाखलुसत्वरं शासनीयोपिनिर्पीतःतैरेवबहुधोततः तेनाशारनायशस्त्राणि
प्रयुक्तानिबहून्यपि नाशयपास्त्रंचक्रंचतद्विनाशायकेवलं प्रयुक्तंविष्णुनातामेभादूतामधुनाधुना ब्रह्मणातेनप्रयुक्तं त
द्विनाशकं वज्रंप्रयुक्तमिंद्रेणतेजोमंडलसंनिभं अन्यैरपिसुरैःसर्वैःस्वस्वशास्त्राणिकोटिशः प्रयुक्तानि ब्रह्मास्त्रं नैव तन्नाशः
तास्तापिनजायते महादेवप्रसादेनलब्धःकमलयापुरा समारस्तस्यसंहारः चक्राद्यैर्नप्रजायते तनशंकरनिंदाचेत्नकृतातर्हि
तत्समः कोवास्वर्गादिलोकेषुसतावत्हरिविक्रमः यस्यस्मरणमात्रेणमुनयोपितपःपरं सत्कादाराहराएवभवंतिप्रतिवासरं शा

राम:

शस्त्राणि तस्य पुष्पाणि कोमलान्यमलान्यपि तानि मौलिमनःशैलान् भिंदंतीसेतदद्भुतं सौंदर्यराशिरेवायं मदनो नमदवि
द्रुतान् मुनीन् करोति सहसा सद्यो दुर्जयो न संशयः शापं भयात्तु मदनस्तत्र त्वथापि सत्वरं येन स्वाहालिंगनेनेन नेयः कालो
महानपि दैवात्सतावदधुना शस्त्रमंडलसंवृतः भवंतं न विजानाति स्वनाशाय समागतं मदनो यदि धीरं त्वं दैवात्संस्पृशति स
तस्य सदा अंगनालिंगनासक्तिः भविष्यति न संशयः तदा तत्कार्यहानिः स्यात्स्वामिद्रोहपरं भवेत् स्वामिकार्यार्थमागत्य तद्विरो
धप्रवर्तनात् किंच स्मरस्वरूपं त्वं मामास्मर विशेषतः तस्य स्मरणमात्रेण मनस्यान्मानिनी विशेषं अकस्माद्गृहितन्मार्धे पतति
त्वाद्दृसा सात्कुरु तावत्तात न कीर्तिः स्यादपकीर्तिः किलान्यथा तद्दृष्टिरधुना तावन्नोर्ध्वे देवांगनास्ततः अधुनावसरस्तस्य
मूर्ध्नि ते पतनं खलु तत्सौंदर्यविलोकनाय यदि ते चित्तं प्रवृत्तं तदा दैवादद्भुतमित्येपश्य सहसा कार्यमहं शासेवा तर्हि स्या
त्तव हालिरेव विजयस्तस्याद्भुतस्यातः सर्वकार्यमनाकुलं भवति किं शंभोः प्रभोः केवलं किं यान्यच्छिवनिंदकस्य सहसादृष्टा
नट द्दृश्यातनु स्यापापिष्ठविलोकनास्तु पिनिबेत् सायातनोतियया निस्तारो न भवेदतः परमपि त्याज्योऽधमः सर्वथा पापिष्ठानव
लोकेन समयेन यः क्रियान्वालया किंचाहसत्त्वया तावज्जगत्कंपयन्नतः तत्सन्निधानादपि तत्पातकं स्यादसंशयः ५४
शिवनिंदकमालोक्य दूरादपि विवेकिनः प्रायश्चित्तार्थमुद्युक्तैः कुर्वंस्येव विशेषतः लयं प्रयाति पापानि प्रायश्चित्तशतैरपि शिव
निंदति रिक्तानि सा तावद्घातनावह तन्नाशकः भक्तस्य शिवनिंदकसंगमः अयुक्त एव सहसा स्वन कार्यो महात्मना महानुभावाः

शिवनिंदकानांइच्छंतिनाशंस्वतएवनाशः तदिच्छयाकेवलयापिकिंन्नततोनतस्संगतिरिष्टहेतुः तेजस्वरूपस्यतवोग्रतेजोयत्तस्य
ल्लेशोप्ययमुतोप्ययमुस्यात् सएवतेन्नाशकतामुपेत्यकरोतुकार्यंतदस्यावधानं इतितद्वचनंश्रुत्वास्वहितंमुक्तिसाधनं संतुष्टःप्राह
तंवह्निंफाललोचनपावकः कृतकृत्योस्मिकर्मत्वंकर्मणामहताधुना हितोपदेशकस्त्वंमेत्वत्तुल्योनसखामम पापलेशरहितोपिस
र्वथाकुमतिमतिरमापतिपरं वांछतीतितद्भाग्यमीदृशंदुर्लभंजगतिदेहिनामिदं जन्मांतराराधितशंकरापांसाशोकरीभक्ति
रुद्रेतियास्यात् ज्ञानंदहेतुः सुकृताब्धिसेतुः सातावदस्यस्फुटधर्मकेतुः इत्युक्त्वावचनेनतस्यहृष्टोविश्वासमास्तिकः हरभाल
भवनं देवदेवेन महेशेन विनिर्मितं एतस्य भवनस्यैव कर्तव्यं रक्षणं त्वया अप्रमादेन कर्तव्यं मंत्रशंकरपूजनं इमानि दिव्यलिं
गानि शिवरूपाणि कोटिशः पत्रपत्रविशेषेण रम्यान् बिल्वतरूनपि मणिमंडलसंक्रांतबिल्वमूलेषु पूजया शिवलिंगानि
यत्नेन कोमलैर्बिल्वपल्लवैः एतेषु शिवलिंगेषु सर्वदा बिल्वपल्लवाः अपाराण्यपि पुष्पाणि सफलानि विशेषतः पुण्यरूपा
नि लिंगानि भविष्यंति यदा तदा अधिकारप्रच्यवस्तो भविष्यति न संशयः एतल्लिंगार्चनायासी निर्माणं त्वया वस्कलः धन्यो
सि कृतकृत्योसि शिवार्चनपरो भव तवाद्य नामकरणं करोमि शिवलीलया नारायणोसि विष्णुस्त्वं वैकुंठोसि जनार्दनः
त्वमेव कमलाकांतो गोविंदो गरुडध्वजः चक्रलाभेव चक्रांतिनामतो भावि वस्कलः तवाग्नि वत्स मग्रेपि तत्कालेन भवि
ष्यति पंचाक्षरजपं शीघ्रात्कुरु संततमास्तिक अक्षूलतं न त्रिपुंड्राभ्यां रुद्राक्षैरपि संस्कृतः पूजयस्व महादेवं प्रमादो मा
स्तु सर्वदा रक्षकत्वास्थापदत्वाच वैकुंठे तं जनार्दनं सत्यलोकं ययौ नंदी तं दृष्ट्वा सुंदरं शुभं सत्यलोकेपि दृष्टानि शिव
लिंगानि कोटिशः तानि दृष्ट्वा प्रहृष्टात्मा पूजयामास सादरं ततः परं समाहूय तेषु वै शिवपूजकं तमाह सादरं भक्त्या
स्मतां शंकरपूजके सुभशोभि शिवाचारैः अत्र लिंगानि पूजय अस्य लोकस्य कर्तव्यं सतस्य परिपालनं सत्यलोकरतिः ख्यातः
सोयं शंकरसंमतः अस्य बिल्ववनस्यापि कर्तव्यं रक्षणं त्वया एतत्कालन पुण्येन तधिकारविपर्ययः अन्यथा सक्रनादस्मात्स्व
च्यवतो भविष्यति तव नामानि वक्ष्यामि महादेवाज्ञयाधुना चतुर्मुखो विधिब्रह्मा वाग्मी रमणः स्वपि [illegible] स्थापयितात

पादुकां

सत्यलोके मनोहरे स्वर्गलोकं प्रयोपश्चात् तैर्देवैः सह सादरं तत्र तेष्वेकमाहूय नंदिपाह शिवस्मरन् स्वर्गलोकः सुखायायं शिवे
न परिकल्पितः एतस्य पालनं कार्यं त्वया सादरमन्वहं इमानि शिवलिंगानि पूजनीयानि यत्नतः इदं खलु शिवोद्यानं मेतदूनस
मुद्भवैः पुष्पैरपारैरनिशं महेश्वरमिहार्चय महेश्वरार्चने विघ्नो यदि संभावितस्तथा तदा त्वधिकारोपि गतस्त्वं वधारय तु
ष्टुं नामानि सास्यामि श्रीमहेश्वर लीलया इंद्रः शक्रः शचीकांतः वज्री वृत्रारिरित्यपि ततः परं च तेष्वेकं समाहूय तमाह सः तदिदं
सुरकांतारं पालनीयं त्वयाधुना संत्यत्र शिवलिंगानि पूजनीयानि सादरं एतदुद्यानजनैः पुष्पैरर्चय शंकरं एतल्लिंगार्चना
भावो यदि जातस्तदा तव अधिकारपच्यवोपि जातस्त्वं वधारय एतल्लिंगार्चनं कर्तुं स्थापितोस्य च सर्वदा लिंगार्चनपरित्यागो
न कार्यः सर्वथा त्वया महामृत्युंजयं मत्वा महादेवं प्रयत्नतः पूजयस्वानिशं शक्त्या विहाय भ्रममादरात् एतस्मिन् सुरकांतारे शं
कराग्रमर्चय यदि तदा नानतियत्नेन पूजयस्व विधानतः अनेनैव हि मार्गेण कैलासगमनोत्सुकाः यदि स्युः शंकरास्तर्हि तानभ्य
र्चय सादरं आशांकरीणां निलयाः कल्पिताः संति कोटिशः कोटिशः श्वापकुंडेषु तान्पातय निपातय अग्निकुल्यासु सर्वासु ता
नाप्लावय दुर्जनात् अशेषाणां तमशीलेषां सेहणमनेकधा भवत्वशेषदुःखाय तेषामस्त्वनिवर्तते अशोवार्थकल्पिताः श्चलते
वृश्चिकसागराः विषज्वालासागराश्च दंदशूकसमाश्रयाः आशांकुरविनाशाय कल्पिताः संति कोटिशः पलसशस्त्रगिरयः
पलघायसपर्वताः आशां भवाभिलापाय कल्पिताः संति कोटिशः कोटिशस्संति ताम्रश्च यतनतप्ताः धुसिंधवः तेषु स्नानं मज्जनं
तेषां नशेषाणां दुरात्मनां तत्रैव यातनास्थानान्यपाराण्यपि संत्यतः तान्यशेषाणि दुःखाय कल्पितानि विलोकय आशां भवस्व

तुष्टुमान्यपानमशुलेन यान्य स्वानि हारुणः ॥ विहारय स्वकूवचे स्व इत्थं शरीराणि कोटिशः ॥ ५

 भस्मत्रिपुंड्रुरहितानरौवानितिसंस्मर॥ रुद्राक्षकंठनविहीनायेतानरौवानितिस्मर॥+१

रूपापिवदामिश्रृणुसादरं आज्ञांभवाचारयुक्तमज्ञांभवमितिस्मर॥ पंचाक्षरविहीनायेतानशैवानितिस्मर शिवार्चनविहीनाये
तान्नशैवानितिस्मर शिवार्चनध्यानविहीनचित्तांस्त्रिपुंड्ररुद्राक्षविहीनदेहान् दुष्टानशैवानितिपालयात्र तानेवघोरेनिरयेष्व
थेष्ठं दुनारकलोकेचिरंतुलावतेकोटिशःशैवद्रोहानिहाय अत्रैववेश्मस्वचतिघोररूपातेषांविनाशायपुनःपुनस्त्व तवकस्त्वमि
दंनित्यंशिवपूजनपूर्वकं शिवार्चनपरित्यागोनकार्यःसर्वथात्वया तवनामानिदेयानिमयाशंकरलीलया यमःकालोमहामृत्युः
तथाशमनइत्यपि एवमुक्तःसतंनत्वानंदिकेशंकृतांजलिः तथेत्युक्त्वातदाशांचदधारशिरसापरं ततःपरंचकाराण्यादिस्रष्टा
लान्नंदिकेश्वरः तेषामपिदर्दोन्तमान्युमाकांतस्यलीलया नक्षत्ररूपानन्यांश्चसचकारस्ततानपि चकारमुनिनिर्माणंगिरिनि
र्माणमादरात् गंधर्वाणांचनिर्माणंकिंनराणांविशेषतः समुद्राणांचनिर्माणंओषधीनांविशेषतः वनानामपिनिर्माणंसिं
हानांचविशेषतः सर्पाणामपिनिर्माणं नदीनांचविशेषतः चारणानांचनिर्माणंमनुष्याणांविशेषतः सर्पाणामपिनिर्माणंवृ
श्चिकाणांविशेषतः सरसामपिनिर्माणंओषधीनांविशेषतः वनानामपिनिर्माणंसिंहानांचविशेषतः तथाव्याघ्रादिजंतूनां
पतंगानांचकोटिशः पशूनामपिनिर्माणंकीटकानांविशेषतः एवंकलासनिर्माणंसर्वेषांनंदिकेश्वरः ययौकैलासनगरंपूजितः
सकलैःसुरैः तत्रपारगणैर्मुक्तःश्रीमत्कैलासपर्वतो नमाकंदेवदेवस्यरम्यागिरिजापतेः ततःपंचाक्षरव्याख्याध्यानंश्रु
त्वानिरंतरं उवासनंदिकेशोपिभृंगितंडिसमन्वितः इतिसत्यव्रतस्येवश्रुत्वावचनमादरात् तमत्नीशुकवाणीतिसंतुष्टा
पुनराह्वतं शुकवाणी पंचाक्षरार्थव्याख्यानात्कदास्मादिरतःशिवः विरतासाभवानीवनदर्थं अरण्याद्वेगू तयोःकार्यानरा

३४३

तिते नागकन्यासहस्राणि पूजयित्वा महेश्वरं नृत्यं कुर्वंति यत्नेन तस्मिन्शंकरमंदिरे सकुटुंबः पूर्णपतिः सपुत्रोपि महेश्वरं
पूजयित्वा प्रसूनाद्यैः कालं नयति सादरं कोटिशस्तत्कुटुंबानि तासुत्राअधिकोटिशः पूजयंति महादेवमतियत्नेन संततं तेषां
शिवार्चनं कार्यं नास्ति कार्यांतरं तथा विद्यमानानि कार्याणि संत्यक्त्वान्येव तैः सदा शिवपूजनमस्माकं परमं कार्यमित्यपि तिष्ठं
ति नागलोकस्थाः सर्वे काकोदरा अपि शिवपूजाविनिर्मुक्तः कोपि काकोदरोपि न अन्येषां तत्र का वार्ता तेषां कार्यं शिवार्चनं तेषां
तथा शिवे भक्तिः शिवेनोत्पादिता ततः तथैव तेपि कुर्वंति लीलया शिवपूजनं लीलामात्रकृताखिलजगज्जालाय तस्मै नमः
तस्मै कारणाकारणाय करुणापूर्णापार्वायासकृत् तस्मै सृष्टजगत्स्थितिपरव्यापारलीलारसव्याप्तायापि नमो नमः पुनरिदं सांब
य तस्मै नमः १९६ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे याज्ञवल्क्यजनकसंवादो नामैको
नचत्वारिंशोध्यायः श्रीसांबशिवाय नमः स्तोकउवाच इति सत्यव्रतोक्तानि वचनानि विशेषतः श्रुत्वा तमाह भर्ता
रं हर्तारं पापकर्मणां स्तोकवाण्युवाच यदुक्तमधुना विद्वन्तत्सर्वं पापनाशकं पुनः प्रश्नांतरं कार्यं तत्र देहि ममोत्तरं कृपालुत्वेन
विश्वासः सर्वैरपि तथा सति दयाविधेयाद्दयया पालनीयास्मि सर्वथा गौरीमनोविलासानां अपराणां महेश्वरः कथमासीद्दा
दलयोर्यवदसर्वं विशेषतः एतादृशं कृतपुण्यं किं वा गिरिजया तया येन सर्वामराधीशो महेशास्तत्पतिः प्रभुः महेश्वरपतिर्यस्मा
त्तूर्णं विज्ञायाः सताः सुराः नारायणाद्योदासाः तस्या दास्यं सुरांगनाः गंधर्वाः किंनराः सिद्धाः चारणा अपि सेवकाः गौर्याः स्तवं

अथ

पेक्षा शिवयोः किंन जायते षण्मुखस्य गणेशस्य किंन कार्यांतरं वद इति तद्वचनं श्रुत्वा शुकवाणी मुवाच सः संस्मरन् गिरिजा
कांतं मुहुर्मुहुरनामयं ७० सूत उवाच शृणु सत्यमिदं वाक्यं सावधानं वरानने देवदेवस्य महिमा मनोवागविषयोपि न
शंकरः करुणासिंधुः यत्कार्यं कर्तुमिच्छति तत्रनायासलेशोपि महादेवस्य शूलिनः यदिच्छया परं कार्यं भवत्येव सहस्रधा इच्छा
मात्रेण सिद्धार्थः तत एव शिवप्रभुः अन्येन कल्पपर्यंतं कृतयत्नेपि सर्वथा कार्यंलेशोपि सहसा न सुरेण प्रजायते अभ्रंकषाद्रि
निर्माणं क्षणेनैव करोति सः तदिच्छया तनूत्पत्तिः केवलं जायते यतः समुद्राणां च निर्माणं स करोति महेश्वरः न तत्रायासलेशोपि
गिरिजास्य महात्मनः क्षीरसागरनिर्माणं कृतं तेन महात्मना स्वेच्छालेशेन तेनैव गौरीकांतेन लीलया घृतसागरनिर्माणं त्र्यं
करेणेच्छया कृतं इक्षुसागरनिर्माणं त्र्यंकरेण कृतं खलु अन्येषां सागराणां च निर्माणं लीलया कृतं भूनिर्माणं च तेनैव लीलया
खलु तत्कृतं भूधारणार्थं शैलाश्च निर्मितास्तेन लीलया भूमंचकस्तंभरूपास्ते शैलाः सत्य सुंदरि पातालरूपो कोलोपि सृष्ट
स्तेन स्वलीलया लोकः करंडकाकारः काकोदरवराश्रयः तस्मिन् लोके शिवस्थानमेकमस्ति वरानने तल्लिंगं कांचनाकारं त्र्यं
प्रभूषणनामकं तत्रापि निर्मितं रम्यं मंदिरं रत्नसुंदरं रत्नप्रासादशृंगाग्रकोटिकोटिविराजितं तस्य शृंगस्य रत्नानि वि
विधान्यपि कोटिशः तस्य भाभिः सलोकोपि भासुरः सर्वदा खलु तत्र शेषादयो नागाः पूजयंति महेश्वरं तदुद्यानवनोत्पन्नप्र
सूनस्तबकैरादरात् अर्कवं बिल्वपत्राणि सुवर्णकमलान्यपि तत्रामिताभिः पूजां कुर्वंति मुनिपुंगवाः तत्र शेषोपि रत्नाद्यैः अपा
रैर्गिरिजापतिं पूजयत्यनिशं ह्यत्र बिल्वैश्च कनकांबुजैः तत्र केतकपुष्पैश्च मंदारैरतिशोभनैः सुवर्णचंपकाकारप्रसूनैः पूजयं

तु

गता: सर्वा: तच्चेटीचेटिका: खलु इदं खलु महद्भाग्यं प्राप्तं गौर्यां तया कथं किं वा व्रतं पुरा चीर्णं येभाग्यमिदं महत् किंच मृत्युंज
यो भर्ता तथा प्राप्तो महेश्वर: सा सर्वमंगला जाता वैधव्यं नैव पश्यति तदिदं कौतुकं श्रोतुं इच्छा जाता मम अधुना वद सर्वं विशेषेण य
था ज्ञातं तथा मुने इति तद्वचनं श्रुत्वा हृष्ट: सत्यव्रतस्तदा तामुवाच अतिविनतां कृतांजलिपुटां मुनि: ११ सत्यव्रत उवाच शृणु भद्रे
कौतुकानि माहात्म्यं गिरिजायाश्च पापराशिहरं तस्य माहात्म्यश्रवणादपि देवासुरमभूद्युद्धं पूर्णं त्रिंशत् युगावधि तत्र दैत्येश्वर: को
पि जातश्चंडपितामहु: अग्निचक्राकुलं नाम नगरं तस्य शोभते तदेव नगरं तावत् अग्निप्राकारवेष्टितं प्रचंड नामो दैत्येंद्र: काम
रूपो तिभीषण: सूर्यमंडलपर्यंतं तस्य काय: प्रवर्तते शिरांसि कोटिशस्तस्मै करास्तस्मै च कोटिश: नेत्राणि कोटिशस्तस्य च र
णा अपि कोटिश: एकैकस्मिन्मुखे तस्य रसना अपि कोटिश: नर्दतानां तु गणना दंष्ट्रा: कुलिशसंभवा: ज्वालामालासमाकीर्णा
निर्दंता अपि कोटिश: तस्य मंदनिवाक्यानि गजतुल्यानि कोटिश: १७ तच्छरीरप्रभापूरै: पूरितं सकलं जगत् तन्निश्वासै: कुले
द्रुता: समुद्रा: सप्तसागरा: सगिरीनखिलान्वृक्षै: सिकतानीव पश्यति तत्क्रूरदृष्टिपातेन भस्मीभूता भवंति ते तद्भयान्महा
दैत्यं देवा नारायणादय: श्रुत्वा पातालमगमन् तमात्मतेजसा परं तेपाताले भयग्रस्ता: किं कर्तव्यमिहेत्यपि चिंतयापरया ग्रस्ता
स्थिता: शेषादिभिस्तदा युगानामयुतं तत्र स्थित्वा दु:खातुरा: तत: विचारनिरता जाता: कार्याकार्यविवेकत: तदा नारायणं प्रा
ह ब्रह्मा म्लानमुखांबुजं इंद्रेण प्रेरितो देवै: तदन्यैरपि दु:खित: २२ ब्रह्मोवाच नारायण कियत्कालमत्र स्थेयमत: परं मरणं वा
स्तु न च अन्यसदने स्थिति: अन्याधीनतया नेय: कियान्कालो वद अधुना सचेद्याति सक्रुद्धो दैत्य: किं वा तदा वद समागत्य सत्सु

नान्सकुटुंबान्सुरानपि दग्ध्वायातितदाकोवाचवदतस्यनिवारकः अस्माभिरेवगंतव्यंसन्नद्धैःशास्त्रपाणिभिः जयोस्तुमरणंवास्तुकिं
तयाचिंतयावद कुटुंबान्यत्रतिष्ठंतुसुताअप्यतिबालकाः प्रौढाश्चपुत्रास्तिष्ठंतुकामधेनुश्चतिष्ठतु तिष्ठंतुकल्पतरवःशिवलिंगानि
कोटिशः अधुनातत्रगंतव्यंभाविसर्वंभविष्यति अद्यास्माकमदृष्टेनजयोयदिभविष्यति तदात्रकुटुंबानिसमायांतुसुतैःसह
इतितद्वचनंश्रुत्वाशुक्रंदुर्भयविह्वलाः ततःस्त्रीःशोषमखिलाःप्राहुःखिन्नाननंत्वया चक्रमादायकेशवः युधायनिर्गतस्तीव्रं
ब्राह्मिसुरसंयुतः ततस्तन्नगरंप्रापुःअग्निमंडलसन्निभं ततस्तेमूर्छिताएवतद्भुताद्भुततेजसा ३२ गतेषुतेषुयुद्धार्थंकमलाद्याःसु
रांगनाः मूर्छितान्पतितान्श्रुत्वाचुक्रुशुर्भयविह्वलाः ततःस्त्रीःशोषमखिलाःप्राहुःखिन्नाननत्वया गंतव्यंदेवकार्यार्थमसहायाः
सुराःखलु इतितद्वचनंश्रुत्वाचुक्रुशुर्भयविह्वलाः सशोषःखिन्नमानसः चुक्रोशोच्चैर्हाहतोभूतोविंदोपितिसत्वरं ततःपरंकियान्का
लोविनीतोरोदनैःपरं सुरदाराविसंज्ञास्तेयुगानामयुतंखलु ३६ उषिताःकमलाद्यास्ताःसर्वावैधर्यविह्वलाः कपिलंप्राहुरस्तंताःश्रि
यार्चनपरायणं ३७ देवांगनाऊचुः मुनिप्रवरदेवास्तेयुगानामयुतंखलु मुनिप्रवरदेवानांदुर्दशांकिंनुसंश्रुता प्रचंडेनहताःसर्वेदे
वानामधिपेनते अतःपरंकिमस्माभिःकर्तव्यंतद्वदाधुना कार्याकार्यविवेकोपिनास्माकमधुनाखलु इतितद्वचनंश्रुत्वाकपिलः
सिद्धसेवितः कमलाभिमुखोभूत्वाप्राहस्मृत्वामहेश्वरं कपिलउवाच हंदिरेशरणंयाहित्र्यंकरंलोकशंकरं ससर्वमंगलाकांतोमं
गलानिप्रयच्छति ४१ ससर्वमंगलाकारःसर्वमंगलदायकः मंगलानांसजनकोप्यमंगलहरोहरः अगमंगलहृत्संति त्रिपुरा
न्तकनध्वंसकृत् प्रचंडगरपावकेमदनमर्दकेसंस्मृते अमंगलसरित्पूरप्रलयएवतावद्भवेत्समुद्गतनयेसदाशुभनदीसमूहोदये

नकोपिजानातिशिवप्रभावमतोनतस्यस्मरणेप्रवृत्तः अतोचिंतोनाशोभवतीतिमन्येसदामहादेवपराङ्मुखानां ॰केनापिदृष्टंनमहेश
रूपंशुभप्रवाहात्मकमप्रमेयं स्मृतेशिवेचेतसिमंगलानिपदेपदेशोभनदानिनित्यं अहोकथंकौतुकमेतदासीत् अत्रचिंतितुंशक्नप
शंभुजानां नाशःसुराणामभवत्किमत्राप्यत्यद्भुतंकिंचिदगम्यमस्ति दैत्यैरहंकारविमूढचित्तैःप्रचंडयुद्धायगतैःप्रमत्तैः वेगादक
स्मैवशीर्वार्चनानितलःप्रनष्टाअपिसत्वरंते संरक्षकेशेतिष्ठतिदेवदेवेमहेश्वरेदेवगणागस्यतस्मिन् तत्पूजनार्थंनकृतःप्रयत्नःततः
प्रनष्टाःकिमिहास्तिचित्रं ७८ नष्टास्तावदनष्टराज्याश्चलोकेनष्टात्मानःशैवधर्मैर्विहीनैः तस्मान्नाशेनोमराणांचचित्रंविश्वेशा
र्चात्यागजंतत्फलंहि उमासहायांघ्रिसरोजपूजापराङ्मुखस्यापिसुखंयदिस्यात् तदाविषाणादपिनीरधारास्पोरोहंबुदेषादवि
शष्टिकाले इत्यदीर्यस्थितस्तत्रकपिलस्तावदागतः गरुडःशोकसंतप्तःसुरनाशेनसत्वरं ससमागत्यकपिलंभस्मोद्धूलितविग्रहं
त्रिपुंड्ररुद्राक्षधरंनत्वाप्राहकृतांजलिः ५२ गरुडउवाच प्रचंडपुरतेजोभिःसंतप्ताःत्रिदशाःपरं पेतुःपृथिव्यांनिःसंज्ञाःकिंकर्तव्य
मतःपरं इतितद्वचनंश्रुत्वाकपिलःप्राहसादरं कृतांतमखिलंतावद्वदस्वेतिविशेषतः गरुडउवाच पातालादागतमस्माभिःदैत्यै
र्हिंसनेच्छया दिव्यशास्त्रौघसंकीर्णैःगंधर्वादिसमन्वितैः शार्ङ्गशंखध्वनिव्याप्तंतदाभूमंडलंमुने देवदुंदुभिनिर्घोषैःसुरकोलाह
लैरपि प्रतिध्वनिसमाकीर्णासर्वेपिगिरयस्तदा चक्रस्फुरणसंभूतेस्फुलिंगैरावृतंजगत् तदानींतंध्वनिंश्रुत्वाप्रचंडाख्योमहासु
रः स्वप्रधानंमहोग्राख्यंविडालंचाहसादरं ५८ प्रचंडउवाच कोयंकोलाहलःक्रूरःकठोरःश्रूयतेमुहुः स्फुलिंगाश्वसमायांतित्रा
सशोथसहस्रशः अभूतपूर्वमेतावदत्यद्भुतमिदंखलु प्रविष्टोहृदयाकाशेसर्वदाभयदोधुना केनसृष्टोध्वनिःसोयंकस्यचेदंवि

जृंभणं महीसर्वंपासकलांगिरिकाननसंवृतां लोकेप्रतिभटः कोपिकिमुसन्नोममाधुना केनस्यात्ताहृशोमतिः शक्तिस्तस्यापिकी दृशी इदंविचार्यसकलंवदयत्नपुरस्सरं आहारेपिनमेबुद्धिः अधुनातुप्रजायते इतितद्वचनंश्रुत्वाक्रूरः प्राहमहासुरः विचा रः कोयमधुनाकिमाहारोनरोचते प्रबलस्यतवाप्येवंकथंबुद्धिः प्रजायते लोकत्रयेपिदृष्टोस्तिनतेप्रतिभटः खलु यद्प्रतिममैश्व र्यंतवतंनपिनश्यति अतः चिंतानकाप्यस्ति भयंस्यजमहासुर देवैः सर्वैसगंधर्वैः किंनरैसहगुह्यकैः सकुंडुबैःसपुत्रैश्चगतंपाताल मंडलं अतःपरंनकोप्यस्तिभूलोकेताहृशोरिपुः स्वर्गलोकोधुनाशून्यः सत्यलोकोपिसर्वथा वैकुंठेपिनकोप्यस्तिनवानक्षत्रमंडले नचगंधर्वलोकेषुयमलोकेपिसर्वथा कैलासवासीभगवानेकः तिष्ठतिशंकरः तत्पूजकानामस्माकंभयंसंभवितंनच पूजयस्वमा हादेवंलिंगरूपिणमव्ययं अपारैरुपचारैस्त्वंभयंसंत्यजसंत्यज यदामोहेननास्माकंशिवेभक्तिर्भविष्यति तदाभयंभवत्येवदुःखधारा पदेपदे येनस्मृतोमहादेवसस्संसाराद्विमुच्यते भयानांतत्रकावार्ताभयलेशोपिवाकथं अस्माकंबलमेतावत्प्रचंडरिपुसंक्षये महादेवा र्चनंतत्रशपथः शिवपादयोः अस्मासुसत्सुकाभीतिश्शंकरेषुतवाधुना प्रलयावधिनास्माकंदुःखवार्तापितेशतः इतितद्वचनंश्रुत्वा प्रचंडोभीमविक्रमः महोग्रस्यसुवान्देदंवचनंविस्मयावहं प्रचंडउवाच सत्यमुक्तंत्वयानात्रसर्वथानपिपर्ययः अयंकोलाहलः शांतौभविष्यतियदातदा शांक्यमन्यथातत्रनरुचिर्ममजायते अयंज्ञात्वासमाहूयप्रेषयस्वरणायतं योत्स्यतेनसहान्ये पिदैत्याः शस्त्रबलान्विताः इतितद्वचनंश्रुत्वाज्वालास्याकारणंतदा प्रेषयामासधर्मात्मादैत्यकोटिसमावृतं नदाऽलमाहज्वा लास्यंनत्कोलाहलकारिणः हंतव्याएवबहुधानात्रकार्याविचारणा इतितद्वचनंश्रुत्वासोपिवीर्यबलोद्धतः जगामदैत्यप्रवरैः सं

श्रीः
३७६

तथापि वैसे है दुःखं अधुनापि नु वर्तते॥ भयेरा सन्निभ लोके कोयं कोलाहलः श्रुतः॥ अत एव दुर्गाकरः क्रूरः
कठोरा सन्निसान्निभः॥ ४

वृतो रथमास्थितः अश्वं कृष्णं रथं दृष्ट्वा पताकार्बुदसंयुतं ज्वालाकुलसमाकीर्णो भयमापुस्तदासुराः तदा नारायणं प्राह चतुर्मुखमुखान् सु
रान् चलत्सर्वतसंक्रान्तो रथो दृष्टो न वेत्स्यतैपि अत्याश्चर्यकरः सोयं रथो वह्निगणाकुलः किमतः परमस्माभिः कर्तव्यं तद्वदंतु वः आयाते
वातिवेगेन वातवेगनिवारकः तद्युद्धे ज्वालयास्थातुमशक्यमिति भाति मे अतः परं कृपां तं यं दिग्गतं यात एव सः रथो महाग्निसंक्रान्तः
कृतपूर्वोपि न ध्रुवं पद्मपत्ररथं दैत्यं तस्थ स्थमपि सत्वरं चतुर्मुखाधुना पद्मपरथवाजीरथं परं अतः परं न पातालिंग तुं कालो पि वर्तते ग
मनेपि सुखं तत्र कथं संभावितं वद इति तद्वचनं श्रुत्वा प्राह नारायणं विधिः चक्रं गृहाण कामीतिः कुरु युद्धमिहेत्यपि ततः परमभूद्युद्ध
मुगानामयुतं तयोः परस्परपरिक्षिप्तास्त्रैर्घोरैर्मुनिपुंगव ततो नष्टरथः सोभून्नष्टाश्वो नष्टसैनिकः ततः परं गदायुद्धं जातं युगचतुष्टयं
ततः परं खमाश्रित्य स चकार स्फुरोरवं तत्रापि स गतो विष्णुः स्तत्र युद्धमभूत्तयोः ततः पपात भूपृष्ठे हतो नारायणास्तदा संज्ञां प्राप्य ग
तो भूयो युद्धाय कृतनिश्चयः मुष्टियुद्धमभूत्तत्र युगानामयुतं तयोः ततः स दैत्यस्तेनैव निहतो हरिणा तदा ततः सैन्यं हतं दृष्ट्वा सर्वं चक्रि
णा तेन दुःसहं ततः क्षणार्धं सुखिनः सुराः सर्वे तदा स्थिताः ज्वालास्यं निहतं दृष्ट्वा प्रचंडस्तत्समानसः किं कर्तव्यमिति प्राह प्रधान
गुरुविक्रमं प्रधानस्तु वाच अपरेष सुरेषे कः कश्चिज्ज्वालास्यनामकः मृतः कालावताहानिःतला वदति दुर्बलः वह्निकूट इति विख्या
तः कश्चिदस्ति महासुरः स युद्धनिपुणः सोपि युद्धाय कृतनिश्चयः तेनैव सह निर्यातु कोटिशोप्यसुरो अपि युद्धदर्पसमाक्रांतास्ते
पि सोपि महाबलः गजानामर्बुदं यातु न्यर्बुदं वाजिनामपि रथानान्यर्बुदं यातु जन्या यान्ति प्रयत्नतः इत्युक्त्वा सोपि संक्रुद्धं वह्निकूट
मुवाच तं याहि युद्धाय वेगेन विलंबं संत्यजेत्यपि इत्युक्तः स ययौ तेन बलैस्तैः प्रबलैर्युतः नारायणादयो यत्र ते सुरास्तत्र सत्वरं त
तः परं सुरैः सार्कं युद्धं घोरमभूत्तदा चक्री चक्रं समादाय चिच्छेदासुरपुंगवान् तदा शोणितवाहिन्यः समुत्पन्नास्ततः सुराः तेरत्क्षया

हिनीनीताः सर्वेपिभयविह्वलाः ततः परं गताः सर्वे समुद्रेपतिताः सुराः रक्तप्रवाहवेगेन तत्तरंगाहताअपि १०८ ततः परं क्रियत्का
लं स्थित्वा तीरे सरित्पतेः पुनर्युद्धोन्मुखाजाताः क्रूरैरसुरपुंगवैः पश्चाद्दद्वायुतेजाते युद्धं घोरतरं मुने ततस्ते निहताः सर्वे राक्ष
साः सुरपुंगवैः अग्निकूटं मृतं श्रुत्वा प्रचंडो भयसंकुलः प्राहप्रधानं हाहाहाहा किमभूदिति सत्वरं तं सुमर्वचनैर्धीरैः आह क्रूरो
विचक्षणः धैर्यं हृदि निधायैव महादेवमनुस्मरन् ११ क्रूर उवाच युद्धकालेषु मरणं भटानां किं न जायते अधैर्यं तत्र सहसा न कर्तव्यं
त्वयाधुना अस्मद्भटानां गणना कर्तुमेव न शक्यते न च केचिद्धतायुद्धे नावलापीतिरक्षका पुनः पुनः प्रेषणीया सुरास्ते प्रबलाः खलु
कल्पावसानपर्यंतं युद्धे सैन्यं न नश्यति अपारसेनापतयः संत्यपाराः किलाधुना प्रेषणीयास्त्वया तत्र चिंता कार्या न सर्वथा एवमुक्त्वा
प्रेषयामास क्रूरो दैत्यान् स कोटिशः तैः पुनर्युद्धमभवत् देवानामपि दुःसहं चक्रेणैकेन निर्भिण्णाः कोटिशोप्यसुराः सदा तथा
वज्रेण निर्भिण्णाः दैत्यानां कोटिकोटयः तद्वार्तां निहतान् श्रुत्वा प्रचंडः चंडविक्रमः पुनः क्रूरमुवाचेदं ज्वलन्निव महा

गिरिः १९ प्रचंड उवाच प्रेषितैस्तैरसंख्यातैः असंख्यातबलोद्धतैः मृतं दैत्यैः सुरास्त्वोधैः किं कर्तव्यमतः परं प्रबलाएव नि
हताः ते सर्वे राक्षसाः खलु तावद्भटाः स्तावदल्पाः केचिन्निष्ठंति ते खलु अतः परं किमस्माकं बलं क्व विजयोस्सुखं केनोपायेन जे
तव्यासुरास्ते दैत्यपुंगव २१ क्रूर उवाच न केवलं राक्षसानां बलेन विजयो भवेत् शंकरानुग्रहाभावे जयवार्तापि दूरतः त्वया
तिस्वरथा क्रोयं त्रिपुरांतकपूजनं अपारैरुपचारैस्तैर्येन तुष्यति शंकरः मत्कं जयाभ्यर्चनेन उग्रः खलु पदे पदे अतो जयार्थं यत्ते
न यजस्व त्वं जयं प्राप्तुं भूषपालाय परसेनानजयाय कदाचन जयः शिवार्चनेनैव केवलेन भविष्यति इति तद्वचनं श्रुत्वा तमुक्त्वा सम्य

गिरपि सच्छिवाराधनोद्युक्तः प्रचंडोभूरिसाधनैः यावदार्जितमैश्वर्यं तावदर्पितमीश्वरे अभिषेकादिभिर्देवंसंपूजयामास शंकरं त
तः परं सुराः सर्वे दैत्यास्तेनिहताइति प्रचंडासुरनाशाय जग्मुस्तं नगरं प्रति ततस्तं नगरा पारवह्निप्राकारतेजसा हतास्ते मूर्छि
तास्सर्वे संज्ञालेशो न दृश्यते अतः परं विधेयं किं मया कमलयापि च शच्या वाण्यपि भगवन्नूनं गायत्र्यापि विशेषतः इति तद्वचनं श्रुत्वा
कपिलः सिंहपुंगवः प्राह गंभीरवचनैः लक्ष्मीमभिमुखीं तदा दैत्योपि शंकरपदांबुरुहार्चनेषु विश्वस्य शंकरपदांबुजपूजनानि कृत्वा
धितिष्ठति जयोपि सततेन लब्धः तैरेव पुण्यमधिकं खलु तस्य नूनं तथा ततो गिरिशमुदार्यादि तत्र दुःखार्णवे मज्जनं किं न स्यादिति
विश्वपोपि न कथं नारायणस्याभवत् रुद्रः स्यापि विधेरपीति बहुधाहाकष्टमासीत् ततो दुष्टं चित्तमभूत् कथं सुरगणस्याद्यापराधो
महान् शिवार्चनपरित्यागस्वरूपाद्दपराधतः जातमेवमभूत्कष्टं त्रिदशानां विशेषतः नरोपि गिरिशार्चनप्रवणमानसः सर्वदा मुखे
न खलु तिष्ठति रत्नवगते न दैवैरपि अहो बत बलाधुना बहुविधोपि मोहो महान् शिवार्चनपराङ्मुखान् पि करोति देवान् हो र
ति तद्वचनं श्रुत्वा कपिलं मुनिपुंगवं नत्वाश्रुपूर्णनयना प्राह गद्गदया गिरा ३६ श्रीलक्ष्मीरुवाच नमोहरात्रेतेः कोपि सुरेषु मुनिपुंगव मो हप्र
वाहसं वातो नाराधयति शंकरं पुनः पुनरिदं ज्ञानं शंकराराधनं विना सुखं नेति विशेषेण ज्ञातमप्यनसंशयः अतः परं स्यादि सुरारिजीवनं
कथं विसंज्ञत्वविनाशनं च अस्मासु वैधव्यविनाशनं च सौभाग्यवृद्धिश्च कथं मुनीश नमहाप्रलयोपि येन नाशो विनिर्वायोनि तत्राचके
न वा स्यात् पुनरागमनं वदाशु तेषां पुनरुज्जीवनमप्यपारभाग्यं सर्वज्ञ तन्नज्ञायते धर्मतत्त्वं योगाभ्यासाच्छंकराराधनेन येन सर्वं निश्च
येन श्रुतावत् वक्तव्यं मे येन दुःखापहारः इति तद्वचनं श्रुत्वा कमलाव्याकुलां तदा कपिलः प्राह निश्चिंतव्रतं जीवनसाधनं ४२ कपिलउ

रत्नगोपुरसंकीर्णे रत्नप्रासादसंकुले॥ दिव्योद्यानवनाकीर्णे दिव्यपुष्पसमाकुले॥ शुभाकुलासमाकीर्णे
शेखरविराजिते २

वाच रहस्यं व्रतमस्त्येकं कमले कमलेक्षण गोपनीयं प्रयत्नेन शंकरोक्तमिदं व्रतं व्रतानामपि सर्वेषां इदमेवोत्तमं व्रतं यद्व्रताचरणेनैव स
र्वसौभाग्यसंपदः पुरा कैलासशिखरे रत्नशृंगविराजिते भ्रमद्भ्रमरसंघोषझंकारध्वनिविराजिते मरालराजसंकीर्णे वरस्थापरिवेष्टिते
तत्रैव रत्नप्रासादः कोटियोजनमुन्नतः तत्र सिंहासनं दिव्यं रत्नकांतिविराजितं पुष्पशय्यासमाक्रांतं नानामणिसमन्वितं चंद्रमंडलम
डाभिः परितः परिवेष्टितं तत्र शंकरमासीनं प्रसन्नवदनं नवं प्रतिक्षणं सुरश्रेष्ठैर्विनरंगपरिवेष्टितं रत्नहारसमाक्रांतं तत्किरीटकूट
कावृतं रत्नांगुलीयकापारकांतिपुंजविराजितं सुवर्णकटिसूत्रस्थमणिमंडलमंडितं कस्तूरीघनसारादपपारीररसयूषितं स्फु
रन्मणिगणाकीर्णकर्णभूषणारंजितं मणिरत्नसमाकीर्णस्फुरन्नूपुरपादुकं क्षीरसागरसंकाशहारसनेपरिवेष्टितं अभयप्रदमी
शानं वरदं गणवेष्टितं सोमसूर्याग्निनयनं सोमार्धकृतशेखरं त्रिशूलमूहरत्नंतं रत्नसानुशरासनं सस्मेरं हीरहाराभकर्पूरगि
रिसंनिभं प्रसादाभिमुखं देवं उमा प्राह अतित्रोभवा गौर्युवाच महादेव महेशान करुणासागर प्रभो शंभो प्रसीद भगवन् कृपां कुरु
सदा मयि किमन्यत्करुणापात्रं तव चंद्रकलाधर मदन्यदपि लोकेषु सर्वेष्वपि सदाशिव कृपामूर्तिस्त्वमीशान तथा करुणया मयि स्नेहो
पि क्रियते नूनं स्नेहपात्रं महं यतः अद्यैकं पृष्टुमिच्छामि सर्वज्ञो कहितावह व्रतं महेशान तावत् वद स्नेहपुरःसरं रत्नं विकावचनं रूपसुधां
महेशः श्रुत्वा प्रहृष्टहृदया सदय स्वभावैः आलिंग्य शैलतनयां विनयानतांगी अंगीकृताखिलशिवानुनयोप्युवाच श्रीशिव उवा
च किं त्वं पृष्टुमिच्छासि गौरी स्मेरवरानने तद्गोपनीयमप्यद्य वक्ष्ये विद्यामये शिवे नवापि किं वावद गोपनीयं तवैव सर्वं गिरिराजकन्ये॥

७२

श्रीः
३४८

रि

इदंमहद्भाग्यमपारमेतत् नैवैवकस्येहद्गाभाग्यमस्ति इत्याकर्ण्यमहेशासादरवचोवीचीसुधाचांबिकात्वत्पादांबुरुहावलोकनरताधौ
स्मिधर्म्योत्तम अर्धांगेविनिवेशितास्मिकिंमितोभाग्यंभवेदित्यहं सानंदासततंत्वपैवमनित्रांसंप्रार्थनीयामम सौभाग्यवृद्धिदं किंव
व्रतंमंगलदायकंपुत्रपौत्रादिसंपत्तिसाधनंचवदाद्यमे यद्व्रताचरणेनैवनभारीविधवाभवेत् जन्मांतरेपिसुभगासुपुत्राभवतिप्रभो
यद्व्रताचरणाभावेविधवास्याद्धुर्भगा अपुत्रामृतपुत्राचमृतबंधुजनासदा एतादृशंव्रतंकिंचित्वदनारीमनोहरं यद्व्रतश्रवणेनापिमु
मुच्यतेपापकोटिभिः इतितद्वचनंश्रुत्वाशिवामालिंग्यशंकरः प्राहव्रतोत्तमंधन्यंमंबिकायैमनोहरं श्रीसदाशिवउवाच अस्तिव्रतोत्तमंगौ
री नारीणामेवकेवलं तद्व्रताचरणेनैवनारीसुखमवाप्नुयात् सत्कुलेजन्मसंस्थाप्यसौंदर्यमतिशोभनं भाग्यंचप्राप्नुयान्नारीतद्व्रताचरणा
च्छिवे नप्रपश्यतिवैधव्यंतद्व्रताचरणोत्सुका अपुत्रानभवत्येवदुर्भगापिनसर्वथा रूपलावण्यसंपन्नासंपत्कीर्तिसमन्विता बंधुपोषणास
सक्तानूनारीतस्माद्व्रताभवेत् नतद्व्रतसमंलोकेनारीणांव्रतमस्त्यपि अतस्तद्व्रतमस्त्यंतभक्त्याकार्यंप्रयत्नतः मासिभाद्रपदेशुक्लेपक्षे
हस्तर्क्षसंयुताः यातृतीयाभवेत्तस्यांतद्व्रताचरणंभवेत् सायंकालात्पूर्वमेवपूजासाधनमुत्तमं संपादनीयंयत्नेनफलपुष्पादिकंनवं म
नोहराणिपुष्पाणियावंतिवरवर्णिनी तानिसंपादनीयानिपरिपक्वफलान्यपि १७७ पुष्पाण्यपिविशेषेणफलान्यपिसदाशिवे यानिसंपादनी
यानिकरवीराणिशोभने कुंदमंदारकमलनीलोत्पलकुलान्यपि बकुलानिमनोज्ञानिकनकान्यपिशोभने द्विविधानिप्रफुल्लानिकरवीरा
णिशोभने जपापंचकपुष्पाणिपुन्नागकुसुमान्यपि द्रोणापामार्गकल्हारकेतकीकुसुमान्यपि फुल्लार्जुनप्रसूनानितालपत्राणिशोभ
ने कंटकारिप्रसूनानिस्वेतार्ककुसुमान्यपि तथाबिल्वप्रसूनानिसाधनीयानियत्नतः तथाकदंबपुष्पाणितथादमनकान्यपिआम्र

मल्लकपत्राणि बिल्वपत्राणि द्रोणके अन्यान्यपि सुगंधीनि साधनीयानि सादरं फलानि नारिकेलाम्रबीजपूरादिकान्यपि शक्तिर्यः फल
पुष्पाणि दि साधने सा शुद्धावह अतः प्रयत्नैर्विविधैः साधनीयानि तान्यपि सुंदरं मंदिरं कार्यं सुसुधालेपनादिभिः अलंकृतं च कर्तव्यं
वितानैर्ध्वजमंडपैः विचित्रवसनैः कार्यं विचित्रं शिवमंदिरं तोरणालंकृतं कार्यं हारराजिविराजितं पुष्पगुच्छसमाकीर्णं पुष्पमाला
समावृतं सुगंधद्रव्यसंकीर्णं पूगवल्लीसमावृतं तूर्यध्वनिसमाकीर्णं शिवगानविजृंभितं पुण्याहवाचनोपेतं द्विजमंडलमंडितं ए
वं कृत्वा शिवाचारं दीपमालाविजृंभितं रंभास्तंभसमाकीर्णं पूर्णकुंभविराजितं एतादृशे शिवागारे प्रविश्य च शुचिस्मिता पूजये
दुत्तमं लिंगं हेमरौप्यादिलक्षणं अथवा सैकतं लिंगं पूजनीयं प्रयत्नतः तत्रैव सैकते लिंगे ध्यायेन्मामव्ययं प्रभुं १२ ध्यायेदिंदुक
लावतंसमसकृद्वामांगभागोल्लसत्गौरीचारुतराधरामृतसुधारश्मिस्फुरद्वीक्षणं तत्पीनोरुपयोधराग्रविलसत्काश्मीरधारां
कुलं धीरं त्र्यक्षकरमिंदुसुंदरस्रजः कर्पूरगौरं हरं रत्नापारकिरीटकोटिघटितं कमनीयस्फुरन्मौक्तिकं सग्रैवेयकमिंदुखंडसुकरव्या
पारसारान्वितं हारापारविहारराजिरुचिरं रत्नांगदालंकृतं सौवर्णामितकंकणांगुलिलसद्भूषासमेतं शिवं गौरीनीलकुलाचला
भकबरीभारस्फुरन्नीरभाधौतं कृतं कंबुकंठविलसन्मूलं त्रिशूलामलं हस्ताम्भोरुहफुल्लपंकजमृगस्फारांगसंगं मुदा ध्यायेन्माम
गजीकरांबुजपदांभोजं चिरं सादरं (हस्तन्यस्तसमस्तगंधविलसन्मूलं त्रिशूलामलं हस्ताम्भोरुहफुल्लपंकजमृगस्फारांगसंगं मु
दा ध्यायेन्मामगजीकरांबुजपदांभोजं चिरं सादरं) हस्तन्यस्तसमस्तगंधविलसत्कस्तूरिकाकर्दमप्रक्षेपाभिमुखा विकाकुचतटा
लंकारत्रांकाकुरं शंकालंककलंकपंकरहितं शांतं प्रसन्नाननं सव्यासव्यपदांबुजानि सुषुमासंजालगंगाजलं एवं ध्यात्वा महादे

श्री:
३७१

बंमहाद्भिलनयान्वितं तस्मिन्नावाहयेल्लिंगेसर्वदामंगलावहे उमाकांतमहादेवलिंगेसन्निहितोभव सेकृतेस्मिन्प्रसादत्वंमंगलानि
प्रयच्छमे नवरत्नगणोपेतंसुसुवर्णविराजितं सिंहासनंगृहाणेदंत्रिलोचनशिवातुल पाद्यंगृहाणऽगौरीशाधनसारसमन्वितं
गंगाजलंनिर्मितंचशीलवालानिशीतलं गृहाणाचमनीयंचरत्नपात्रसमर्पितं आनीतंरत्नपात्रेणमुक्ताफलविराजितं २०० ततःपं
चामृतैःशुद्धैःअभिषेकंपृथक्पृथक् समर्पणीयमीशायमध्यपूजापुरस्सरं क्षीराभिषेकोत्तरमादरेणजलाभिषेकोपिसमर्पणीयः
वस्त्रेचदेयेतदनंतरंतुयज्ञोपवीतेनवचंदनंच पुष्पाणिदेयानिततःपरंचसुगंधवस्तूनिविशेषतश्च धूपप्रधूपोपिततश्चदीपःघृते
नगव्येनसमन्वितोपि तत्रप्रदेयाखलुवर्तिकास्यादेकादशावर्तिततंतुयुक्ता तथाविधाष्टांगुलवर्तिकाभिःतस्मावदेकादशवर्ति
कासुः देयंगोक्षीरपक्वान्नंमध्यंदध्योदनादिकं पश्चादाचमनीयंचकरस्योद्वर्तनंतथा तांबूलंव्यजनंछत्रंचामरंतर्पणंतथा पुनर्धू
पश्चदीपश्चपश्चात्पूजासमर्पणं एवंपंचाभिषेकेषुपृथगाभ्यर्चनंभवेत् पश्चान्महाभिषेकंसाद्रुद्रसूक्तादिभिःपरं रत्नकुंभसमा
नीतंस्नानायजलमीश्वर गृहाणविमलंदेवप्रसीदेतिसमर्पयेत् पश्चाद्दुकूलेनेदद्यात्बिल्वपत्रैर्मनोहरैः फलगंधोदकैःपश्चा
दभिषेकंसमाचरेत् पश्चादाचमनीयंचपश्चाद्वस्त्रसमन्वितं (एवंपंचाभिषेकेषुपृथगभ्यर्चनंभवेत् पश्चान्महाभिषेकंसा
द्रुद्रसूक्तादिभिःपरं रत्नकुंभसमानीतंस्नानायजलमीश्वर गृहाणविमलंदेवप्रसीदेतिसमर्पयेत् पश्चाद्दुकूलेनेदद्यात्बि
ल्वपत्रैर्मनोहरैः फलगंधोदकैःपश्चात्अभिषेकंसमर्चयेत् पश्चादाचमनीयंचपश्चाद्वस्त्रसमर्पणं) पश्चात्स्यात्कैलासंस्कारस
मर्पणमघापहं क्षीरसागरसंकाशाद्दुकूलेगिरिजापते गृहाणेतिप्रयत्नेनदेयंवस्त्रद्वयंमुदा उपवीतसमानीतंगृहाणानिसिते

प्रभो शंभो ताभ्यां पवित्रत्वं गृहीताभ्यां प्रयच्छ मे मृगमदरससारासारपाटीरसारद्रवरसघनसारसपारकाश्मीरपूरान् कनककमलगं
धागंधसिंदूरधारापरिवृतबहुगंधान् सांबशंभो गृहाण अपाररत्नाभरणानि शंभो किरीटहारप्रमुखानि सांब गृहाण तैराभरणै
गृहीतैः अपारैश्चानि मम प्रयच्छ मंदारकुंदनवकुंकुमकेसराणि नीलोत्पलानि कमलानि मनोहराणि श्रीकेतकीकनकचंपकपा
रिजातमल्लीप्रसूनसहितानि गृहाण शंभो जाजीप्रसूनकरवीरप्रसूनपुन्नागनागनदकोकनदानि शंभो घ्राणार्पितानि सुकु
शेन्द्रायसंयुतानि द्रोणाग्रपुष्पसहितानि मनोहराणि १६ दमनकनवबिल्वीपल्लवैरर्चयेत्त्वामभिनवसितदूर्वास्वर्णपुष्पादिभि
श्च बहुविधबहुपुण्यस्रग्भिरभ्यर्चयेत्त्वां विविधरुचिरगंधं गुग्गुलजातानि मीशं धूपधूमं गृहाणाशु मुमाकांतमनोहरं धूपधू
मप्रदानेन दुरंताघानि संहर कपिलाघृतसंयुक्तवार्तिकालंकृतान्बहून् दीपान् गृहाण सांबाद्य प्रसीद करुणानिधे नैवेद्यं परमा
न्नराशिसहितं गोक्षीरफेनप्रभं लड्डूकैर्वटकैरपूपसहितैः भक्ष्यैरपारैरपि शाकैरप्यमितैः फलैरपि युतं द्राक्षारसाल्यादिभिः साज्यं
शर्करयासमेतमसकृत्तुभ्यं भवानीपते दध्यन्नानि गृहाण तानि मम तत्पानीयमानीयते तांबूलानि गृहाण तानि विमलानि
त्वालवंगादिकान् कर्पूरामिलदीपजालघटितं राजेंद्रनीराजनं दीयते तुभ्यं शंकर तद्गृहाण गिरिजाकांतातिकांतं मुदा पुष्पांजलिं प्र
हाणेशाप्रसीद गिरिजापते प्रयच्छ मह्यं सौभाग्यान्यपाराणि महाप्रभो अंगपूजा ततः कार्या पुष्पैः पादनखावधि जटामंडलपर्यं
तं सांब ध्यानपुरःसरं सुरासुरशिरःकोटिकोटीरमणिकांतिभिः अर्चितान्यस्ते नखान् शंभो पूजयामि प्रसीद मे त्वत्पादांगु
लिजापार सुषुमापरिवेष्टितः अरुणोऽरुणतां प्राप तानि शंभोऽभ्यर्च्ययाम्यहं विष्णुनेत्रारविंदेन यत्पादतलमर्चितं तदर्चयामि

गौरीशास्वर्णपद्मैर्मनोहरैः रंदुकंदुकसंयुक्तंयज्जानुयुगलंप्रभो तदद्यगिरिजाजानेपूजयामिप्रसीदमे यदोरुभागसौंदर्यमृदुलुत्व
दिक्गुणाः ताताःशिवाम्यालंपुष्पैःपूजयामिप्रसीदमे तटित्कूटनिभंयन्नैःशंभोःकटितटंप्रभो तदर्चयामिप्रसवैरुत्फुल्लैःकोमलै
रपि यल्लिंगादभवन्तुपेंद्रविधयःसेंद्राःसुरासागराः गंधर्वोरगकिंनराअपिमुहुःस्तैरर्चितंमन्मुदा तत्तावत्कुसुमैःसुगंधलळि
तैःअभ्यर्चयामिप्रभोलिंगंमंगलदायकं गिरिशमेपुत्रान्प्रयच्छेस्तमान् यन्नाभिदेशंसरसीरुहाक्षीविलोक्यगौरीपुनरादरेण
आवर्तशोभेयमितिप्रसन्नातन्नाभिदेशंतवपूजयामि यद्वक्षस्थलमेविकाकुचतटापारस्फुरत्कांतिभिः तत्पाटीररसाभिषिक्त
विलसत्कस्तूरिकाकर्दमैः व्यासंतत्तवपूजयामिभगवन् आनंदयामंददश्रीकंठावकृपानिधानमननंदीनार्तिसंहारक गौरीच
रुकुचोरुमेरुशिखरस्फारप्रभासंभ्रमव्यापारव्यवहारसारनिकराभिख्यावृत्तौनेकरौ उत्फुल्लामलकेतकीदलयुतापारप्रसूना
न्वितैःगौरीसुंदरकंकणांगदमणिव्याप्तौसमभ्यर्चये यद्बाहुमंडलतटित्पदुमंडलेनगौरीशरीरसुषुमाप्पतिमंडिताभूत् तद्दा
हुमंडललसन्मणिप्रभादयं पुष्पप्रभादयमधुनाकरवाणिशंभो गौरीमनोहरविहारवरावस्थादस्वेदोदकामितमनोहरमौक्ति
कादयं श्रीकंठकंठमनिशंतवपूजयामिसोत्कंठमात्तकुसुमैरसमेरवाच्य तेनार्चयामितवविशेषफलप्रफुल्लतत्तुंडसाभिमुख
मीशमुखंप्रसूनैः अभ्यर्चयामिरसनामपिनासिकांचगंधप्रवाहसहितैःशिवतेप्रसूनैः नेत्राणिसोमरविवह्निमयानिशंभो
कर्णद्वयंचविलसन्मणिकुंडलाढ्यं अभ्यर्चयामिकुसुमैःखमौमहेशयोहंविनाशायविधेहिपरांश्रियंमे उद्वेलमक्षतसरि
इरसानेरादिनीरप्रवाहनिकरोप्यणुकल्पएव यन्मौलिदेशतुहिनांशुकलाभिभूतस्तन्मौलिमात्तकुसुमैःशिवपूजयामि रत्नं

गं

गपूजांविधिवत्कृत्वाकृत्वाप्रदक्षिणां नत्वास्तोत्रैश्चसंतुष्टः कुर्वन्योऽहंमुहुर्मुहुः स्वर्णाकारजटाधरायभगवन्तुभ्यंनमस्तेनमः शंभो
भर्गभवांबुराशिजभयापारयथानाथप्र दीनानाथशरण्यपुण्यविभवप्राप्यांबिकावल्लभस्वामिन्शोभनदायमघंकुरुमेगौरीशि
नोदंपदा यत्पादांबुजपूजनानिसकलश्रेयोनिदानानिमे पापापारतरंगिणीदिनकराकाराण्यतुल्यान्यपि दुःखापारवनानलानि
सकृदप्यालोकितानिप्रभोशंभोलानिकरोमितावदधुनासंपत्प्रदानायमे यल्लिंगार्चनवीक्षणेनसकृदप्यानंदसिंधुर्मुहुः संपद्
पत्तरंगसंगललितः प्राप्तोभवत्यन्वहं तल्लिंगार्चनमेवसंततमहंकर्तुंप्रवृत्तःफलं तन्मेवांछितमिच्छयापितनुतेदृष्टंसकृद्भावनं॥
इंद्रोपेंद्रपुरस्सरैरपिसुरैर्लिंगंयदाराधितं गंधर्वैरपिकिंनरैरपिमुनिश्रेष्ठैश्चसिद्धैरपि तत्पूजांकरवाणिशूलविलसत्पाणेक्षणं
चारयोनिर्वाणेमरणेपिवासकरुणाप्राणप्रयाणेपिवा श्रीत्यासंततमंतकांतकपदांभोजार्चनात्सादरास्तेशूरास्सुरपूजितांघ्रिक
मलाःकल्याणलोलादयाः तत्सर्वंकमलाविलासमिलथापारांगणास्फन्नतानंतोन्मत्तमतंगजाश्वतपुरद्वानराधीश्वरः यल्ली
लालवएवसृष्टिकरणोपायोनपायःप्रिये देवानामपितंभजामिसकृदप्याराधितोयःशिवः इत्यंतःसकलेप्सितान्यपिमुदःदातुं
ततःशंकरं तत्संस्थामिसमर्चयामिमनसाबिल्वैःप्रसूनैरपि यल्लिंगार्चनतोभवंतिबहवःपुत्राश्चपौत्रादयः वृद्धिंसंततिरेतिसं
वदपिसावृद्धिंप्रयास्यत्यलः लिंगाराधनमेवमेसुखदंभिसन्त्यादिहाथादरात् कर्तव्यंकरुणाकरःसभगवान्निष्टार्थदस्तेनमः इ
तिस्तुत्वामहादेवंप्रणम्यचपुनःपुनः पूजायथाक्रमंकर्तव्याकुसुमादिभिः मत्स्यकथाश्रवणेनैवरात्रौजागरणंशिवे कर्तव्यम

दिव्याक्षरया ... शुक्ल ... त्रिपुंड्रं ... रुद्राक्षकंकणादि ...
कार्यं आगरं ... अरुणोदयवेलायां पुनः पूजां विधाय ... सूर्योदये ... शिवं पूजनं मम ...

त्तियत्नेनतूर्यादिभिरपिप्रिये कार्यंनाट्यंन्वनारीभिः त्रिकालिंगसंनिधौ पश्चादुपायनंदद्यात्कलोपूपादिभिर्वृतं शैवेभ्यः सत्कुटुंबेभ्यो दक्षिणादानपूर्वकं दक्षिणालक्षमाषंस्यात्सुवर्णानांवरानने सायथाविभवंवास्यात्विचशाठ्यंनकारयेत् सौवर्णंराजतंवास्यात्वैणवंशूर्पमुत्तमं तस्मात्तैःपूरितंकार्यंअपूपाद्यैविशेषतः दुकूलंवेष्टितंकार्यंस्वर्णलिंगसमन्वितं तच्छंभवायदातव्यंशिवध्यानपुरस्सरं उपायनंगृहाणेदंअविकारमणाप्रभो अभीष्टितार्थदंस्वामिन्शोभनानिप्रयच्छमे इतिमंत्रंसमुच्चार्यदत्तोपायनमादरात् भोजनीयाःप्रयत्नेनशांभवाःस्वादुभोजनैः एवंकरोतियानारीव्रतमेतद्वरानने सापुत्रपौत्रसंयुक्तासर्वसंपद्युताभवेत् सानप्राप्नोतिवैधव्यंदुःखंनाप्नोतिसर्वथा कीर्तियुक्ताभवेन्नित्यंअपकीर्तिविवर्जिता इदंव्रतोत्तमंदेविसर्वसंपत्करंपरं इतोपिनाधिकंशास्त्रेव्रतंदृष्टंमयाशिवे कपिलउवाच इतीशावचनंश्रुत्वागौरीशंकरवल्लभा संतोषंपरमंप्रापव्रतमाहात्म्यकीर्तनात् सोमवासरसंयुक्तातृतीयाथःस्वभावतः अयंखलुमहायोगःशिवयोगःशिवप्रदः अतःस्त्वयापिकर्तव्यंइंदिरेव्रतमुत्तमं अयंभाद्रपदोमासःशुक्लतृतीयापिशोभने हस्तनक्षत्रसंयुक्ताशुक्लपक्षशुभावहा तवभाग्यमिदंप्रायःसंपन्नंकमलेधुना श्वस्तृतीयापिसंप्राप्तासेयंव्रततिथिःखलु सिद्धैवसर्वासामप्रीतयापूजयशंकरं अत्रैवातिप्रयत्नेनकपिलेशस्यसंनिधौ गरुडःशिवभक्तोयमानयिष्यतिसाधनं सर्वामरांगनायुक्ताकुरुशंकरपूजनं संविशोमूर्छितोवापिमृतोवादैवयोगतः आयास्यसेवतेभर्तातद्व्रताचरणाध्रुवं संशयोत्रनकर्तव्यःकमलेविमलेक्षणा शांभवंव्रतमेवेदंसुरसंजीवनीतु सर्वलोकोपकारायशिवायैगिरिशोदितं अवश्यमेतत्कर्तव्यंवैधव्यविनिवारकं वैधव्याद्यानिरूपमेवकमलेशैवव्रतंसादरं श्वःकर्तव्यमनेनतेपरिरितुष्टांयास्यत्स्वरूपंसुरैः साकंपद्मदीयमेववचनंविश्वस्यसत्यंमयाप्रोक्तंशंकरपादयोरपिशपाम्यनितैः

... दूर्वांकुरादिभिः ... नैवेद्यं ... पूजयेत् ... मम ...
... पूजयेत् ...

नार्थवादोपिन अत्रैवोदाहरंतीममितिहासंपुरातनं शृणुपद्मेप्रवक्ष्यामिसर्वदुःखविनाशकं पुरात्रिपुरसंहारंकर्तुमभ्युद्यतःशिवेः प्राहगौरीं
प्रयत्नेनसमालिंग्यपुनःपुनः श्रीशंकरउवाच त्रिपुरासुरइत्येकः दैत्यानामधिपःशिवे ससर्वसुरनाशायप्रवृत्तःसमहान्खलु तच्छरीरं
गिरिसुतेकोटिपर्वतसन्निभं ऊर्ध्वदंष्ट्रिगणाकारंकामे। रचरतिस्वयं पुराणितस्यविमलानित्रीण्यपरचराण्यपि तेषुतेषामवस्थान
मसुराणांदुरात्मनां तारकाक्षोमकराक्षश्चविद्युन्मालीतितेत्रयः तेजगत्त्रयसंहारंकर्तुमत्यसमुद्यताः नारायणादयःसर्वेतद्भासैवदि
गंतरं आप्ताःकुटुंबसहिताःपुत्रैरपिसमन्विताः तेषांप्रतिभटोल्लोकेनकोप्यस्तिवरानने तत्संहारोपिकर्तव्यःप्रयत्नैर्बहुभिर्मया तथा
सहमगंतव्यंविलंबोपिभविष्यति युद्धप्रदेशोनारीणांअन्वितंगमनंतुन संभावितःप्रयासोपितत्रयुद्धेमहासुरैः कुमारोगणनाथ
श्चरक्षणीयंत्वयाशिवे प्राहशुक्लतृतीयायां यत्सौमंगल्यदंकृतं तत्कर्तव्यंत्वयागौरीयन्मयोक्तंपुरामुदा वैधव्यनाशकत्वेनतद्व्र
तंपरिकीर्तितं तदवश्यंत्वयाकार्यंप्रमादंमाकुरुप्रिये पुरातेनासुरेणाशुमुनयोनिहताःशिवे ऋषिपत्न्यस्तदासर्वाःसंताप
व्याकुलाअपि दृष्ट्वानाशंतदासंप्राप्तोनंदिकेशोगणाधिपः उवाचतासांदुःखानिनिवारयितुमादरात् नंदिकेश्वरः अरुंधति
मुख्याःसर्वाःकिमेवंदुःखसागरे निमग्नाःशंकरध्यानंकर्तव्यमतियत्नतः किंचवैधव्यनाशायतृतीयाव्रतमीरितं तत्कर्त
व्यंप्रयत्नेनसौमंगल्यंभविष्यति मतोयमांतकंनीतोयायास्सेवंव्रतेकृते तस्मादवश्यंकर्तव्यंतद्व्रतंपापनाशकं इतितद्वच
नंश्रुत्वासर्वाःसंतुष्टमानसाः यथोक्तविधिनाचक्रुःतृतीयायाव्रतंशिवे समागताश्चमुनयःतद्व्रताचरणोत्तरं तान्दृष्ट्वा

विस्मिताः सर्वाः पुलकांचितविग्रहाः आनंदाश्रुसमाकीर्णाः प्रणनाम्लानहांबुजे तेपि प्रहृष्टा मुनयः तां प्रोचुः प्रीतिपूर्वकं मुनयऊ
चुः किमुत्तमं व्रतं चीर्णं अस्माभिः समुपागतः सर्वदुःखविनिर्मुक्तैः असुरोदरसंस्थितैः कुत्र व्रतमधुनाकृतमेव महत्तरं एता
दृशं कृतव्राणां त्वाभिः पुण्ये महत्तरैः कथं वा तद्व्रतं चीर्णं केनोक्तं महता व्रते आनिवासाधमानीतिवक्तव्यमतिसादरं ततस्तद्वच
नं श्रुत्वा ऋषिपत्न्यः प्रणम्य तान् नंदिकेश्वरोक्तमिसाहुः व्रतं शोभनमुत्तमं ततः परं प्रहृष्टास्ते गताः स्वस्वाश्रमं प्रति तदा प्रभृति
तैः सर्वैः तद्व्रताचरणं कृतं तेनैव सुखमासाद्य स्थिताः सर्वे निरंतरं ततः कुरु प्रयत्नेन गिरिजे तद्व्रतं मुदा रक्षकोस महादेवोय
योयुधायसादरं तया च तद्व्रतं चीर्णं शिवयाप्यधिकं प्यके ततास्त्रिपुरसंहारं कृत्वा गौरीमनोहरः समागतो गिरिजया सह रेमे
महेश्वरः ३०० अंविक्रांतं महादेवं दृष्ट्वा त्रिपुरनाशकं तद्व्रतस्यैव माहात्म्यं ज्ञात्वा निति तुतोष सा तस्मात्त्वयापि यत्नेन कर्तव्यं तद्व्रतं मु
दा अनाश्वासो न कर्तव्यो दुःखं सज विशेषतः इति तद्वचनं श्रुत्वा सुरदारा ततः परं चक्रुस्तद्व्रतमत्यंतं संतुष्टहृदया स्सदा गरुडेन
समानीतो समया विधिचोदिता तया न्यग्व्रतं चीर्णं कपिलेशस्य संनिधौ ततः परं मुनिवरं दृष्ट्वा कपिलनामकं प्राह नारायण
सतिशाच्या किं दिक्समन्विता श्रीलक्ष्मीः व्रतं चीर्णं प्रयत्नेन विधुनैरेव साधनैः नांगतोपोपि संवृतो विभवोपि स्थितस्तथा अ
द्यापि नागता एव देवाः केपि मुनीश्वराः अतः परं चैतस्मिन् विश्वासोपि कथं वद यं यंचे क्रियते कर्म तदा न फलसंभवः सांगेपि
तत्फलाभावः कथं वा वद सत्वरं नार्थवादे पितच्चेति शापयोधिकृतस्त्वया अतः परं किं विधेयमिति चिंतासमाकुला ततः परं सु
वाचेत्थं कमलां कपिलाभिधः मुनिः कालविदां श्रेष्ठो वरिष्ठः ज्ञानिनामपि कपिल उवाच इंदिरे सुरसंवीतः समायास्यति ते पतिः क्षिपादे

नैवकर्तव्यंविश्वासंकुरुतेद्रुते नत्वाहंद्यांव्रतंनैवयेनेष्टंनफलंभवेत् तस्यव्रतस्यमहिमादृष्टव्यश्चत्वयाधुना एतस्मिन्नंतरेकालेदुंदुभि
ध्वनिरुत्थितः श्रुतस्तयाकमलयासुरदारैश्चतैरपि ततःपरंप्रहृष्टासाविलोक्यगरुडंमुहुः कुतोयंध्वनिरित्याह कमलाविमला
नना सोपिश्रुत्वाध्वनिंतस्याःश्रुत्वाचवचनंमुदा तामाहप्रणतोभक्त्यादुंदुभिर्ध्वनिरित्यपि ततःसानत्वाकमलांकपिलंकपिलेश्वरं।
तद्वाभिमुखोभूत्वागरुडःप्रययौतदा ततोदूराद्विनिर्धिसस्सुरागमनमादरात् आगतानमरान्महलक्ष्मीकुशलपूर्वकं ततःप्रसं
नवदनाकमलाकपिलेश्वरं नत्वातंकपिलंप्राहकृतांजलिपुटातदा श्रीलक्ष्मीरुवाच व्रतोपदेशेन धन्यास्मिमुनिपुंगव अविश्वासलयोजा
तोविश्वासोमेप्रवर्धते देवाःसमागतास्सर्वेजीविताःशिवपूजया धन्यंव्रतमिदंधन्यंधर्मंधन्यंव्रतोत्तमं नजानेज्ञानेनज्ञानेनजानेनजानेन
जानेशिवान्यंनजाने शिवाराधनेनैवसौख्यप्रवृद्धिःशिवाराधनेनैवसंपत्समृद्धिः।१।शिवाराधनेनैवदेवाःसजीवाःशिवाराधनंतत्रसंजीव
नीच व्रतस्यास्यमाहात्म्यमत्यद्भुतंच प्रदृष्टंप्रयुंजातमेवंकथंवा व्रतानामिदंतावदस्युत्तमंहिव्रतंश्रेष्ठमेतत्कृतंदैवयोगात् मृतायेनदेवाःपु
नस्तेनसर्वेकथंवास्यशक्तिः अहोनजानंतिविमूढचित्ताःशिवप्रभावंशिवपूजनस्य सामर्थ्यमेवंमृतजीवनायव्रतंचतेनोक्तमिदंप्रसृष्टं
रसानंदवर्धोवीचिसुधापानरतातदा कमलापितदादेवाःसर्वेतेसमुपागताः आगत्यतेसुराःसर्वेनत्वातंकपिलेश्वरं पुष्पाद्यैःपूजयामा
सुःजीविताःस्मस्त्वयेत्यपि ततःपरंमुनिंनत्वाकपिलंभस्मभूषणं रुद्राक्षभूषणंशैवंप्रोचुःशांभवसंयुतं देवाऊचुः शांभवायनमस्तुभ्यंरु
द्रपूजापरायच भूतिप्रधूषितदेहायरुद्राक्षाभरणायच तत्वज्ञस्त्वादृशोलोकेनदृष्टोनश्रुतोयतः व्रतमुक्तंत्वयाशैवमस्मज्जीवनसाधनं
यदुक्तंयद्व्रतंचीर्णंसुरदारैर्विशेषतः तेनैवजीवनंजातंमागतंचमुदाधुना दीर्घनिद्राप्रविष्टानांजीवनायसमीरितं शांभवंव्रतमे

तावद्दत्तानामुत्तमव्रतं त्रोषेणतावदस्मभ्यंमुक्तमेतद्व्रतंकृतं सुरदारैस्तयापीत्कंइतिपीयूषसंनिभं अकस्मादेतदुत्थानंयदासमभव
त्तदा किंकृतंव्रतमित्सेवदारैरितिविचारितं मृत्युंजयव्रतेनैवमृत्युंतरतिसर्वथा नान्यथेत्यपिनिर्णीतं नत्तथैवाभवन्मुने अतःपरं
जीवनंतुजातमेवशिवात्तया कथंस्वस्वालयप्राप्तिःभविष्यतिवदाधुना इतितद्वचनंश्रुत्वाकपिलोमुनिपुंगवः प्राहगंभीरयावाण्या
वाणीपतिसुरान्सुरान् कपिलउवाच शिवाराधनसामर्थ्यंनज्ञातंनिगमैरपि अतःकथंतदल्पेनज्ञेयंभवतितत्त्वतः महादेवःकृपा
सिंधुर्यदाजीवनमिच्छति सुराणामसुराणांचतदाभवतिजीवनं उपायमपिवक्ष्यामिदैत्यानांविजयेसुराः स्वदारास्ताहिताःस्तावच्चि
रंतुसुखिनोधुना इतितद्वचनंश्रुत्वापूजयित्वामहेश्वरं नत्वातंमुनिशार्दूलस्वकलत्रैःसमन्विताः स्वस्वांगनांगसंगेनतत्तदालिंगितै
रपि सुधापानेश्चसंतुष्टाः सर्वेनारायणादयः ततःसंतुष्टहृदयाःकृतकृत्याश्चतेसुराः नत्वातंकपिलंप्राहुःकृतांजलिपुटाःपुनः देवा
ऊचुः प्रचंडानगरापारज्वालामालासमाकुलाः मुनेवयंसुरास्सर्वेजीवनंचगतंखलु शिवव्रतप्रभावेनपुनर्जातंचजीवनं अतःपरं
कथंतस्यबलहानिर्भविष्यति मुनिरुवाच सुराःशृण्वंतुमद्वाक्यंप्रचंडःप्रबलोमहान् ततःपराजयस्तस्यकथंसंभावितोवद अपारंत
स्यतत्सैन्यंसोपिशूरवरःपरः शांकराग्रेसरस्तस्यकदापिनपराजयः स्वप्नेपिशांकरःसाकंशांकराराधनप्रियः अतएवबलंतस्यचर्धते
चप्रतिक्षणं अतस्त्वत्कष्टशिवार्चनस्यफलमित्स्येतन्मयानिश्चितं तत्सामर्थ्यमखंडितंखलुतदासंप्रत्तसमृक्षोपिसः तंक्रोवाभुवनत्रये
पिवदमेजेतुंसमर्थःसुरोगौरीकांतपदारविंदभजनासक्ताःसदाराक्षसाः प्रचंडोऋषिशार्दूलसताचत्कहुल्ताभिधः पूर्वंपूर्वभवेचत्ते
नशांकराराधनंकृतं तेनार्चितानिलिंगानिप्रत्यहंकोटिशःसुराः कमलैरमलैपुष्पैःनवबिल्वोदलैरपि उत्फुल्लापारकनकप्रसूनैरपिप्र

जितः द्रोणपुष्पैरश्वमार्गैः शिवस्तेन समर्चितः लिंगानि स्थापितान्येव कोटिशस्तेन सादरं सुवर्णमंदिरेष्वेव पूजितान्यपि को
टिशः सुतश्शांभवविद्यायां प्रवीणो निपुणो बलं शंकरा एव तद्दाराः तत्कृता अपि कोटिशः तं तादृशं विवरं तं दृष्ट्वा कें॰रूपमु
पागतः भवंतं पूर्वममराः तद्विघ्नाचरणोद्युताः भवद्भिर्यतिरूपेण गत्वा पूर्वं तदाश्रमं अत्रैव रूपमासाद्य तदा तत्कोपव
र्धकं तदा प्राह सत्रीवेद्रौहृद्ग्यादेवानत्र शांभवान् हंतव्या एव सर्वेपि सुरा इति पुनःपुनः अत्र शांभवेष्वपि महेश्वरेण दत्तं किमै
श्वर्यमतिप्रकृष्टं एतेवधार्हा इति मन्महे हि स एवं तावत्प्रबलो महात्मा ततः परं स तेनैव शारीरेणातिदारुणः ववृधे सुरसं
हारं कर्तुमेवातिकोपनः तस्याभवत्तथारूपं शिवपूजाप्रसादतः यद्दृष्टमपि शक्यन्न सर्वथा भवदादिभिः सज्जन्मनानदे
स्यापि मुनिरेव शिवार्चकः दैत्यकर्मकरत्वेन दैत्य इत्यभिधीयते गतं शिवाराधनकाल एव भवद्भिरित्याकुलमानसोऽभृत्
अत्रैव बुध्येव भवत्सु विघ्नो कृतोपि विश्वेशपदार्चनेषु अतस्तेनैव कोपेन तपोपि समभून्महान् तेनाग्निकल्प एवासी
त्स एव मुनिपुंगवः अतः परं भयं ज्ञातोभवतां तु पराभवः तेन शांतः स कोपोपि तस्य तावन्महामुनेः अधुना शिवपूजा
यां प्रवृत्तः स्वसुतः परं सकलत्रः ससैन्यश्च यास्यत्येव शिवं प्रभुं तस्य तावत्कलत्राणि शिवविद्यास्थितानि तैः शिववि
द्यामूर्तिपंक्तिदाराकारमुपाश्रिता तत्सैन्यं तस्य शिष्यास्ते हारवीराः प्रकीर्तिताः तस्य तन्नगरं तावत् आश्रमस्तस्य पा
वनः आश्रमास्तरणान्येव कुशानां केवलं खलु अग्निप्राकाररूपाणि जातानि विमलान्यपि अद्य सायं महादेवं प्र

श्रीः
३५४

पास्पतिमहोत्सवैः कैलासनिलयं प्राप्य स्थास्यत्येव गणैः सह पराभवार्थं भवतां तेन रूपं धृतं तथा कृते पराभवे तस्य कोपः शांतोपि
सर्वथा नृपाकल्पमतिस्तस्य सयतः शंकरः परः एतस्मिन्नंतरे काले संवृताप्यशरीरवाक् प्रचंडः शंकरं प्राप सभिन्नूरूतिसास्तु
ता तदा संतोषसंपन्नाः सर्वे नारायणादयः कपिलेश्वरमभ्यर्च्य नत्वा प्राहुर्मुनीश्वरं देवा ऊचुः त्वतःप्रसादात्परमात्सजीवाः
सर्वे वयं तत्त्वरूपयाधुनातः स्वस्वालये लिंगमनं नियुक्तं दस्यूच्चुकैः स्वकलत्रयुक्ताः ततस्तानाह स मुनिः तथास्त्विति ततः
परं प्रययुस्ते सुराः सर्वे सकुटुंबाः सुतैः सह गत्वा ते स्वस्वनिलयं यथापूर्वमवस्थिताः परमानंदसंपन्नाः स्वस्वदारसमन्वि
ताः शिवप्रसादेन निजालयेषु स्थित्वा शिवाराधनमादरेण कृत्वा शिवाराधनसाधनानि संपाद्य नित्यं सुखमापुरार्ये किंकिंक
र्त्तेवा मर्शिवार्चनेन भविष्यतीति प्रवदामि वाले शिवव्रतस्यास्य फलं प्रकृष्टं दृष्टं मया देवगणैश्च दृष्टं कर्ता शंकर एव सर्वं जग
तां पुराधिदेवो भवो भर्तापाति स निश्चितो मुनिवरैः देवैश्च वेदैरपि ज्ञातापि त्रिपुरांतको गिरिकुलश्रेष्ठासजाकामुकः संह
पि सुरासुरानतशिरोरत्नस्फुरत्पादुकः जानंत्येव न वेदराशिविभवास्तं हे भवं शंभवं तं को वा वद विस्तरेण गदितं शा
क्नोति त्रिलोकोपि वा को वा तिष्ठति भूतलेपि सुतरां स्वर्गेपि सत्येपि वा वैकुंठेपि सुरासुरार्चितपदांभोजास्स मृत्युंजयः
यत्सामर्थ्यमपारवेदनिकरैर्न ज्ञायते सर्वथा यत्पादांबुजपूजया जडमतिर्वागीश्वरीवल्लभः स्याल्लक्ष्मीरमणः शचीप
तिरपि स्याद्गिरींदुस्तथा भानुश्चेति तमीश्वरं गिरिसुताकांतं भजे संततं यं भक्त्यापरभूरुहं सुरकुलं राध्यं च सिस्सार्मि

केतर्नी

तंगं धर्वादिसमर्चितं च परमं पादुस्त्वमेकं शिवं ध्यात्वा चित्तमनंतपातककुलापाराटवीकोटरापाराग्निंसुखरूपमेत्य सततं तं चिंतनाभ्युद्यतं तं वंदे मुहुरादरेण गिरिजावक्षोजकाश्मीरजापारश्रीरसरंजिताप्रविलसत्कस्तूरिकाचर्चितं तत्पाटीररसाभिभूषितमपि व्यालेंदुकुलोत्तमैर्हारापारविराजमानवपुषं जोषं प्रदोषेष्वपि यल्लिंगादभवत्समस्तमसकृल्लुभ्रमंडलं कुंडली यत्कर्णोत्तमकुंडलं मणिगणश्रीमंडलालंकृतं तं हारोत्तममानसांबुजवरश्रीकर्णिकासंश्रितं श्रीकांतार्चितपादुकं भज मनः शैलस्य जाकामुकं ३८ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे पार्वत्युपाख्याने कुसंवादे तालसप्तचत्वारिंशोऽध्यायः ४७ श्रीसांबशिवार्पणमस्तु इति तद्वचनं श्रुत्वा वाक्पाणीविचक्षणा मुकुंदः प्रणम्य भर्तारं प्राह सत्यव्रतं पुनः भगवन् गिरिशं प्राप गिरिराजसुता कथं आविर्भूता कथं वा सा श्रीगिरीश्वरमंदिरं ॥ तेन वा कितपस्तप्तं येन गौरी त्रिलोकनं तद्वाल्यलीलाकलनं जातं पीयूषसंनिभं इदं सर्वं विशेषेण वद कारुणिकोत्तम इति तद्वचनं श्रुत्वा प्राह सत्यव्रतं सती सत्यव्रतः पुरा हिमाचलः सृष्टः शंकरेण कुलाचलः भूधारणार्थमेतस्य सृष्टिरासीद् गुरानने धृतस्तेन धराभारः सुमेरुः प्रसुरैः सह तेन तावद् धृतं पूर्वं अतलं प्रति निर्मलं तत्रैकस्याथ संचारः केवलं सस्त्वयं परं शिवप्रसादलेशेन कूर्माधारतया श्रितः तन्मूलसानुनिलयः कूर्मस्तत्सानुसंगमात् नभः भारभयं प्राप सत्संगः खलु गाढ इः महावायुसमाक्रांतमतलं तत्र निर्मितं लिंगमेकं महेशेन निर्मितं रत्नमंदिरं तस्मिन्नेव महादेवो मंदिरे सुंदरे स्थितः गौर्या सह विलासेन तदेकांतस्थलं यतः तस्मिन् लिंगे स गौरीशः करोति शिवपूजनं कमलै रमलैः पुष्पैः कोमलैर्बिल्वपल्लवैः द्रू

यांकुरैरभिनवैः कनकैर्दमनैरपि चंपकैः केतकीपुष्पैः जपापुष्पैश्च कोटिभिः ततस्सायं महेशानं ददर्श गिरिजापतिः नृत्योत्सवेन संतु
ष्टमं विकावीक्षणश्रियं यदा तेन शिवा दृष्टा तदा सा शिववल्लभा क्रीडारता बालिकेवायौवनेनापि संयुता युवती तेन दृष्टा सा यदा शं
करवल्लभा तदा पर्वतमालोक्य शंकरः प्राह तं गिरिं तेनार्चितोति संतुष्टः तस्मिन्नु लिंगे मनोहरे किं त्वया दृश्यते मूर्तिः कापि सा शोभने
ऽपि हिमवानुवाच भगवन्दृश्यते लीला कापि बालेव ते मया सा तु सद्यः समुत्पन्ना कन्यकेव विराजते अपूर्वमिदमत्रेदं जननी नात्र
दृश्यते ऽन्यपानोन्मुखा सेयं का वा तज्जननी शिवा कुत्रास्यास्सा स्थिता शंभो नात्रान्यः कोपि दृश्यते अतः परं पालनं वा कथमस्याः सदाशि
व १९ श्रीसदाशिवः शैलेश्वर प्रसन्नोस्मि संप्रत्यस्तत्कृतपूजया अपूजितमिदं लिंगं पूज्यते सादरं त्वया नात्रामराणां संचारः किंनराणां वि
शेषतः गंधर्वाणां न संचारः सिद्धादीनां च सर्वथा अत एव परं लिंगं ह्येतत्संपूज्यते मया तवाप्येतत्किलाधार धराधरत्वसाधनं इदं
दृष्टं त्वया रूपमपारतपसा गिरे धन्योसि कृतकृत्योसि मत्पूजाफलमीदृशं इयं बाला पालनीया लालनीया च सादरं मंदिरं प्रति ने
यापि विनयाभिन्नैः परं एतदालोकनायापि यावदागम्यते मया तावत्तालनमेतस्याः कर्तव्यमतियत्नतः इत्युक्त्वांतर्दधे सांबस्त
स्मिन्नु लिंगे मनोहरे सगौर्याः कामरूपाणि स्मरंस्तद्देष्ट भवार्णवात् ततः परं स शैलेंद्रो विस्मयं परमं गतः कथमेतल्लालनं स्यादि
ति चिंताकुलस्तदा ततः स्मारमेनां तां मेनामेतु स्फुलामिव साप्यागता तदा मेना तां दृष्ट्वा विस्मयं गता मेनोवाच केयं बालातिवि
मला चाल विद्युल्लतामिव केन भाग्येन दृष्टेयं मपूर्वा मूर्तिरीदृशी एतस्या दर्शनादेव ममानंदः प्रवर्धते आनंदमूर्तिरेवेयमानंदं दातुमि
च्छति इति तद्वचनं श्रुत्वा प्राह मेनां सलस्सतिः शिवशिष्य पूर्ववृत्तांतं स्मृत्वा स्मृत्वा यथाक्रमं ततस्तदुक्तमाकर्ण्य सापि मेनातिविस्मिता

शिवासंकल्पितासेयंशिवानूनंशिवप्रदा इत्थंचास्तातिसंतोषःदुंदुभिध्वनिपूर्वकं तमादाययौमंदंसुंदरंनिजमंदिरं यदाप्रविष्टागिरिरा
जराजकांतस्वराकारमृगेंद्रमारा तदेवयथ्रादिस्फारांगनाश्चसमागतास्तत्संसेवनाय देवदुंदुभिनिर्घोषतूर्यध्वनिविराजितं तदात
न्मंदिरंजातस्फारनारीसमावृतं अंतकांतकमनोहरकांतासेयमित्यभिनवैरुपचारैः तामपारसुरकिन्नरदाराश्चामरैरपिसिषेवुर
पारैः सुरदारानपारांस्तान्स्तदाराधनतत्परान् विलोक्यपरमंप्रापसंतोषंगिरिनायकः सुरांगनानांचकृमंगलानिगानानिजो
त्तांतरतल्पसंगे तस्याःप्रजातानिसुमंगलेपिसंप्रापमहीभृत्खिलमंगलेति श्रीसर्वमंगलैर्दोलालवेयमुडुमंडलैः अलंकृतापर्यप
र्यंकेस्यांदोलनपराःसुराः हिमवानपितान्दृष्ट्वासदारसहितान्सुरान् संतोषंपरमंप्रापमंगलंजातमित्यपि तदाप्रभृतितद्दा
राःसुराणांशैलमंदिरे तत्सेवार्थंनिवासंचचक्रुरानंदसंभृताः शोबालिकाशागरदाश्शुक्लपक्षनवेंदुरेखेवस्फुरत्तायतेषां शनैःशनैर्वृ
द्धिमवापसापिमनोज्ञरूपाणिकृपास्वरूपा स्फुरद्दारकलोपचारभारादतिवार्यैवविनोदशालिता महिलेतिशिवस्यैतेरुदारैरनुवारं
परिसेविनापिबाला रूपयौवनसंपन्नामेनामेनांमुहुर्मुहुः विलोक्यपरमानंदंप्रापदुष्प्रापमन्वहं ७८ ततःपरंकिंनरसिद्धसुध्रगंध
र्वनारीपरिसेविताप्ता चचारशैलेंद्रगृहेमनोज्ञे विद्युल्लतेवामितमूर्तिरूपा मेनयासहशैलेन्द्रोविचारंचचकारसः ७९ कृत्वानेतो
मूर्तिसौंदर्यावाहिनीसेयमित्यपि मेनावचनधाराभिरानंदंप्रापशैलराट् ततःपरंपरिणयःकथंभावीतिचिंतया मेनयासहशैलेंद्रो
विचारंचचकारसः ८० त्वद्बुद्धिभिस्तावदियंमयापितातेवसंपूर्णवयःप्रमाणा अतःपरंकिंसमयोपिवृत्तःपाणिग्रहस्यापिशुभग्रहे
षु कोवाभविष्यतिपतिर्भाग्यवाननमितप्रभः तज्जानेसपतिःप्रायःप्रियमेताहशांवसु विद्युल्लतानामपिकोटयोयेनतत्स्वरूपस्मर

सा

योपिदूरं प्रायःप्रयांत्येव न लज्जया किं कुःस्तत्समानः पतिरास्तिलोके आसर्वदेवासुरदुरवंद्या प्रायःशिवानीतिमतिर्ममापि जातोविवाहो
भविता कथंवा कोहंशिवाः कामरवद्यपादः इत्येवं चिंतयानित्यं गिरिसाहारवर्जितः विचारसागरेमग्ना पुनःपुनरुदारधीः यासर्वमंग
लासापिताङ्कुराधींगभागिनी स्वस्वरूपमनुप्राप्यचचारगिरिमंदिरे तेनस्वरूपेणपुनर्महेशं प्राप्ताभवानीशिवपूजनेन मतिंचक्रा
रातिमनोज्ञरूपाशिवव्रतेनापिपुनस्मृतेन सागौरीविजयायुक्ताजययापिसमन्विता तृतीयाव्रतकालंच प्राप्यप्राहवचोमुदा जये
सुरसरित्तीरेनीरजातिमनोहरे स्थित्वानेयःक्रियान्कालो मयेत्याहानिद्रोभवा ततःपरंसाचतुरंतयानेस्थित्वासखीद्वंदनिवारिता
पि ययौसरित्तीरमुदारमंबाभूतैःशनैरंबुरुहातिधीरं ददर्शसासरित्तीरे मुनिनारीगणांस्त्रिया सातृतीयाव्रतंकर्तुंउद्यतंसर्वसाध
नैः भ्रतंचकारसागौरीसुयुक्तंपुरवैरिणा तद्देवेतिमितिस्मृत्वासंतोषंपरमंययौ ततःपरंजयामाहतामभिःकिंक्रियतेजये व्रतंविचार
याद्येतिसर्वज्ञापिशिवप्रिया ततःप्रणम्यतांगौरीगत्वामुनिवरांगनाः प्राहकिंवाव्रतंकर्तुंआरब्धमितिसादरं मुनिपत्न्यऊचुः इंकृतृती
याव्रतमेतदेवसौभाग्यसंपत्तिकरंमनोज्ञं संतानवृद्धिप्रदमेतदेववैधव्यदौर्भाग्यविनाशकंच दृढपुरावल्लभ[illegible]शिवोक्तमेवंव्र
तमादरेण अस्माभिरप्यद्यशिवप्रसादलाभायतावत्क्रियतेनिशायां कन्यकापिव्रतंकृत्वापतिमाप्नोतिसुंदरं धीरंमनोहरंवीरान्
कुमारानपिसुंदरान् एतद्व्रताचरणमेवनिधानभूतंएतद्व्रतंसुरतरुःखलुकामधेनुः एतेनतावदखिलेप्सितसिद्धिरेवमागत्यदेव्र
तमितिप्रवदंतिवेदाः अयोत्सवेनतिथिजागरणेनपूजाकार्याशिवस्यकुसुमादिभिरादरेण लिंगंमनोज्ञंसिकतामयंतदस्मिन्नभ्य
र्च्यदिशितिभाग्यमपारमीशाः इतितद्वचनंश्रुत्वाजयालामाहशांभवी प्रहृष्टादृष्टवदनाव्रतंक्रियतरत्सपि[?] व्रतंचश्रीमहादेवपूजार्थ

पंमनोहरं लिंगंचसिकतारूपंकृतंताभिर्मनोहरं वितानाद्यैर्मंडपानिमनोज्ञानिकृतान्यपि अर्चनार्थंसमुद्युक्तैर्मुनिदारैर्मनोरमे
शिवव्रतमिदंगौरीकर्तव्यमधुनात्वया संपादनीयासामग्रीक्षणेनेसाहसाज्ञया अंबिकानितत्कानिश्रुत्वावाक्यानिसादरं तथास्त्वि
तिमुदाप्राहसाययौगिरिमंदिरं सानत्वामेनकांप्राहमातःसासर्वमंगला शिवव्रतंमुदाकर्तुमद्यतावत्समुद्यता त्वयापितद्व्रतंकार्यं
अंबिकेसहसादरं तद्व्रतोत्तममित्युक्तेमुनिदारैर्विशेषतः अंबासुरसरि-नीरेनिष्ठतिमीलमानसा त्वयाप्यागत्यकर्तव्यंतद्व्रतंमंगला
वहं इतितद्वचनंश्रुत्वानिवेद्यगिरयेतदा पूजासंभारसंयुक्तासरित्तीरंययौमुदा तत्रैवकारयामासरत्नमंडपमंडितं सुंदरंमंदिरंभ
व्यंवितानादिसमन्वितं अपारैरुपचारैस्साभवान्यासहसादरं पूजयामासगिरिशंगिरिजापिसमन्विता निशिजागरणंकृत्वा
प्रातःसंपूज्यशंकरं सादरंमुनिभार्याभ्योमुनिभ्योप्यन्नमादरात् सुवर्णशूर्पसंपूर्णफलोपायनकोटिभिः चकारमुनिवर्गांस्तान्प्र
प्रहृष्टान्वनितायुतान् ततःप्रापस्वभवनंसर्वमंगलयासह ततःस्वप्नस्तयादृष्टोमेनयाप्यंबयाशुभः ८० अत्युच्चरत्नप्रतिमासमे
तत्रसिंहासनारूढःशिवासहायः दृष्टस्तयामेनकयाविवाहमहोत्सवो प्युत्सवराशिहेतुः अंबाशिवांकमधिरुह्यशिवेनसाकंस्मेरा
धराहरमनोहरबाहुवीतां भूयोविलोक्यमुहुरादरतःप्रहृष्टाःस्वांसादरदर्शनदनंतरमुत्थितापि ततःपरंसमारंभोमहानेवाभव
त्तदा आनकल्पोविवाहोपिस्वपिदृष्टापिमेनका निवेदितःसशैलायस्वप्नोमेनकयाततः तेनस्वप्नेनसंतुष्टोगिरिराजविशेषतः त
तःस्नानेमेनकापिशिवायैप्राहसादरं स्वस्वप्नमादरेणैवजनयंतीसुखांबुधिं ततःपरंशिवाप्राहस्वस्वप्नमपिसामुदः पृष्टामंदलज्जा
यैवस्मेराधररविराजिता ततःपरंमहादेवःप्रसन्नःसमुपागतः गजाक्रोटिसमाकीर्णःसर्वदेवनमस्कृतः अपारमंगलाकारःसर्वमं
गलदायकः ससर्वमंगलाक्रांतछत्रार्बुदविराजितः चामरार्बुदसंवीज्यस्तूर्यध्वनिसमावृतः अपारविभवोपेतःतंददर्शगिरिस्ततः

या

३५८

ततः प्रणम्य बहुधा स्तुत्वा सर्वामरेश्वरं शंकरं प्राह विनतः कृतार्थोस्मीति सादरं ततो महोत्सवेनैव मंदिरे समलंकृते प्रविष्टः शंकरः स्मृत्वा
तत्सेवैरावचो मुदा ततः समागतं गौरी श्रुत्वा शंकरमादरात् महच्छ्रेयो भगवन्स्वायं समयोयमिति प्रियः मधुपर्कादिकं कृत्वा शंकरायम
हासने दत्त्वापाररत्नौघसर्वालाभरणान्यपि ततस्तां भक्तिभावं कृत्वा गौरीममरवंदितां आहूय तेन कन्या प्राह परमानंदसागरं मे
नकोवाच अंबांबापारविभवैः संभवस्तव वल्लभः यचिंताभूरिभाग्येस्त्वं भवित्री भव वल्लभा सौभाग्यनिधयः प्रापाः नद्व्रताचर
णात्त्वया एतादृशं महद्भाग्यं कस्य स्याद्भुवि शांभवि व्रतं कथं त्वं शांभवं बंधनेशं सुप्रसन्नः शुभदो भवानि यद्वांछितं तत्तदभूदिदानीं निधा
नमस्य व्रतमेव नूनं इतोधिकं न व्रतमस्ति सर्वैर्मिव्रतं व्रतानां नियमो मणिः शिवं इदं परं शांभवमंब सिद्धिः सद्यः किमेवं व्रतमस्ति लोके कु
स्तूरीघनसारपंककलिते किं शांकरांकं कृतोर्पकोलामलवालिकाकुलयुते निःशंकपंकेरुहे निःशंके नरात्रांकमंडलकुलव्यक्तोल्लसत्कं
डुकेरानंदांबुधिवर्धके मृगहृदङ्कीडामृडानी त्वया इति मेनावचो वाक्सुधाधाराधीरा मनोहरां स्वकर्णरत्नछत्रकपरिपूर्णापयोज्ञिवा १००
सा गौरी रमणांकमंकनिहिता संप्राप शंकांकिता साम्मूर्तिः सुमुहूर्तकीर्तिरपरा रेजे निजं वल्लभं सद्यः साभिमतं भाग्ययोग्य निलया सा
नंदधारालया शैलेनापि समर्पिता शिवकरव्यापारसंतर्पिता ततो महोत्सवो वृत्तः सम्महान् गिरिमंदिरे सुरलोकेपि संवृत्तो गं
धर्वनगरेष्वपि देवदुंदुभिनिर्घोषव्याप्तं भूमंडलं तदा शोभनं च यन्नेव शिवयोर्वृषे तदा साशांकरांकनिलयारूढा च भवानी वि
धुल्लेव शरदंबरकंधरांके तेनोत्सवेन गिरिशोपि सुखाबुराशिकल्लोललोलहृदयः सदयः स रेजे इति तद्वचनं श्रुत्वा शुककवाणी
शुचिस्मिता किं सुद्यापनमस्येति सत्यव्रतमुवाच सा सत्यव्रत उवाच शृणु भद्रे प्रवक्ष्यामि तद्व्रतोद्यापनं मुदा उद्यापने प्रवणालो

व्रि० नृ०

य्यभिवृद्धिंसुखंभवेत् अस्मिंतेषोडशवत्सराणांअतेकृतानां कृपूजनेन महोत्सवोद्यापनतोपिपूर्णंव्रतंभवत्येवकृतंचसांगं
षोडशेवत्सरेप्राप्तेतत्कृतोद्यापनोत्सवः कर्तव्योप्यतियत्नेनबहुभिःसाधनैर्मुदा शंकरोक्तप्रकारेणव्रताचारंसमाप्यते उद्याप
नव्रतस्यापिकार्यसाधनकल्पनं पूर्वोक्तैरेवविविधैःफलैरपिसमन्वितैः शूर्पैःषोडशसंख्याकैःउपस्करसमन्वितैः फलैःषोडशसंख्या
कैः विविधैःस्वर्णसंयुतैः पूरणीयानिशूर्पाणिलेमुक्ताफलैरपि तानितेभ्यःकुटुंबेभ्योदेयानिप्रीतिपूर्वकं दुकूलंचोत्तयुक्तानिषोड
शत्वप्रकल्पनात् ततश्चस्वकुटुंबेभ्योऽंगनाभ्योधनान्यपि अन्नान्यपिप्रदेयानिधेनवोपिगृहाअपि भूषणान्यपिदेयानिय
थाविभवमास्तिकैः विप्रवेसतिलश्चापिवित्तशाठ्यंनकारयेत् एवंकृतोद्यापनानांअंगनानांपदेपदे भवंत्येहिसुखानीतिवे
दउंडीरवश्रुतः एवंव्रतेकृतेपूर्णेमृतोपिपतिरेष्यति अतःसौभाग्यदंमन्येव्रतमेतदसंशयं व्रतमेतत्कन्यकापिकृत्वाप्रिय
तमंपतिं प्राप्नोतिमात्रसंदेहस्तत्कृतेनात्रसंशयतः अत्रैवोदाहरंतीमामितिहासंपुरातनं यस्यश्रवणमात्रेणसौभाग्यंवृद्धिमे
ष्यति इदमुद्यापनंपूर्वंपृष्टोगिरिजयाशिवः प्राहप्रसन्नवदनःसर्वदेवशिखामणिः पुराकश्चिदभूद्राजा ब्रह्मावर्तेवरानने
तस्यभाग्यंवरारोहेविनाशरहितंसदा सत्कांभववरस्तस्यवयःशंकरपूजया ज्ञातंपरिणतंतेनतोषिताःशंकराअपि पूजि
तान्यपिलिंगानिराज्ञातेनैवकोटिशः कृतान्निलेनबहुधान्निवोद्यानवनान्यपि शिवमंदिरनिर्माणंरत्नैस्तेनैवकारितं स्थापि
तान्यपिलिंगानिचित्ररत्नमयान्यपि तेपूजाकृतातेनयथातुष्यतिशंकरः तस्यभाग्यस्यनियतासमहान्सुखवर्दितः तस्यपु
त्राः शतंतेषांशिवभक्तिर्दृढासदा तैश्चशूरैरपारैश्चरिपवोविजिताअपि तेषांरिपुजयेशक्तिःकेवलंशिवपूजया सैन्यमन्यस

रंतेषांसामान्यपरिसेवने तस्यैवरांकन्यापिकापिद्देशभनवर्धना तथाबाल्येसमारभ्यव्रतंशंकरपूजनं तस्मातातविमलानाम्ना
साऽपिशंकरपूजने सर्वदाऽपिसमुद्युक्ताकन्याप्राह कदाचन विमलोवाच कल्याणीनवकल्याणंभाविशंकरमर्चया शिवार्चनेनभर्ता
पिनवस्यादेवभाग्यवान् किंचनित्यंशिवाचारनिरताऽपिशिवार्चनं सौमंगल्यंव्रतेनित्येकुरुतावद्विशेषतः अयंतुश्रावणोमासःपूर्व
कल्पस्ततःपरं सौमंगल्यव्रतस्याऽपिसमयस्यादुपस्थितः भाद्रशुक्लतृतीयायांहस्तर्क्षेसोमवासरे तद्व्रतंसर्वदाकार्यंनारीभिःपु
रुषैरपि सोद्यापनंव्रतंकृत्वाभाग्यंप्राप्नोतिमानवः व्रतरत्नमितिप्रोक्तंतद्व्रतंकमलानने मयाऽपिक्रियतेबालेतस्मिन्कालेत्वयाऽपि
तत् अवश्यमेवकर्तव्यं तेनस्याद्क्षयंसुखं इतितद्वचनंश्रुत्वासायंतुष्टाकुमारिका व्रतकालमनुप्राप्यचकारव्रतमादरात् पश्चा
त्परिणयोत्साहसमेतासाकुमारिका भर्तामेशंकरश्रेष्ठोवीरश्चास्त्विति सादरात् ततःपरंसराजाऽपिसर्वसौभाग्यसंयुतं वरंद्र
ष्टुसमुद्युक्तः चिंताव्याकुलमानसः वरश्चशंकरोधीरः सर्वसौभाग्यसंयुतः वरोदुर्लभइत्येवचिंतयाप्राहकन्यकां राजोवाच
बालेभूमंडलेकोऽपिपंचरेफसमन्वितः नलभ्यतेवरःकिंवाकर्तव्यमधुनावद उदारःशंकरोवीरः सुंदरश्रीकरोप्रियः वरोतिदुर्लभो
लोकेकिंकर्तव्यमतःपरं क्वचित्कश्चिद्गुणःकश्चित् क्वचित्कश्चिदलस्तथा नपंचरेफसंयुक्तःवरोदृष्टिपथंगतः इतितद्वचनंश्रुत्वासाक
न्याखिन्नमानसा व्रतस्यमहिमाकोवातस्येत्याहस्वमातरं विमलोवाच बालेव्रतस्यमहिमाभूयानेवाधितिष्ठति तत्सांगंयदि
तर्हिस्यात्फलंसर्वमपेक्षितं यतःसांगानिकर्माणिसर्वाणिफलदान्यतः अंगहीनेनतत्फलंकर्मणेत्यवधारय तच्चतावत्प्रस
न्नानिविविधानिफलान्यपि धन्यासंपादनीयानिस्वहस्तेनविशेषतः अत्रावश्यमिदमेतावत् तथाजागरणादिकं अतःकुर्यावास

फलं चर्मतस्यादद्याधुना विध्युक्तकर्मणा तावत्फलं भवति सर्वथा नचवैगुण्यदोषोपि यदि स्यात्किंफलं तदा इति तद्वचनं श्रुत्वा सापि
बाला मनोरमा केवा गुरुर्मया प्राप्यः केन सांगं व्रतं भवेत् कथं स्यात्तत्फलावाप्तिरिति चिंतासमन्विता ययौ सुरसरित्तीरं सखी
निकरसंवृता तत्र स्नात्वा महादेव प्रयागेश्वरपूजनं चकार भक्तिनिरता रुद्राक्षकरकंकणा तदा तल्लिंगपूजार्थं गंगास्ना
नादिपावनः भृगुः समागतस्तत्र भक्तिरुद्राक्षभूषणः स समागत्य तं देवं बिल्वपत्रादिभिर्मुदा पूजयित्वा प्रणम्यापि प्र
विष्टः सद्गुरुः सभे तमुवाच प्रणम्याथ भृगुं राजकुमारिका प्रसन्नवदनं शांतं शिवनामजपोत्सुकं राजकन्योवाच केन वांछितसिद्धिः
स्यात् भृगो शंभवपुंगव तन्मे वद विचार्याद्य येन स्यात्सुखमक्षयं भृगुरुवाच सौभाग्यदं व्रतं लोके नारीणां प्रथितं खलु तदाचर
णेनैव सर्वा सिद्धिर्भविष्यति तदं त्वया व्रतं पूर्वं शंकरोक्तविधानतः सा सर्वमंगला जाता तद्व्रताचरणाच्छिवा तद्व्रताचरणेनैव दग्ध
त्रिपुरकाननं महेश्वरेण तेनैव व्रतस्य द्विजयस्तदा नारायणादयः सर्वे प्रचंडनगराग्निना दग्धा अपि समुत्पन्ना कमलाव्रततत्प्र
सादात् ऋषयोपि समुत्पन्नास्तद्व्रताचरणात्स्मरं असुरोदरसंक्रांतास्तत्फलं च कृतापुरा अन्येपि ये मृताः पूर्वं तत्तद्व्रतविशेषतः संप्र
तजीवनाः सर्वे तद्व्रतं हिमवत्तरं सर्वसौभाग्यदं पुण्यं न देवव्रतमुत्तमं तेन वांछितसिद्धिः स्यात् नात्र कार्या विचारणा व्रतं सौभाग्य
दत्वेन प्रसिद्धं तदाननं सांगं कुरु विधानेन तेन सिद्धिर्भविष्यति पश्चोहस्तनक्षत्रे तृतीयासोमवासरे शुक्लभाद्रपदस्य स्यात्तद
तं शुभदायकं इति तद्वचनं श्रुत्वा सापि संतुष्टमानसा तेनोपदिष्टा गुरुणा महता करुणात्मना ततस्तद्व्रतमाचरेणात चेयतत्पवन्तुकी
राजोवाच किं वा व्रतं त्वयाचीर्णं अद्य येन त्वयाधुना प्रहृष्टहृदयं चेदेव देतिप्रीतिमानसः कन्यकोवाच भृगुणा तावदद्योक्तं सौम्

सांगं ब्रतं चकार सौभाग्यपतनमनामयं ।। ततः परं ययौ सा हि स्वमंदिरं जनकमंदिरं ।। संतुष्टांता मुदा चाथा सखी जास्वकुमारिका

२५१६

गल्यंव्रतंमम तत्कृतंतेनसंतुष्टावांछितंमेभविष्यति इतितद्वचनंश्रुत्वासोपिसंतुष्टमानसः तद्दाराअपिसंतुष्टास्ततथास्त्रिनिसु
गाअपि तदानीतद्व्रतेनैवसंतुष्टःशंकरोवरं विचार्यप्रेषयामासकिंनरंसर्वसुंदरं ततःससर्वसौभाग्यैःसंयुतःप्रययौमुदा
प्रयागमेवबहुभिःकिंनरैरपिसंयुतः ततस्त्रात्वासगंगायांप्रयागेश्वरपूजनं कृत्वाविल्वादिभिःसम्यक्गंगातीरेचचा
रच तदानीसावराहरोहारत्नप्रासादमंडपे आरुह्यस्वसखीयुक्तातंददर्शचकिंनरं दिव्यंतुरंगमारुह्यप्रेरवंतमतिसुंदरं
धावंतमपिधैर्येणकिंनरंवरमुत्तमं तंविलोक्यातिसुभगाकोयमत्यद्भुतोमया दृष्टोनरस्यकिंरूपमीदृशंनसुरस्यवा
पुनरीदृशोयदिवरोभर्त्तातस्याद्भाग्यमद्भुतं पंचरेखांकुरःसोयंवरःलक्षणसंयुतः अयंसुरोवागंधर्वःकिंनरोवाविचार्य
तां यद्वापंचशरःसोयंसर्वसौभाग्यसंयुतः एवंविचार्यसाचित्तेप्राहमातरमादरात् पश्यपाचलभाग्यवंतंसकोवातंवि
चारय इतितद्वचनंश्रुत्वामातामहविचक्षणा अपिवालेनजानेहंसुरश्चरतिकिंनरः यद्वागंधर्वएवायंगंगातीरेमनोहरे
ईदृशोनागरःकोपिदृष्टवानश्रुतःखलु अथापितावदधुनाचारद्वाराविचार्यतां कोयमित्यधुनाराज्ञेनिवेदयवरंयुवं इतित
द्वचनंश्रुत्वासातामाहविचक्षणा राजात्वयैववक्तव्यंकोयमित्यभिसादरं इतितद्वचनंश्रुत्वासाराजानिकटंययौ तमा
हतस्यवृत्तांतंसतामाहततःपरं मयाविचार्यतेवालेतादृशःकिंनरोभवेत् विशिष्यवासुरोवास्यात्सकथंवावरोभवेत्
इत्युक्त्वाप्रेषयामासचारान्बहुविधान्स्वकान् मदृत्तांतंविचारायनिपुणानतिकोविदः तेगतास्तस्यनिकटेतदासोपिवि
लोक्यतां प्रसादमंडपमध्यस्थांनददर्शान्यमागतं सकिंनरोविलोक्याथतानेवमदनातुरः तत्संगमोपायचिंतांचका

रवितनामपि कथंवासास्समायाति तुंगप्रासादसंस्थिता मयावा तत्रगंतव्यं कथंवा राजमंदिरे प्रेरितः शंकरेणाहंतत्सरित्य
हवांछया तत्पाणिग्रहणं केन साधनेन भविष्यति एवं चिंतासमाक्रांतं तांविलोक्यातिविस्मिता तेपिचाराः परंभूपसवि
चाराः समागताः ततस्तेतस्यचिन्हानि निवेद्यावदुयथार्थतः संतुष्टंतंनृपंचक्रुः चरः प्राप्तोयमित्यपि ततः सापिवरारो
हा दृष्टिकिंनरविग्रहा तदालोकनसंसक्तानाम्यालोकनतत्परा तद्यानीमागतो राजास्वकन्यानिकटंतदा किंनरालोकनो
धुक्ताजनकंनददर्शसा तामायताक्षिविमलां तदालोकनतत्परां दृष्ट्वासरित्तरं प्राप मितैः परिजनैः सह बालाविलोक
नरतं दृष्ट्वा किंनरमादरात् प्राह कोसीति तंराजा प्रहृष्टहृदयस्तदा किंनरउवाच किंनरः शंकरेणैव प्रेषितोहमिहाधुना
मयासमर्चितः पूर्वं सोमंगल्यव्रतेन सः इतितद्वचनं श्रुत्वा राजासंतुष्टमानसः किंत्वयादृष्टमधुनातद्देस्याहसादरं॥
किंनरउवाच विद्युल्लताकापि मयात्र दृष्टा प्रासादश्रृंगोज्वलमंडलस्था तद्दर्शनासक्तमिदं मनोमे सादृष्टपूर्वा नमयाकदापि
सापिप्रपश्यत्यधुनामनोज्ञामामेवयोगो भविता पिनूनं महेश्वराराधनजं विचित्रं फलंयतस्यादितिनिश्चयोमे इतितद्वच
नंश्रुत्वा तथास्त्विति सभूपतिः सातस्मैकन्यकांदत्वा वरेश्रेष्ठाय धीमते २०० तत्पाणिग्रहणेनसोपि परमानंदांबुराशिमिलो
राजापुत्रसवसंयुतोन्नृपसतीतत्कन्यकापि प्रियं संप्राप्य प्रमुदान्विता शिवपदांभोजार्चनस्पेदृशं सौभाग्यं महादेत्य पूर्वं वि
भर्व सस्मार सातद्दलं सोमंगल्यविवर्धकं व्रतमिदं सौभाग्यवृधिप्रदं स्त्रीलृणामपि वांछितार्थदमिदं ज्ञात्वैव कुर्वंतियेंते
तावद्भुविभूरिभाग्यमतुलं संप्राप्यजन्मांतरे अत्युत्कृष्टशिवाभयाशिवपदं यांत्येव देवार्चिताः २०१ इतिश्रीस्कांदेम

३६०

महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे रत्नाकरपुण्यमुनिसंवादे सौभाग्यल्पव्रतप्रभाववर्णनं नामैकचत्वारिंशोऽध्या
यः ४१ श्रीशिवार्पणमस्तु श्रीरत्नाकर उवाच इति तद्वचनं श्रुत्वा सापि संतुष्टमानसा सत्यव्रतमुवाचेदं वचनं प्रीतिमानसा पं
चाक्षरार्थकथनप्रभावप्रसंगादेतादृशं व्रतमुदीरितमिष्टसिध्यै नित्यव्रतं वद विशेषतः एतन्महान्तं दत्ते र खलु मया क्रियते विशिष्य
इति तद्वचनं श्रुत्वा विलोक्य सस्वरतो द्विजः धन्यासीत्यादरेणोक्त्वा प्राह सत्यव्रतोत्तरं नारीणां च नराणां च नित्यव्रतमिहोच्यते तच्छृणुष्व
वरारोहे सर्वपापहरं परं लिंगे शिवार्चनं नित्यमजस्रे वाचरेऽपि वा कर्तव्यं बिल्वपत्राद्यैर्जलैर्वा विमलैर्नवैः तत्राधिकारोऽपि विभूति
धारणोद्भवस्त्ववश्यं न विनापि तेन रुद्राक्षमालाभरणोऽपि तस्यां विना शिवार्चाधिकृतो न नु शिवार्चनं पापहरं प्रकृष्टं तद्यैनवान्
तनबिल्वपत्रैः फलं भवेच्छ्रीरत्नवैश्चतेन कृतानि पुण्यान्यमितानि नूनं अवश्यमेषां शिवलिंगपूजां कार्या मया बिल्वदलैर्जलैर्वा
तथा मया पापकृतानि नूनं विनाशनीयान्यनिशं सरुद्रा इति निश्चित्य यो नित्यं करोति शिवपूजनं तस्य पापानि नश्यन्ति कृतान्य
पि विशेषतः कृत्वा शिवार्चनारंभं कर्तव्यं कर्तव्यं तत्समापनं यतः समापनाभावे तस्य तेन फलं च न नारंभमात्रं शास्त्रार्थः किंत्वा
रब्धस्य कर्मणः समापनं तेन तावत्फलमित्यवधारितं कृते शिवार्चने योगे यदि विघ्नकरो भवेत् तदा तत्पारणं कार्यं तेन पूजाफलं ल
भेत् अत्रैवोदाहरंतीममितिहासं पुरातनं शृणु भद्रे प्रवक्ष्यामि तत्पापशामिसन्निभं रेवातीरे पुरा कश्चिद्राजा परमधार्मिकः शि
वार्चनरतो नित्यं शिवपूजकपूजकः सत्कृत्या पूजनं शंभोः नर्मदातीरमाश्रितः अपारैरुपचारैस्तैः एतावदति दुर्लभैः ततः स राजा पू
जांतं शिवं नैवेद्यमादरात् गृहीत्वा स सारं नीरैश्च चारनिजलीलया तदा दूरान्महादेवपूजानिरतमास्तिकं ददर्श नर्मदातीरे तत्र

गुल्मसमावृते तदानीमागतः क्रूरः मृगेन्द्रोपि पिपासया तं ददर्श महादेवपूजानिरतमास्तिकं ददर्श नर्मदातीरे सोतिदूरेणव्या
कुलः समभवत्ततः अयं क्रोशत्यत्र महेशपूजामेतस्य विघ्नो भविता द्विजोयं संरक्षणीयः खलु राजधर्मोयतो नराणां परिपालनं तस्मा
न्नु मनुष्यमात्रस्य विघातकानि निवारणीयानि शिवार्चकस्याः निवारणीयानि विशेषतोत्र पूजापरोयं गिरिशस्मरणं॰ २० शिव
पूजकदुःखवारणामां फलमीशार्चनमेव तेन दुःखं न भवत्यत एव दुःखनाशो भयतस्सावदहं भवामि नूनं २१ अयं तु पर्वताक
रः मृगेन्द्रोपि निवारकं दृष्ट्वा मां पादघातेन हविष्यति न संशयः पिपासया पीडितस्य कथं कार्यं निवारणं तदिदं संकटे नाव
धनि वार्यमुपागतं तत्पिपासावारणाय शिवसंरक्षणाय च रक्षपायमसमाप्यत्र साधनं दुर्लभं खलु एवं व्याकुलचित्तस्यातस्य
राज्ञोपि भामिनी प्रासादवरमारुह्य तं ददर्शापतितदा व्याघ्रं च दूरादालोक्य मृगेन्द्रं करं शिवपूजकं राजानं च सभर्तारं ज्ञात्वाव्या
कुलमानसा त्रयाणां रक्षणोपायः को वा तावत्स दुर्लभः अतः परं विधेयं किं भयेत्यपि समागता प्रासादमवरुह्याशु सखीज
नसमावृता रथमारुह्य बहुभिः भटैरपि समावृता सा समागत्य राजानं प्राह प्राञ्जलिर्विनयान्मुहुः प्रणम्य यातियत्नेन कृताञ्ज
लिपुटाशुभे राजपत्न्युवाच कथमागतं राजन्नसंकटं समुपागतं त्रयाणां संकटं केन साधनेन च दाधुना अयं तु ब्राह्मण
वरश्रेष्ठः शिवपूजापरायणः रक्षणीयः प्रयत्नेन तदुपेक्षा तु नोचिता नृपार्तोपि सन् शार्दूलः प्रतसोभानुभानुभिः अधुना त
स्य हननेपापमेव प्रजापते एक एव न शार्दूलः सकुटुंबः समागतः शिशुभिः सह ते चार्ताः शिशवः तृषयान्नृप नचमार्गोतरं पत्र
गिरिसानुसमाकुलः अयमेव मार्गोयं न परावृत्त्य यान्तिते अयं च युवतीयुक्तः शांभवः शिवपूजकः प्रायशः शैवपत्नी

सागुर्विणीचलनाक्षमा समाप्येतद्वृत्तंराजन्दीनानांपरिरक्षतां नकोपिरक्षणोपायोदृश्यतेकिंकरोम्यहं एवमुक्त्वास्थितास्त्रै
तारान्नीभूपतिंतदा तदानींसोमिसुषुवेकुमारंगौवभामिनी सकुटुंबःसशार्दूलःतत्तीरेसमुपागतः बालकस्यध्वनिंरम्यंसुश्रा
वापूर्वमादरात् श्रुत्वातंध्वनिमप्याहशार्दूलःस्वसतींप्रति अयमश्रुतपूर्वोत्रशब्दस्तावदिहश्रुतः इतितद्वचनंश्रुत्वास्वाप्याह
स्वपतिंतदा मनुष्यनारीसातावदधुनाम्रसुषुवेसुतं तत्रतावन्नगंतव्यंअस्मद्दर्शनमात्रतः भीतास्तावद्द्रविष्यंतिमनुष्याः
स्वस्वभावतः अस्मद्दर्शनमात्रेणतदिच्छाप्रपलायने भविष्यतिनसामर्थ्यंअधुनातुपलायने तदुधार्थंतुनोद्योगोयद्यप्य
स्माकमास्तिवा, तथापिभयदंरूपंदृष्ट्वाभीताभवंतिते मार्गांतरंचनास्माकंजलार्थंगमनेधुना आर्तिश्चविषयातावत्बा
लानामपिजायते अहोमहदिदंकष्टंप्राप्तंदेहविसर्जनं वरंतदापीजानुवरमित्यवधारितं किंचरेवातटेलिंगान्यपू
र्वाणितद्दर्चनं कर्तुमायांतितेसंतः तावदेकांतमित्यपि शिवपूजार्थमित्युक्तेनारीभर्तरीसादरा उपचारप्रदानायप्रा
प्ताःसमुपागता- ततःपतिव्रतासापित्रीवरस्यमहिलाततः तदुःखदानमात्रेणनरकस्यादसंशयं हारदुःखप्रदानेन
व्याघ्ररूपमुपागतं पुनःस्वदुःखदानेननरकान्निर्गमःकथं मरणंवाभवेत्तत्रतृषयापरयापरं नत्रागंभवायदुःखान्निदे
यानीस्वचधारया प्रायःशिवार्चनस्यापिकालोयंशांभवोयतः मध्यान्हेपिप्रयत्नेनकरोतिशिवपूजनं शिवपूजासमारंभे
नविघ्नाचरणंमतं तद्विघ्नाचरणापारपापनाशःकथंभवेत् नब्रह्महत्यादिकपातकेभ्यः तथाभयंभाविययथाभयंस्यात् म
हेश्वराराधनविघ्नतोतःतद्विघ्नमावान्नरकेस्थितिस्यात् महेश्वराराधनतत्परेभ्योनैवोपकारःकृतएवतेन कुयोनिमार्गेण

मनं प्रसन्नं, अतोनन्तेषां भयदत्वमिष्टं भक्त्यापायो वचनैर्जलेशपि शिवाचारायतो प्रसदो मुक्तो दोषगणैः भवत्यागमिते मुत्संग
नावल्लभः स्यादेवेति मुहुश्शुतं मनुवरे रक्तं, वचोऽस्मिन्वने किंनस्मर्यत एवं संस्मर पुनः संस्कारमावर्तय। अलं देहेनाल्पं
विमलकुलशार्दूलवपुषाप्यलं दुःखं येन प्रभवति मुहुर्मोहमधुना विहायांगत्यागे कुरु मतिमतो भूमिमधना देवोत्पन्नां
फाल्गुकुरुकरुमहोपालकह्वरान्। इति तद्वचनं श्रुत्वाङ्गीकरोद्द्विजपुंगवः विस्मयं परमं प्रापतद्भार्यापि नवं प्रस्तः सुश्राववचनं
राजा स शार्दूलांगनोदितं सुश्राव राजपत्नी च विस्मयावहमुत्तमं ततः परं नृपाक्रान्ताः शार्दूलस्ते परस्परं प्रोचुर्विनाशकाले
यमस्माकमिति निश्चयात् सम्यगेवाधुनाज्ञातं शरीरं दैवमस्मना पावनं पावनं धाम रेवातीरं मनोहरं रेवातीरे तनुत्यागो
यदि देवाद्भविष्यति नरापरं कृतार्थास्म किमितोऽधिकं फलं रेवातीरे यः शरीरव्ययार्थं प्रतो भूत्वा तिष्ठति धीलचित्तः देवैरादावर्चित
स्यानदास्याद्गौरीकांताराधकस्यान्नरोपि पुण्यैरपारैः खलु त्वां भवत्वं न चापि रेवातटसंश्रितत्वं न चापि तल्लिंगसमर्चकत्वं तत्रा
पि न देहविसर्जकत्वं वदस्यत्रे रेवं भव भव भवाबोधित रत्नं प्रवीणकृत्वा ममाभव भव भवानीरमणामे क्षणैः प्राणाहारं ह
र हर हर रापारकरुणापारसाकारासारां हर हर रससंसारमिद्धरं अतः परं जन्मशतान्तरेव रेवासरित्तीरलरुप्ररोहः भवामि संसा
रभयात्तार्धकृतां तदानीं वृलमाजसानैः जन्मावसानसमयोऽपि समागतोऽयं कायव्ययोत्तरमतः परमिंदुमौले रेवासरि
रत्नति वातविधूतपापा न स्यात्त्वपावककमत्तालिकुलाक्करोतु नरे वातीरे स्मिन् किमिति तनुनाशो विभवतीत्यस्माकं तं स्मृत्वा

पुनरपिमहादेवहरमां इरेत्कृत्कालेदेहंत्यजनत्तुभिमांभूतलेलिलाकथंजन्मापायेभसिलनतुयाम्गोपिसुलभः इतितद्वचनंश्रुत्वा
संवरन्यागनांनरे नारदस्तानुपागत्यात्रार्दूलानाम्रणतोमुदा ततस्तानाहसमुनिःविस्मयेपरमंगतः शार्दूलान्मरणोद्युक्ता
न्दृष्टमानोवरानने नारदउवाच पूर्वजन्मनिकेयूयंपरमज्ञानसंयुता केनपापेनसंप्राप्तंशार्दूलवपुरीदृशं ८६ अतिपुण्य
वतामेवरेवातीरसमागमः तत्रापिशिवभक्तिर्यासापुण्यगिरिकोटिभिः येनपुण्यान्यपाराणिकृतान्यमितजन्मभिः तेनैव
प्राप्यतेभक्तिःसुराधीशेमहेश्वरे कुर्वत्स्वचलपश्चर्यंशिवभक्त्यधर्ममादृरात् कोटिशोनर्मदातीरेनिराहाराःपरेसुराः शिवभ
क्तिस्तथालाभोदुर्लभःखलुदेहिनां अपराजन्मसुकृतैःशिवभक्तोभवेद्भुवि शंकराचारनिरताःशंकराःशंकरप्रियाः अतो
नतत्समोलोकेकोपिदृष्टःश्रुतोपिवा तृणीकृत्यशरीराणिस्थित्वेमरणकांक्षया रेवातीरेभवद्भिस्तुभवत्तुल्यःसुरोपिकिं दवभ
स्मांकितंकृत्वाशरीरमधुनाकथं अकस्मात्यक्तुमुद्युक्तंभवद्भिर्भवविह्वलैः इतिनारदवाक्यानिश्रुत्वादूरेणभूपतिःसमागतः
सतीयुक्तःकौतुकात्लोकनोत्सुकः तत्रोपविष्टास्तेसर्वेछायायामतिविस्मिता ततःपरंसद्देवोपित्वरयासमुपागतः प्रणम्यता
नुवाचादौतत्रषालान्सदयोद्विजः भस्मोद्धूलितसर्वांगान्शार्दूलान्मरणोन्मुखान् शंभवउवाच अयंमध्यान्हसमयोरेवा
यांशिवपूजनं कर्तव्यमादौयात्रापिपश्चात्सेभविताखलु पिपासवोबालकाश्चतेशुष्करसनाअपि अत्राभ्यागमनेकान्तोभ्यया
निवाभवत्खलु इतितद्वचनंश्रुत्वानारदेनापिसंयुता रेवायांगंतुमुद्युक्तास्तथाहुःशैवपुंगवं। शार्दूलउवाच तवप्रसूतामहिषी

नवब्रह्मांशकपुंगव तस्यास्याश्चयमस्माकं दर्शनादिसत्वरं तत्रस्तानाहं नैरोपितयैवप्रेषितोस्म्यहं तमालकुंजसंवीतोत्रस्वरद्वारवेष्टि
ता श्रृणोतिवचनान्येवमधुराण्यतिसादरं भवतानयनाप्राप्या साकुंजाप्रिहिताय: किंचसा गिरिहितावा स्वकमास्कवा किंततः फलं
यातुकस्त्रमतिस्तावनभवत्सप्रजायते इतितद्वचनंश्रुत्वारेवांगदापिसत्वरं निमज्जत्रस्मनोगानि चकुर्लिंतानिसादरं त
तःपरंप्रयत्नेन रेखालिंगेषुसादरं दत्वांनलं बिल्वपत्रसमेतमतिभक्तितः ततःप्रदक्षिणीकृस प्रणाम्यचपुनःपनः जलव्यह
णमाकंठंवृतमेवातितृष्णया तात्विलोक्यपरंगोरोपिनारदोपिसत्वरांभव: परमाश्चर्यसंयुक्तःकिमेतदितिनिश्चयात् ततःप
रंसराज्ञापितत्त्रीरशिवमंदिरं यथोन्नागाईलसंयुक्तोनारदेनापिसंयुतः तत्रोपविष्टस्तानाहनत्वाशंकरमादरात् केयूयमिति
यत्नेनशंकरध्यानपूर्वकं शार्दूलउवाच अहंपूर्वभवेराजन्तुषारगिरिसंस्थितः तस्पेदेशस्यराजाहंमहदैश्वर्यसंयुतः॥
शिवपूजारतोनित्यं कदाचिद्वनेतीमुखे दृष्टास्नातोद्यताभार्यासंपूर्णनवयौवना तदापंचशरावेशोतदालोकनसंभ्रमे मा
माहसातियुवतीं शिवाराधनतत्परा अहोनृपवराद्यायंप्रदोषःसोमवासरे [illegible]ः कामान्विताः पातःशिवनक्षत्रसंयुतः॥
माघमासेप्ययंतावत् अस्तितःपक्षइत्यपि तद्धानःकिंतयातावत्राजत्सोस्मिनसंशयः अहोमहदिदंपापं कर्तुमभ्युद्यतंमया
सुधामयोयंकालोत्येतःकालंकालंसमर्चया दुर्लभःखलुदेहोयंकालोयमतिदुर्लभः बहुपुण्यप्रभावेनसमयोयंहिलभ्यते
किंकिंपुण्यफलंपूर्वंपूर्वंपूर्वभवेमुहुः तद्धानेसमयंप्राप्तःसोयमीशार्चनायमे वांछितिमुनयस्तावत्कालमेतादृशंसु

राः गंधर्वाः किंनरा सिद्धाः श्चारणा अपि सर्वथा इतो धिकः पुण्यकालो न भविष्यति सर्वथा एतत्समो पि नास्त्येव पुण्यकाल इति श्रु
तं किं तैर्ग्रहणार्बुदैरपि तथा किं तैरपारायणैः एतत्कालसमो न काल इति मे धीरा गमैर्ज्ञायते तस्मादर्चयत्वं कुरु बहुविधैः
द्रव्यैरपारैरयं कालो दुर्लभ एव तावदधुना कायोप्ययं दुर्लभः कल्पास्ते बहवो गता अपि तथा कल्पेषु तेषु प्रियः कालोयं शि
वपूजनं स्वनगतो यस्मिंस्समभ्यर्चितः हास्यत्वेव पदं भर्ज गिरिजया साकं क्वचिद्धास्यति श्रीमृत्युंजय इत्येवं भिसमयः न
स्यादयं दुर्लभः संतापि पेनापिरुचिः कुतः स्यादयं शिवाराधनकाल एव भयाद्गृहे गेहात्परतः प्रयाहीश्चेटीकुटिं वाविटवादि
को वा इत्युक्त्वा विरतासापि संभाषणपराङ्मुखा महं शापस्त्वयादत्तः शार्दूलस्त्वं भवेत्यपि ततः क्रामातुरेणैव चेटी संचो
दिता भिया नाराधितो महादेव नार्चितोप्यवलोकितो चेटीगर्भसमुत्पन्नो मृतो अपि मदन्वयात् स एवाहमहं पापी शि
वपूजापराङ्मुखः शार्दूलदेहमापन्नास्येयं चेटी मम प्रिया एते बाला सुताः सर्वे शार्दूलत्वमुपागताः मोहेन पापाचरणा
दुष्टयोनिरुपागता दुःखं च तेन पापेन प्राप्यते सत्समुच्यते तद्देहविगमे जाते यमदूतः समागताः आगताः पादघातेन तेस
र्वे ताडनोद्यताः रे रे त्वया शिवदिने शिवपूजनानि त्यक्तानि तानि शिवदान्यपि मुक्तिदानि तस्यागजातफलमेतदितिब्रु
वंतः मादाभिघातनिकरं परितः क्षिपंति तसादज्ञापार नखांकुशानां संघैः शरीरं च विदीर्णमेव ततः परं नीतमघोरम
ध्ये निक्षिप्तमात्रे ज्वलनेश्वत[illegible] ततः परं कालमुपागतो हि तैरेव घातैः कुलिशाभिघातैः कशाभिघातैरतिपीडितो मांद

दर्शे कालः कुपितो नितांतं ततः परं चित्रगुप्तं प्राह गंभीरया गिरा कृतं पातकमेतेन कृतं किमिति चिंतया चित्रगुप्त उवाच अने
न माघासितभूतरात्रिर्नीता श्वचैरापदुचुंबुनाद्यैः निरस्तूलोयं रजनीमुखेपि स्वभार्यया शंकरस्वर्चयायं यस्मिन्काले विश्वनाथा
र्चनाद्यैः आनंदाब्धिर्वर्धते पुण्यसंघैः सा कालस्मिन्पापराशिप्रवृद्धोन्वेशोर्वाटोवाटिकासेवनाद्यैः अनेन पुण्यानि पुराकृतानि यावं
ति तावंति लयं गतानि भूतव्रतत्यागत एव पश्चात्प्राप्तान्यपापानि अपि पातकानि १५ अहो धृतं पुण्यमनेन तावत् यावन्न केना
पिकृतं तथापि तावद्दिनष्टं शिवरात्रिकाल शिवार्चनात्यागत एव सत्यं अहो शिवार्चनत्यागं पुण्यादिकं कुलिशं विदुः पुण्यार
ण्यदवं प्राहुः वेदवेदांतपारगाः नवनीतं रविर्यथा नवतस्त्रलयं याति तथैव स तथा सुकृतादित्ययोपि जायते शिवपूजाविरहे विशेष
तः भूतपोतत्यये यथा जनाः प्रलयं यांति नदीरयैस्तथा सुकृतादिलयोपि जायते शिवपूजाविरहे विशेषतः शुक्लपक्षे घोभो निध
यः क्षपोन नन्नयं स पारापदं कालमेघाः भूतानिशायां शिवपूजनेन तत्केन पुण्येन समं वदामि भूताशनिशि बिल्वपल्लवमु
माकांताय लिंगे मुदा दातुं वांछति यः स एव सुकृतांभोधिः सपुण्याकृतिः तं देवाः प्रणमंति भूतिविलसद्भालं मुहुः शंभवं रु
द्राक्षावृत्तकंठकर्णविवरं तं किंनरं वानरं भूताया बहुपेति तावद्भयं पापांकुराद्योद्भवेत् सा चेदंतिकमेति कंपमतुलं प्राप्नो
ति पापार्णवः किं कर्तव्यमतः परं न मितलयः कोपेति वेगात्परं यास्येव शिवपूजकं शिवरते जाते स्वचिंते सति नूनं भूतशिवा
र्चनस्पनफलं वक्तुं समर्थो भवेत् वेदोपीति चतुर्मुखोपि बहुधा नारायणो वापम शेषो वा गुरुरेव वा समहिमा वाचां किल
गोचरः शंकामेव स शंकरोपि स शिवो वक्तुं करोति ध्रुवं किं वर्णयामि यमदूतनिद्रा शिवार्चापुण्याधि शान्ति इह भुक्तिमियं द

शि

गानि मुक्तिंचदेहविलये सतिदेहमन्यन्नास्तीति साबहुविचारतापिनूनं एवंब्रुवंतमसकृत्सयमोपिहृष्ट्वानंचित्रगुप्तमगसेनरभूमि
रूपं रुद्राक्षकंकणकरंशिवलिंगहस्तमानंदजाश्रुनेत्रयुतंप्रणतोबभाषे यमउवाच धन्याकृतासभासेयंत्वयाधन्येनकेवलं अहं
धन्यः कृतोमान्यःशिवाराधनवासरैः भोश्चित्रगुप्तशिवपूजनपुण्यशक्तिर्वार्ताविशेषकथनेनसुधानतुल्या सातृप्तिमात्रकरणी
तदघाद्विनाशंकृत्वाकरोतिखलुमुक्तिमपिस्वहस्ते धन्योसित्वमुमासहायचरणांभोजार्चनात्पादरोहारोहारविहारवर्णनरतोह
रोपहारादयः व्याहारैरपिहारकीर्तिकथनविष्टैःप्रहृष्टेर्मुहुः तुष्टोहंशिवपवित्रकीर्तिसुधयापुष्टोपिकष्टक्षये एवमुक्त्वास्थितेनत्रयेम
केचिदुपागताः मेचकाचलसंकाशाः प्रतप्तायससंहताः प्रदग्धबाहुदंडाश्चदग्धमुंडाश्चकोटिशः संदग्धकरपादाश्चरक्तधारासमा
प्लुताः पूयप्रवाहसंवीताः कुर्वंतोरोदनंमुहुः पिबंतोप्यात्मसंवीतांपूयधारांकृमिश्रितान् तान्दृष्ट्वासभयग्रस्तोयमःप्राहातिविस्मि
तः चित्रगुप्तंविविल्लोक्याप्येकेतेवदममेत्यपि चित्रगुप्तउवाच माघासितचतुर्दश्यामेतैर्भुंक्तंदुरात्मभिः अशिवाराधकैरेतैःनार
धिगिरिजापतिः नत्वलिंगंशिवपूजायांअर्चितंबिल्वपल्लवैः एतैःपापरतैर्दूतनिहतैःसमुपागतं अशिवाचारनिरतास्तेसर्वेप्यमाधुना
पातनीयाःप्रयत्नेनतप्तपूयसरिद्वरे संतप्तशोणिताभोधिरेतदर्थंविनिर्मितः संतप्तमूत्रकूपाश्चदीर्घकाश्चविनिर्मिताः संतप्तमत्
साहिन्याप्तदर्थंकिंननिर्मिताः संतप्तशस्त्रगिरयःतत्रापायविनिर्मिताः कल्पावसानेपिनमुक्तिरेषांदोषाकराणामशिवार्चकानां
दृष्टिश्चतावन्नरकार्णवानां प्रपूरणायेतिमतिर्ममैषा कष्टान्यपाराणिभवंतितेषांयेषांप्रदोषेनशिवार्चनेच्छा तत्रापिभूतायदि

सासिताभ्यामाधीसपाताषिशिवोद्धृयुक्ता साताभ्याधायातिभूतता सिताभ्यामाधीनस्यां योपि मोहं न धुंक्ते तस्या पारायातनास्वादवश्यं
सत्यं सत्यं विश्वनाथे ब्रवीमि इति तद्वचनं श्रुत्वा स यमः प्राह किंकरान् नेयास्ते स्वरयाद्दूरे घोरेषु पत्तलेषु ले इति तद्वचनं श्रुत्वा किंकरास्ते
यमकिंकराः नीत्वा तं मानयामासुस्तत्सामे ध्यहृदादिषु ततः परं तत्र भृगुः समागतोऽभूत् ब्रतानाचारविशुद्धस्त्विनः विभूतिपूतो भसितं
त्रिपुंड्रं रुद्राक्षमालाकलितः सहारः तं दृष्ट्वा शांभवश्रेष्ठं भृगुं भूतिविभूषितं रुद्राक्षमालाभरणं प्रणतः समयो मुदा शिवशंकरपार्वती
पते गिरिशेशान महेश पाहि मां इति नामसुधारसं मुहुः कलयंतं तमुवाच चारुकालैः यम उवाच भृगो तत्त्वविदां श्रेष्ठ वेदवेदांतपारग
शिवध्यानसुधापानपीनमानस ते नमः धन्यस्त्वद्दृष्ट्यागमने ननु संस्थलं पवित्रं कुलमेतदद्य गात्रं पवित्रं मम जातमेव श्रोत्रं स नेत्रं मल म
ममद्य अपारपुण्यामरभूरुहास्ते फलोन्मुखा एव न संशयोऽत्र यतः शिवाचाररतस्त्वलावलूतवाधुनाद्यागमनं प्रसक्तं अतः परं तावदिदं
विचार्य धर्मस्वरूपं वद सावधान निर्मथ्य वेदार्णवमद्य तूर्णं स्मृत्याप्यपूर्वारमणं क्षणेन धर्माधर्मज्ञानशून्यस्य लोके नानं देशोपीतमन्ये ३६५
कि मन्ये धर्मैः कस्सं येन धर्मेण मुक्तिः धर्मं त्वं मे सावधानं वदाशु इति तद्वचनं श्रुत्वा स भृगुः शांबो नमः प्राहात्स्फैश्च र्महादेव महादेवेति भ
संवदन् भृगुरुवाच संत्येवान्येकालसामान्यधर्माः तैर्धर्मैर्धर्मरत्नं वदामि तद्रत्नं तेकं ऽभूषास्कानित्यं ते नैवो मोक्षांतं प्रसादः शिवधर्म कांत
समानधर्ममन्यं न विज्ञानामिनवेदबोधितोपि स खलु धर्मवरः स एव धर्मा ससुराणामभिसेवनीय एव सुरैरपारैः शिवधर्मधर्मिनाराय
णाद्यैः कृत एव सर्वैः मुनीश्वरैरप्सुरगेश्वरश्च सिद्धैश्च गंधर्ववरैश्च नित्यं यं सर्वदेवोत्तमभामनंति सोमावतंसं गिरिजावृतांसं तदारिता

पारनृसिंहसेमोवंदेशिवामानसराजहंसं यत्पादुकाराधकसेवकानां पादारविंदाप्यरविंदजातः गोविंदवृंदारकवृंदमौलिमूलानि
पंकेतमहोभजामि यस्यैश्वर्यमानगम्यंननूनं यत्पादारविंदाप्यरविंदजातः गोविंदवृंदारकवृंदमौलिमेवज्ञानंतिसर्वे तंदेवे
शंपूजयामिप्रभाते मध्याह्नेवासायमथ्यंतरेवा यल्लिंगमाद्याद्रिदिराकांतमुख्याःसर्वेःस्तावदुस्तनिमास्तुः तंस्यत्कान्यंकंभजामः
रण्यंतदेवानामथगण्यंभजामि यत्पादांगुल्यग्रेरेखाभिर्भालं चित्रं विस्त्रोर्भूषणंतंवरेण्यं वंदेगौरीकांतमेकं नितांतं स्वांतेदुर्गांते
संततंसंवसंतं नभजामिशिवान्यमन्यवान्निकरोम्येवनधीरहारकंठः कपर्दमौलिकासमेतोभवतिशीलविशिष्टमानसोपि
नस्वप्नेपिशिवाभ्यनामककथनेप्रीतिःसुधाधारयाप्रीतःकांतिनमिच्छतीतिकुमतिः कोवाजगन्मंडले नास्त्येषेंद्रविरिंचिनाम
कथनेतत्प्रजनेवामतिः स्वप्नेपीतिनिराषाभिकात्रशिवयोः पादारविंदंमुदा पूज्यः शंकरएवशंकरकथा भाव्यासदाश्रूयते अंध्यास
धनमेवसाधनवरैःबिल्वादिभिःसाध्यते नेयंस्यादनिशंतथापिसततंलत्तुंगलिंगार्चनेः शंगाराधनमेवमेधनमितिज्ञेयंनिधा
नंपरं भस्मोद्धूलनपूर्वकंसितलसत्रूभस्त्रीपुंड्रंमुहुःधृत्वाभालतलेगलेकरतलेरुद्राक्षमालामपि तंपंचाक्षरमंत्रमेवस
तंजप्त्वाशिवाराधनं कृत्वाबिल्वदलैर्वसामिभुवनेजीवामियावद्यम यच्छोचनांचनविलोचनगात्रपात्रंतावत्पवित्रमपिमुक्ति
कलत्रगात्रं तंचित्रभानुनयनंशरणंभजामिमाहेश्वरामरतरुंहरमेकमेव याजिह्वामधुराणिवांछतिमुहुःसासर्वदानमः
शिवंवांछतिवक्तुमिच्छतिपरंतन्नाममात्रंपरं किंचित्रंतदिदंसुधारससरित्स्नानोद्यतासाकथंवांछतिअपितुच्छकांजिकर
संसास्वस्वभावादपि मृत्यूर्वासमुपैतुकालकलितोहालाहलंवासुहुः याधिर्वासमुपैतुवज्रमथवाब्रह्मास्त्रमभ्येतुवा चक्रंवा

किमनेन यद्यगसुताकांतांघ्रिपद्मार्चनं ध्यानानंदरसप्रवाहरसिको भीतः कुतो वा भवेत् जन्मान्यप्यमितानि तानि विविधान्यायांतु
कीलैर्भयं यद्यतः करमाक्षणार्धमपि वा मुग्धेंदुमौलिं व्रजेत् तान्यप्यस्य सुधामयानि सततं मन्येति धन्यान्यपि न्यक्तान्यामरपूजनस्य
गिरिजाकांतार्चकस्याधुना कल्याणं कलयामि काममधुना कामांतकाराधनात् कः कामांतकपूजनो न कमपि प्राप्नोति कामं यम
कामं प्रापकमेकमेव जगतां कामांतकं मे गिरं सर्वे ते मुनयः सुरासुरगणाः सिद्धा मुनींद्रा अपि यत्रस्याक्रमनं विधेर्विधिबलात्
नांतकस्यां ततो बिल्वीकोमलपल्लवैर्जललवैर्लिंगार्चनं जायते एतस्मादधिकं किमस्ति सुहृतं धर्मैव जाने परं तेनैवामृततामु
पैमि त्रिबलां प्राप्नोति सत्यं यम ७० एतस्माद्धि मिहास्त्वपूर्वममराधीशो महेशो गुरुः भाग्यैरस्मर्यत एव दुःखविलयः संजाय
ते तावता मुक्तिः साकं रपंकजामलंकृतां प्राप्नोति यां साधयो दूरादेवलयं प्रयात्यघकुलं निर्मूलमात्राकुलं धर्मं तावदिदं दिनं
यमसुखानुल्यं विशल्यं मनो मारारिस्मरणादिनागतमलः पापानि भीतः कुतः तत्तावद्विपुलातपच्चममलं ध्यात्वा कलत्रं हरेरी
शाराधकसेवकाननुपदं धीसानुधावत्यपि ७२ इति श्रीस्कांदे महापुराणे शिवरहस्ये नृतीयांशे उत्तरखंडे पुण्यकीर्ति
रत्नाकरसंवादो नाम चं इचत्वारिंशोध्यायः ७२ सत्यपत उवाच इति तद्वचनं श्रुत्वा यमो विगतकल्मषः विधृति भूषणं प्रा
ह भृगुं शिवपरायणं यम उवाच मन्येहं त्रिपुराराति स्मृतिमेवाति पावनीं तां पुण्यवाहिनीं प्राहुः सा सुधावाहिनी नाकिं ति
रस्करोति सा तावत् स्मृताप्यमरवाहिनी चतुर्वर्गफलाकारकल्लोलकुलसंकुला पुनःपुनर्वदमुदा त्रिपुरारातिरंजने॥
यत्फलं न फलं श्रोतुं प्रवृत्तमधुना मनः + इति तद्वचनं श्रुत्वा भृगुः शिवमनुस्मरन् महादेवकथासिंधुं संस्मारयीत

शिवमाहात्म्यपीयूषपानपीनं मनोपि मे॥ अतस्तमेव त्वानं पुनः कर्तुं प्रवांछति॥१॥

प० २६६

मानसः भृगुरुवाच महेश्वरापारकथानिधीनां मे तोन दृष्टोस्तिन मध्यभागः आदिश्चनैवावधृतो मया तु वेदैरपारैरपि सेतिहासैः कैलास
निरताः प्रमथाः प्रमानमारभ्य शंकरकथासुधयादिनानि नीतावचसंति गिरिशोपिनयत्यपारान् कल्पांतथापि न समाप्तिकथा कदापि पुराकै
लासशिखरे रत्नप्रासादमंटपे कल्पद्रुमसमुत्पन्नैः कुसुमासारसंवृते रत्नसिंहासनासीनं प्रसंनवदनं मुदा संपूर्णपूर्णकामं तं ददर्श गि
रिजा शिवं अपाररत्नाभरणप्रभाराशिविराजितं स्मेरधारापरिक्रांतं दिव्याधरविराजितं राजीवराजकल्लोलमालयासमलंकृतं ।
सरस्वतीरेखलिंगमेकं पद्मयंतं मुहुरादरात् सुछत्रमंडलाकारमणिकांतिविराजिते चामराकारकर्पूरप्रभामंडलमंडितं सुमेरुशिख
रस्पर्धि गौरीकुचकरप्रभं तद्दृगालिंगनासंक्तं बभाषे वचनं शिवा । श्रीगौर्युवाच स्वामिन्महेशात्कृपया त्वया शिवकथासुधा निर्मिता स
मुहुः श्रीतानलृप्तिरुपजायते ब्रह्मकल्पाश्च बहवः कथाकथनलीलया नीतास्त्वद्रूणमानावन्नकर्तुमिहशाक्यते कथासुधाराशिरपूर्वए
व दिने दिने नूतनकौतुकानि करोति नांतोपि न मध्यभागस्तस्यादिभागोपि न चंद्रमौले शिवकथामृतराशिविवेचने तुरमेव मनो
ममाधुना किमयमेतदिति स्मयसंयुतं कथयतत्वमिहाशु सदाशिव इत्थं प्रियावचनरत्नमनोज्ञहारान्कर्णावतंसमसकृद्गि
रिशोनुभूतं स्मृत्वा पुनः पुनरुमावचनामृतेन तृप्तोप्युवाच वचनैरभिनंद्य गौरीं १८ श्रीसदाशिव उवाच गिरिराजकुमारिकावचः
परमं तावदिदं शृणु प्रिये प्रियमेव वदामि सावधानं धनमेतन्मम सत्यमेव नूनं वेदास्तावदनंतास्ते सर्वे शिवकथामयाः अतस्तदा
दिमध्यांताः श्रुता अपि न सर्वथा कथासुधासमुद्रेषु सूक्ष्मबिंदुसमा कथा श्रुता कल्पेष्वपारेषु गतेषु विविधेष्वपि मत्कथाकथने गौरि मम
सहस्रात् तथा शक्तिरीति विधित्वेन तत्सारादर्शनादपि मत्कथापारगा नितांनब्रमापि तथा सन्ति को वा तत्पारगो भूयो गिरिजे न वदाधुना

नास्माकं प्रलयादिभीतिरगजे कृत्याः प्रयातु प्रिये नेतावद्यदि कोटिशोपि विलयं यास्यंति कालावता हानिस्पादसकृत्कथाकथनतो नैयं दिनं को
टिशः कृत्याश्चेद्दिनकोटिभागइतिमे सर्वामराणामपि निगमैरपि विज्ञेयो विभवो न मतो विके तस्मादाद्यंतरहितो विभवो मम सर्वथा उक्ता
नोक्ता कथा गौरि मयातावस्तुनः पुनः सिंधैवनूतना मोक्ता कापि कापि कथासुधा लिंगार्चनस्य महिमा कि मत्रोल्लकल्पेनांतं प्रयाति निनला
दिकथालथाच तन्मध्यभागकथनावसरः कदाचाभावी भविष्यति कथं कथयाम्यहं एवमुक्ता भवानीसा महादेवेन सादरं आनंदसाग
रेणाशुसम्यगालिंगिता मुहुः अतः कथं वाय मशोकरस्य कथां कथंचित्सवदामि सामि स्मरामि शुभंहृदये करोमि जिह्वांतयातां मधुरां क
रोमि अहो शिवकथासुधानिधिरपारपुण्यैरयं स्मृतोपि तनुते मुदं किमिदं मचचित्तं कृतं शिवेन च दयालुना शिवजनैकसंजीवनी क
ला शिवकथात्मिका मधुरवाहिनी सा कथं मन्ये शिवाराधनमेव द्रव्यं द्रव्यं करोति प्रवरं च द्रव्यं तत्तुल्यमन्यं न मया श्रुतं च वेदांतवाक्ये
रपि कोटिशोपि शिवार्चनं धनं कालनिधयोपि शिवार्चनं शिवार्चनं सुधानूनं मोक्षोपि शिवपूजनं शिवार्चनेनैव कृताः कृतार्थाः शिवार्च ३६७
नैनैव सुधांबुराशिः उद्वेलतामेति न संशयोत्र तस्य प्रभावं शिव एव वेद अत्रैवोदाहरंतीममितिहासं पुरातनं तं सुधासागराकारं
शृणुशंकरमर्चय पुरा गोदावरीतीरे गौतमं मुनिपुंगवं चिरं वक्रार्चकं ह्याधाह नारायणः स्वयं पूजयित्वा महादेवमुपचारैरनेकधा ॥
प्रणम्य बहुधाश्रांतं स्वेदधारासमावृतः ३० श्रीनारायणः कुतः समागतो विद्वन् श्रमोपि त्वयि दृश्यते शिवतीर्थाटनेनैव तव कालः प्र
याति हि किं किमद्य शिवस्थानं त्वया दृष्टं महामुने किं किं लिंगं पूजितं च बहुभिः साधनैस्त्वया क्वापूर्वं वा त्वया दृष्टं यदुत्साहकरं परं तदद्य वद
निश्चिसस्मृत्वा स्मृत्वा पुनः पुनः ३१ गौतम उवाच शिवभक्तायवक्तव्यं कौतुकं यदहं तुकं तदिदानीं शृणु प्रीत्या भक्तोसि कमलापते नेत्रारविं

देन शैलाधिप मंत्रयासमभ्यर्चितमादरेण एतादृशस्त्वं शिवनक्तभक्तो मुक्तिप्रपारूपकथां शृणुष्व पूर्वं ह्युरङ्गुलं दृष्ट्वा दुरदृष्टविनाशकं अ
स्मिन् गिरिवरे सख्ये चत्वारो वानरास्थिताः तैरानीतानि रम्याणि बिल्वपत्राणि तैर्मुदा कृतं लिंगार्चनं भक्त्या रसालञ्च फलैरपि ततः प्रद
क्षिणीकृत्य नमस्कृत्य महेश्वरं उपविष्टाः शिवध्यानं कृत्वा भस्मविभूषणाः तन्मध्ये कश्चिदाहारान्ना शिवलिंगावलोकनं कृत्वा भस्म
लल्लाटादौ धृत्वा स्मृत्वा महेश्वरं ४५ वानर उवाच मयामिमीलिताक्षेण स्वप्नो दृष्टो महानिह कश्चिद्वागतः शैवः शिवनामजपोत्स
कः भूतिरुद्राक्षपूतांगो लिंगं दृष्ट्वा समर्चितं केन बिल्वदलं दत्तं कोमलं लिंगमस्तके एतादृशं बिल्वपत्रं माघासितचतुर्दशी प्राप्य रा
त्रौ शंगलिंगं दत्त्वा मुक्तो भवेद्ध्रुवं कुतः केन समानीतो भ्यारक्तो बिल्वपल्लवः तस्मै नमः पुनस्तस्मै स बिल्वतरवे नमः अद्यैव गत्वा
ऽस्यो विपिने बिल्वभूरुहः जलादिभिः पोषणीयो यथायोगं प्रयत्नतः अतः परं समायाति माघासितचतुर्दशी तैरीशपूजा कर्तव्या
तत्र बिल्वदलैर्नवैः तदिदं नर्मदालिंगं नयंतत्र वने मुदा बिल्वमूले स्थापनीयं स्थातव्यं तत्र सर्वदा अतः परं भाविनी को कदाभ
ता विश्वनिदा तावच्छरीरमेतन्मे रक्षणीयं प्रयत्नतः कथं तावद्भाग्यं भवति बहुपुण्यां बुधिवत्न तथाभूता भूतान वविमल बिल्वीद
लकुलं तथाशोंगलिंगं तदिदमतितुंगं ततुरियं चतुर्णां योगो यं शिवकरुणयाजायत इति यदि प्रपद्यामप्यमितैरपूर्वैः पुण्यैस्तद
बिल्वदलं सल्लिंगं तदाजितो मृत्युरघादि नाशो जातो विजातिस्मरतापि मुक्तिः गत्सा धनीयं बहुभिः प्रयत्नैः न चेदिदं जन्म कृतं व्य
थान तस्मादवश्यं शिवलिंगबिल्वे तेदुर्लभे जन्मनि जन्मनीति कश्चित्सुवर्णावर्जितैः बहुविधैः पुण्यैः शिवाराधनं स्मृत्वा मृत्यु
निरस्तृया मपि मुहुः जन्मादिदुःखक्षयं पश्यत्येव महानिशि त्रिनयनं संपूज्य बिल्वीदलैः भूतायां धृतभूतिपूतहृदयः रुद्राक्षसिताप

मुहुः महेश्वरानुग्रहभाजनानां तत्पुण्यलाभो भवतीति मन्ये अतः कथं तादृशमस्ति पुण्यं कथं तदन्वेषणं चिंतनं वा एवमुक्त्वा महादे
वं नत्वा भूयः प्रयत्नतः क्व बिल्वतरुरस्तीति निर्गतः शिवमंदिरात् एवं स्वग्रामे मया दृष्टः शरीरं पुलकांचितं आनंदोपि प्रवृद्धो मे
तत्कथाश्रवणादिह इत्युक्ते तदुच्यतां वत्स क्रममेव मया हरे तदानीमागतः कश्चित् भिल्लो जालकरः स्वरः सतानागत्य जाले
न गृहीत्वा गंतुमुद्यतः तमाह वारे नरः कश्चित् कुशलो भिल्लु मान्त्रिकः ६९ वानरा ऊचुः किमस्माकं वृत्तं वद वद मुदा भिल्लु नय
नैः शिशूनां क्रीडार्थं मृडसदननिर्माल्यमधुना विनेतुं जानं मे गमनमधुना तेपि शिशवः प्रतीक्षां कुर्वंति प्रतिलवमहो मातृनि
कटे इदं निर्माल्यमादाय धृत्वा शिरसि केवलं धृत्वा भूतिं स्तन्यपानं कर्तुमिच्छंति बालकाः वनिता गुर्विणी साध्वी साधोः सा साध्वी बि
ल्वपल्लवं जग्ध्वा शिवार्पितं पुत्रान् सुषुवे तत्र दोषघ्नं पुत्राः शिवरता एव भवंतीति विशेषतः सा तावच्छिवनिर्माल्यभोजनप्रवणा
सति मया गृहीतानि निर्माल्यं गंतव्यमिदमारात् देयं तेभ्यस्तत्र तेसुस्तन्यायाभ्युद्यता अपि स्तन्याभावे शिशूनां तु न जीवनमिति
स्मर अतस्त्वजाधुना तेषु कृपा यदि भवेत्तदा इति तद्वचनं श्रुत्वा कौतुकं स धनुर्धरः स्थितो जालं च विच्छिद्य तन्मध्ये ते विनिर्गताः त्व
रयाते वनं गत्वा बिल्वमारुह्य भूरुहान् विचारनिरता जातास्ते सर्वेपि परस्परं ७० वानरा ऊचुः अहो कथं स्वप्रकथा श्रुता सा तत्रा
भिश्रुता निशि बिल्वपूजा सादुर्लभेत्युक्तमवापहारेणाक्रमापि मुक्त्यै भवतीति सत्यं संभाविता एव भवंति विघ्नाः शिवार्चने तेन स
विघ्ननाशः अपेक्षितस्यादिति चिंतयते कथं कार्यं भविष्यत्यधुना वदेवं इत्युक्त्वा ते स्थितास्तत्र निहता श्वद्वारे स्ततः क्व गताः स विचा

सोपि कर्तव्य इति भाति मे ७३ भृगुरुवाच इति तद्वचनं श्रुत्वा स विष्णुः प्रीतमानसः इदं कौतुकमित्युक्त्वा गौतमेनान्वितो ययौ यत्रैते वानरा घो
रेण पीडितास्तरुकोटरे पतितास्तान् विलोक्य तत्र गौतमः प्राह माधवं गौतम उवाच एषां त्वरकृतापीडा यथा न स्यात्तथा त्वया कर्तव्यं
पालनं धर्मः सोयमत्यंतदुर्लभः ये पूजयंति शिवं सादरपूर्वकं ते वंद्या भवंति सततं परिपालनीया जातिर्न तावदधुना तु विचारणीया
किं जातिभेदविषयेण विचिंतनेन इति तद्वचनं श्रुत्वा चकार परिपालनं सोपि नारायणस्तेषां गौतमेन सहादरात् ततः कालेन म
हतापि सा माघी समुपागता तदानीं वानरास्सर्वे संतुष्टाः शिवतत्पराः सेयमभ्यागता भूता पुण्यभूता शिवप्रदा शिवरात्रिरियं दृष्टा
धन्यास्मो नात्र संशयः इत्युक्त्वा सायमभ्येत्य वृषभगंगाजले मुदा स्नात्वा चक्रुर्ललाटादौ दिव्यभस्म त्रिपुण्ड्रकं ततः परं बिल्वपत्राण्यादा
य विमलान्यपि आगताः शिवपूजार्थं तस्मिन्नेव त्रियंबके तदा शिवालये कश्चित् पुष्कलस्तिरिति विश्रुतः कृत्वा द्वारनिरोधानि चक्रे
र शिवपूजनं पूजां कृत्वा मुनिश्रेष्ठो रात्रौ यामत्रयावधि प्रणामान् कर्तुमीशाय द्वारमुखाद्विनिर्गतः स तदा तान् वानरान् दृष्ट्वा शिवपू
जोद्यतानपि स्वांगागतो स्तु कोपायतेन क्रोधाग्निरुधितः क्रोधाग्निना समाक्रांताः स्ते सर्वे वानरास्तदा तत्रापि हननं कार्यं रक्ष
कुर्वंस्ततो मृताः ततः परं विमानानि समारुह्याति पामराः वानरा अपि ते प्रापुः ब्रह्मलोकमनामयं ब्रह्मा तानागतान् दृष्ट्वा दूरा
दपि सादरं पूजयामास यत्नेन स्वासने संन्निवेश्य च तत्पूजितान् विलोक्यापि चतुर्मुखसभासदः तमूचुः कृतवंतस्ते विधिं शि
वरात्र्यर्चने ८९ सभासदः किं पुण्यमेतैः कृतमत्र येन त्वदर्चिताः भाविकिमस्ति भव्यं इदं विज्ञाप्यावधारय येन स्यादस्मदीयं च मनः
प्रहृष्टं ब्रह्मोवाच भूतायां शिवपूजनार्थमसकृद्यत्नः कृतो वानरैः रेतैरेव हि यामैरपि तदा यत्नो वृथैवाभवत् तद्घत्वा सरमागतान् वक्ष्ये

मयासम्यक्समाराधितास्तं यत्नं प्रवदंति संततं महोदेवाः स्कंधामित्यपि एतेतावदहो पुलस्त्ये बहुलक्रोधाग्निनमास्तत: तंतावद्दि
शिहं तुमेव बहुधा चक्रुः प्रयत्नं ततः संदग्धाः समुपागताः पुनरमी तन्नाशनायोद्यतास्तं नाशे सति लिंगपूजनरतैः प्राग्वत्प्रमेशं पदं॥
सयतः शिवपूजां ते पुलस्त्ये क्रोधसंकुले रावणोभविता भाग्यैः अमितैर्लोकरावणः शिवपूजाप्रभावेण स सर्वामरदंडनं स यतः शि
वपूजां ते पुलस्त्ये क्रोधसंकुलं रावणोभविता भाग्यैः अमितैर्लोकरावणः। करिष्यति न संदेहो महदैश्वर्यसंयुत: अजेयो भविता लो
के सुरावध्यः स रावणः नराश्च गणयत्येव वानरांस्त्वविशेषतः नारायणोपि भविता नरो नंदीशशापतः स रावणस्य हंतास्याद्वानरैरी
दृशैः सह अयं हनूमान् सविता सुग्रीवोप्यंगदोप्ययं वाली सोयममी मुख्याः नत्सहायार्थमुद्यताः उपकारः कृतः पूर्वं तेन नाराय
णेन यः वानराणां वनेतेन सहायस्तेन संमतः इति तद्वचनं श्रुत्वा सर्वे विस्मितमानसाः कथं शापमददिति पप्रच्छुः नंदिकेशानकेशवः पुरा
शिवप्रसादेन वैकुंठं प्राप्य माधवः रमया रममाणस्सन् नररूपेण संस्थितः प्रदोषकालीनशिवार्चनानि नारायणोसौ रममाण

एव लक्ष्म्या विहाय स्थित एवं दृष्टो नंदीशाप्रभृतैरनिवृत्तिलोके ततः कदाचित्कैलासे स्थित्वा नंदी स्वकिंकरान् कुचक्रोवा सुरः कि
वा करोतीत्याचसादरं तत्रार्बुदाक्षकोप्याह नंदिकेशस्य किंकरः प्रणम्य दंडवत्सम्यक् नंदिकेशं कृतांजलिः १०२ अर्बुदाक्ष उवा

ह

च संचारः क्रियते नित्यं सर्वेषु भुवनेष्वपि दृश्यते मानवाः सिद्धाः किंनराश्च सुराअपि तेतावदधुना सर्वे स्वस्वाचाररता नराः गं
धर्वाः किंनरासिद्धाः मुनयोपि विशेषतः सुरेषु केवलं हित्वा लक्ष्मीरमणमास्तिकाः सुरास्स्वाचारनिरताः शंकराराधनोत्सुकाः य
दातावन् मयास्वामिन् गतं वैकुंठमंदिरं नदासमररूपेणास्थितो नारायणो मुदा रमामालिंग्य सायान्हे शिवपूजापराङ्मुखः

स्थितोपृष्टो मयापृष्टः कोसीतिसजगादमां त्वंकोसीत्यनिवेगेनस्वह्मालज्जांतथासह भग्नथारतयाधूर्तः तदालिंगनतत्परः ततःपर
सविज्ञातोप्ययंदुर्जनइत्यपि जनार्दनःससंत्यक्तःशूद्रकेनापिप्रपालने इदमेनादृशंदृष्टंअपूर्वममरेष्वपि कागतिर्भाविनीतस्य
यदमह्यंविशेषतः इत्युक्तंतद्वचःश्रुत्वानंदिकेशोपिविस्मितः शाहार्बुदांक्षमक्षेणांक्चनेनविचक्षणः ११ नंदिकेश्वरउवाच सनरोभ
वितालोकेरामनामाभविष्यति असुराहतभार्योपिभविष्यतितसंशयः पुनःपुनःसजन्मानिसंप्राप्यातीवदुःखेनखिन्नः अनुतप्तोलिं
गपूजांकरिष्यतिविशेषतः भृगुरुवाच इतितद्वचनंश्रुत्वास्मृत्वाशंकरमव्ययं प्रभावंशंकरंश्रुत्वाप्रहृष्टः कालसादरं कोवाविज
नातिमहेशाग्याकिंतदर्चकानांचशिवार्चनस्य महेश्वरोवेदशिवापिवेदस्कंदोगणेशोपिसनंदिकेशः शिवप्रसादलेशेनसुरत्वंप्राप्
तेसुराः शंकरावज्ञयाताावन्नरत्वंप्राप्नुवंतिते तेतेनराःशंकरपूजनेननिसंबुलार्थाःकृतकृत्यवंद्याः सुरासुराणामपितेतिपूज्याःपू
ज्याभवंत्येवमुनीश्वरेश्च अहोमहद्भाग्यमुमासहायःसहायभूतोपिनरेषुयस्य तस्माच्छिवपदंनिदृशादिवंद्यंविशेषतःकिंनमुकुं
दवंद्यं शार्दूलउवाच इतितद्वचनंश्रुत्वातंप्रणम्यभृगुंयमः ममांगुल्याविनिर्दिश्यप्राहभूतामनुस्मरन् यमउवाच कागतिर्भा
विनीतस्यभार्ययाभर्त्सितस्यच चेटीकटितदाघातपीडितस्यदुरात्मनः कस्मिन्वानरकेतस्यप्रवेशःसंमतोभवेत् गतिर्नरक
भोगांतेकाभविष्यतितद्वद भृगुरुवाच भूताव्रतस्यागतएवयद्यपायंमहापातकसंघराशिः तथाप्यनेनकृतमेवमद्यमहास्य
मीशानपदार्चकानां किंचास्यभार्याशिवपूजनांतेसस्मारभर्तारममुंकथाका नाराधितोयंगिरिजासहायःतेनेत्यतिस्नेहवशा
न्दैवात् तत्कृतस्मरणगोचरोनृपःपापराशिकलितोपिपाततां नैवयास्यतिपरंतुदुर्दशाव्याघ्रयोनिमभियास्यतिध्रुवं जाति

दे

स्मरोयंभवितायमातःशार्दूलहेपिशिवार्चनानि कृत्वापयास्यत्समराभिवंद्यःकैलासनाथंगिरिजासनाथं नेत्रेटिकालिंगनविंदनंचचक्र
रभार्योगविचिंतनेन तदंगसंगेनचचेटिकापिजातिस्मरत्वंसमुपेष्यतीति तदुक्ताःसुताःसर्वेनदंगालिंगनादिभिः जातिस्मरत्वम
भ्येत्स्यकारिष्यंतिशिवार्चनं शुभंभवीतस्यभार्यातस्याःशापेनकेवलं शार्दूलोभविनासोयंरेवाश्रीवनेयम रेवाजलस्नानकृतार्थदेहा
तल्लिंगपूजानिरतोपिनित्यं तन्नीरसंस्पर्शकृतानुमैमांतेमुक्तोभविष्यत्यपिनाचचित्रं इतितद्वचनंश्रुत्वा मामाहयांतिकंयमः प्राहगंभी
रयावाचासंतोषंजनयन्मुहुः ३० यमउवाच भृगुमुनिवचनेनमोचितस्त्वंअपुण्यैःपटुभटदंडविघट्टनादिदूनः परिहरहरचिंतनेनदुःखं
भजभजशंकरमप्रसादधानं प्राप्याप्यपारैःसुकृतैर्नरत्वमव्याहतैश्वर्यमनामयत्वं हारत्वमप्यर्धशशांकमौलिंपुण्यस्वरूपाःपरमर्चयंति
यःप्राप्यापिनरत्वमास्तिकवरोमाहेश्वरैःकेवलंनस्यादिंदुकलावतंसभजनासक्तोपिशाक्तःपरं नंतावन्नररासभंविदुरहोदुर्वीर्यजेदुर्जनं
दुर्जातिंनरकालयंचसपुनःस्यात्सप्रभोभूरिशः इतिमामहसयमःपुण्यापुण्यनियामकः अन्यदप्याहमामेवतदुक्तंनैवशक्यते एवंसंभाष
णेनैवकालोभूयान्गतस्ततः दूराद्दृष्टंयमेनापिविमानमतिसुंदरं कोटिसूर्यप्रतीकाशंप्रभामंडलमंडितं तत्लछत्रपताकाढ्यंमुक्तामा
लाविराजितं रत्नदुरैरपारैश्चरुचिरैरभिमंडितः चंद्रमंडलसंकाशादर्पणैःपरिवेष्टितं चंद्रमंडलमालाभिःतारामालाभिरा
वृतं पुण्यसारसमाक्रांतंनवमेवप्रतिक्षणं रुद्रवीणागानविद्याविशारदवरैरपि समलंकृतमुत्कृष्टनाट्यनारीगणैरपि ता
दृशंतद्विलोक्याशुसभृगुंप्राहविस्मितः कृतांतःकिमिदंदृष्टंअपूर्वंपुण्यकंमुने विमानमीदृशंपूर्वंनमन्नयनगोचरं किमिदंर
त्नराशीनांनभमंडलमंडनं यस्यप्रभाभिर्भानुश्चखद्योतनिभएवसः तस्यप्रभाःसमुत्पन्नास्तावदिग्मंडलेष्वपि नचनारायणा

द्व आ

३७०

स्येदं विधेरिंद्रस्य वा भृगो। नगणानां च नान्येषां दंशांशभवमेव किं अनुग्रभवविमानस्य किमेवं कांतिरद्भुता एवं विचार्य संभ्रमेन दि
मानमुपागतं गणाः कोटिमहादेवध्वनयोपिशुश्रुवस्तदा नानि तूर्याण्यपाराणि दृष्टानि विमलान्यपि लब्धनिश्वसनादेव ब्र
ह्मनारायणादयः समागताः संभ्रमेण क्षिप्रेन दृष्टिविस्मिताः नारदाद्याश्च मुनयो गंधर्वा अपि किंनराः समागताः संभ्र
मेण तदालोकनकौतुकैः तदा दिव्यविमानस्थाः शिवार्चनपरायणाः दृष्टा सा राजमहिला कालकाण्डानुवादिनी तदालोक्य
णताः सर्वे सुरनारायणादयः तैस्तुता सानंदा सर्वे शिवपूजनतत्परा ३९ देवा ऊचुः धन्यासि धन्यवरपूजकपादुकासि भुव
महानिशि महेश्वरपूजनेन घोरं तपः खलु महेश्वरलिंगपूजा बिल्वादलादिभिरपारनवप्रसूनैः इत्थं तेन शिवलिंगपूज
नपरो धन्यो च मान्यो मुहुः नेत्रे ते शिववीक्षणेन विमले धन्यं मनस्ते यतः त्वं मान्यासि जगत्त्रये पि धरणीजानात्वया पावनात्व
स्यादंबुजवीक्षणेन वयमप्यघाति धन्या खलु इति सा संस्तुता देवैर्यमेनाभ्यर्चिता ततः इंद्रलोकं ययौ पश्चात् इंद्रेणापि स
मर्चिता ब्रह्मलोकं ययौ पश्चात् ब्रह्मणा पूजिता मुदा ययौ वैकुंठभुवनं नारायणसमर्चिता ततः परं हरं शापत्तरथा हरस
दिरे गिरिजानिकटे स्थित्वा चकार शिवपूजनं परमानंदमग्ना सा सदा गिरिजया सह वासं चकार कैलासे शिवावासे सु
धारसे इंद्रलोकगंदिगमने नत्कृताभ्यर्चनादिकं सुखावसयमस्त्वाप्यशरीरवचश्चैये: तं विस्मया वृद्धं दृष्ट्वा यमोप्यत्य
वमादरात् भृगुमाह विनीतांगो विस्मयाविष्टमानसं यमउवाच केयं स्तुता ननादेवैः ब्रह्मनारायणादिभिः किं तया
या कृतं पुण्यमीदृशोत्सवसाधनं भृगुरुवाच किं वक्तव्यमतः परं यम मया सा पुण्यराशिः परं नेय तावत्खलु न तत्कृतामि तं महापुण्यं

बुराद्यैरपि साभूतानि शिवलिंगपूजनरतानसुण्यमेतादृशं येनोपेंद्रपुरस्सरा अपि सुरास्त्वत्पादुकाराधकाः अस्यैव राज्ञो महि-
ष्या विमला सा शिवार्चनैः भूतानि श्रीमहेशाय तया देहः समर्पितः इतीतद्वचनं श्रुत्वा यमः प्राहातिविस्मितः कथं देहस्तया
दत्तो महेशायेति माहर ९० भृगुरुवाच रत्नानि सर्वाणि समर्पितानि तया महेशाय शिवार्चनेन नीतं वयः सर्वमनाकुलेन चि-
त्तेन तत्पुण्यसमर्जितेन यावंति रत्नाभरणानि सुवर्णाभरणान्यपि विविधानि विचित्राणि तानि दत्तानि शंभवे भाज्यं राज्यं त-
या दत्तं शिवपूजार्थमादरात् मातंगाश्च तुरंगाश्च दासा दास्यश्च कोटिशः पुत्राश्च दत्ताः शर्वाय शिवसेवार्थमादरात् नानाविधा-
नि धान्यानि दत्तान्येव तया यम दत्तान्यमंदगोवृंदान्यपाराम हर्षिगणाः भक्त्या शंकरपूजार्थं तया रत्नगृहा अपि ततः पर-
स्वदेहोपि शंकराय समर्पितः भूता महात्रिशिशीस्य बिल्वपल्लवसन्निभः ततः प्रीतो महादेवः सांबस्तत्तत्पूजया॥ विमा-
नं प्रेषयामास गणकोटिसमन्वितं तेनैव सा शरीरेण विमानवरमास्थिता ययौ कैलासनगरं सुराणामपि दुर्लभं एतादृशं
महद्भाग्यं शंकराराधनं विना दुर्लभं देहिनां मन्ये संसारभयनाशकं संसारांगारलहरीपरिवेष्टितविग्रहाः नाराधयंति
गिरिशं तदिदं महदद्भुतं एकेन जन्मना पुण्यं यत्कृतं जननावधि तेनाभरणमीशाने भक्त्या यं शः कोपि लभ्यते नादृशान्येव ज-
न्मानि यद्यपाराणि मानवः प्राप्नोति तर्हि गिरिशे भक्तिः क्वापि प्रवर्तते तया भक्त्या महादेवं नवबिल्वदलैरपि द्विजैः सम-
र्चयंश्चैव मुक्तो भवति मानवः रत्नैर्वा मणिभूषणैरपि मणिछत्रैर्वितानादिभिः मुक्तालंबितचामरैरगणितैः स्रग्भिस्तथा
चंदनैः तुष्टो न त्रिपुरांतकः खलु नवैर्बिल्वीदलैः कोमलैः नीरैर्हारसमर्पितैः परमयं तुष्टो भवानीपतिः आनंदांबुधिरे

श्रीः
३७१

यः शंकर इति ज्ञातः किंनरैः तस्मै देयमदेयमेव सकलं देयं तदीयं यतः सत्वं कस्य धनेषु तिष्ठति धनं कस्यास्ति लोकत्रये गौरीकामुकः
बकालधनिष्ठः कालांतकः केवलं अपारमैश्वर्यमुमासहायपादारविंदार्चनलभ्यमेव ऐश्वर्यदानेन कथं स देवस्तुष्टो भवेद्भक्तिक
वधिनापि भक्त्या दत्तं कलबिल्वीदलं यो मूर्ध्नि धत्ते शंकरः शंकरोयं एतत्तुल्यः कोपि देवेषु देवो नास्तीत्येवं प्राह वेदोपि नूनं भाग्ये
ग्ये सति कोन्यं देवभजनासक्तो भवेद्भूतले स्वर्गाज्जाराजमेव केवलमजोपेंद्रादिदेवार्चितं । रत्नं किं परिहृत्य काचशकलं वांछत्यज्ञ
योगी वनं धन्यं किं मनुतेजनैरभिनुतः शिलाहतो जायते आयंतेजननादिदुःखनिधयस्त्वत्तः शिवाराधनं दुःखांभोधिपरा
भवाय बहुधा भावप्रवृत्तो मुहुः वीरेशं नवबिल्वकोमलदलैरभ्यर्चयन् सादरं हाराहारविशेषभूषितवपुः प्रापुस्तमर्थाप्स
पि लक्ष्मीकांतचतुर्मुखादिकसुरान् वीरेश्वराराधकः प्रायः कारुणिकः करोति यवसः प्रायोन्यमानोमयः तत्तुल्यस्त्वकसएव
तेन विदितं तत्त्वं कथंचित्प्रभोः शंभोः करुणापारदिव्यमहिमापारंगतो भूतले ५८० इति श्रीस्कांदे महापुराणे हिमव
त्खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे पुण्यमूर्तिरत्नाकरसंवादे नाम त्रिचत्वारिंशोध्यायः ४३ सूत उवाच ॥
इति कालो भृगोर्वाक्यं आकर्ण्य सुधामयं अवाप परमानंदमानंदाश्रुसमाकुलः स मनुवाच भूतं भव्यं भविष्यच्च तेन
ज्ञातं त्वया भृगो शिवतत्त्वविशेषेण तन्मे ब्रूहि विशेषतः रहस्यमपि तन्मह्यं वद सादरमास्तिक तत्कौतुकं नो निलयं स
र्वथेत्यवगम्यते १ भृगुरुवाच गोपनीयं प्रयत्नेन यदेतद्धुनोच्यते अभक्ताय न वक्तव्यं अश्रद्धानिलयाय च शंकरा
पातिशुश्रूषाय भूतिरुद्राक्षधारिणे वक्तव्यं तद्रहस्येषु शिवस्थानेषु केवलं यस्माल्लिंगात्समुत्पन्नं ब्रह्मनारायणादिकं

चराचरात्मकं विश्वं तत्सृज्यात्सर्वसिद्धिदा लिंगादेव समुत्पन्नाः सर्वे देवाः पिनाकिनः वेदाश्च यज्ञा ऋषयो गंधर्वाः किंनरा अपि पृष्ठा
कृतेन किं तेन कोटिशः प्रभवंत्यपि तस्मादेव विलीयंते तस्मिन्नारायणादयः लिंगाराधनमेव केवलमुमाकांतप्रियं तत्स्मरैः
गंधर्वैरपि किंनरैरपि कृतं सिद्धैर्मुनींद्रैरपि तत्पूजासलिलाभवंति तद्विशालं महारैर्विमानांद्भुतैरत्नदपार पुण्यनिधिभिरता
वत्परं लभ्यते व्रतं शिवाराधनमेव येषां तेषां न संसारभयाग्निकाल तेन व्रतेनैव विमुक्तिरंते भुक्तेषु भोगेष्वखिलेषु तेषु
अन्यो धर्मो न स्फुरत्येव नूनं देवे धर्मः शंकरः केवलो यः तेनैवास्मान्मुक्तिरित्येष मन्ये कोन्यो धर्मस्याद्दृशो वेदवेद्यः रहस्य
मन्यत्सर्वं वदामि कालयः कालकालार्चनतत्परो न तेजारतं विधिविशेषतत्त्वं सत्यं मयोक्तं शपथः शिवेपि अत्रैवोदाहरंतीम
मितिहासं पुरातनं कौतुकं शृणु वक्ष्यामि कालकालार्चनक्रिया आर्यावर्ते पुरा कश्चिद्ब्राह्मणो वेदपारगः सर्वशास्त्रार्थत
त्त्वज्ञः शिवध्यानपरायणः सत्यमूर्तिरिति ख्यातः सत्यप्रवचमानसः कृतं सत्यमिति ज्ञातं तेन तत्त्वं शिवात्मकं वेदार्थवि
श्वयत्वेन शास्त्रेराद्योक्तो सुहृः ततः परं शिवस्तेन सर्वाराध्य इति स्मृतः सर्वेषामाराधका एव शंकरस्यामराः परं सुराराध्य
स एवेति सर्वदाप्यधारितः अध्यापितानि शास्त्राणि शांकराणि मनीषिणः तेनैव शिवविद्यायां निपुणेन महात्मना तस्य
पुत्राः समुत्पन्नाः शतं तेषु कुमंतिमं पुत्रं विहाय ते सर्वे पुत्राः शिवपरायणाः भूतिरुद्राक्षपूतांगाः शिवलिंगार्चनप्रियाः
शिवशास्त्रप्रवीणाश्च शिवव्रतपरायणाः सर्वे भूतव्रतप्रीताः ते सर्वे भूतिभूषणाः शांकराराधनं तेषां व्रतं नान्यद्व्रतं य
म नियमः शिवपूजायां तेषामाजन्मनिश्चितः निरता एव ते सर्वे शिवधर्मे विलक्षणे शिवव्रतं व्रतं तेषां तन्नारीणां विशे

पतः कालःशिवार्चनेनैवनीयतेताभिरादरात् सविस्मितान्सुतान्दृष्ट्वाशिवनामांकितान्मुहुः संतोषंपरमंप्राप्यमुक्तितुल्यमना
मयं शिवलिंगार्चनोद्युक्तान् भूतिरुद्राक्षभूषणान् पुत्रानालोक्यसंतुष्टोनर्तनंसकरोत्सपि मत्तुल्योभुविकोवास्यात्कुमाराःश्री
करात्परं तद्दाराअपितेनित्यंशिवध्यानपरायणाः सकृदाचित्तसमाहूयपुत्रानालिंग्यसादरं प्राहसंतुष्टहृदयःसंतोषजनयत्स
रं श्रीसत्यमूर्त्तिरुवाच मत्साथितंचिंतितंमेवनूनंमहेश्वराराधनमेवधर्मः धर्मांतरत्यागमतिर्ममाभूत् अतोस्तिधन्योभुवन
त्रयेपि धर्मोममायंपरिपालनीयो भवद्भिरत्रादरपूर्वकंमे श्रोतव्यमेतद्वचनंममाद्य न प्रार्थनीयंभुवनत्रयेपि २८ शिवार्चनेनैवस
दाग्नियःकालःसदातेनसकलकालः तुष्टोभवत्येवसमुक्तिदाताभोगप्रदातापिसएवपुत्राः नान्यःशरण्योजगतांकुमाराःशिवः
शरण्येषुवरेण्यएव केमुंविहायान्यमुपाश्रयंतितान्येवजानेगतीनतेस्मिन् शिवार्थमेवप्रयताभवंतिशिवार्चनेनैवनराभिरिष्टा
शिवप्रदातानशिवेतरस्यात् अतःशिवाराधनमेवकार्यं कोवाशिवाराधनमेवतुल्योवेदेषुशेषेष्वपिधर्मवर्यः सएवतेनैवभव
त्यभीष्टाः तस्मात्तमेवोत्तममामनंति कोवानस्याच्छांभवोभूरिपुण्यैः तेषांतावत्तत्फलंत्वंशांभवत्वं तच्चेत्तस्यात्तेषुपुण्येषुतावत्सु
प्यत्वंवादुर्लभंसर्वथापि स्वल्पाजारजमेकमेवकुमतिंसर्वेपरंशंकराः तत्वज्ञाश्चसुरार्चकाश्चसुतरांलिंगार्चनात्सत्फलः ए
तत्पुण्यसमंनपुण्यमितिमेपुण्येनपुण्यात्मनाजातावुधिरतः परंशिवपरैस्थेयंगृहेसादरं शरीरमेतत्खलुजातमेवजीर्णंनतू
र्णगिरिजासहायः अनुग्रहंमेनकरोतिशान्किःशिवार्चनादिष्वधुनातिदूनं अतःपरंयन्मदनांतकस्यपुरंपुराणांप्रवरंतदेव स
सेवनीयंसुरवाहिनीसा तत्रोत्तरंसाप्रवहत्यपारा तत्रैवनित्यंमणिकर्णिकायांस्नात्वानवैर्बिल्वदलैर्जलैर्वाविश्वेश्वराभ्यर्चनमद्यकार्यंकार्यंत

रंभास्यविशेषतस्तु शिवप्रसादेनकुमाररूपंभाग्यंतदस्यच्चविशेषतस्तु प्राप्तंकिमन्यंमनसाध्यमेकंकाञ्चीपुरीनाथमुपाश्रयामि ॥
णामन्नपूर्णांशरणागतार्तिग्रहाणदक्षांशरणंव्रजामि तंढुंढिराजंशरणंव्रजामि तंचाविमुक्तंशरणंप्रजामि वीरेश्वरंतं
शरणंव्रजामिबिल्वीदलैःसादरमर्चयामि नृत्यंकरोमिप्रणतःशिवायेस्मराधुनाभोरमरशंकरेति भजामिविकटागौरी
चरणांबुरुहंमुदा भजामिसंकटागौरीवंदेसिद्धेश्वरीमपि श्रीकालभैरवंवंदेसर्वाभीष्टदमादरात् वंदेमुहुर्मुहुर्वंदे वक्रतुं
डविनायकं ४२ । कृत्तिवासेश्वरादीनियानिलिंगानिकोटिशः रूपाणितानिप्रपश्यामिकृतमन्यंनमेसुताः यास्माद्गिरिरा
जराजतनयाकांतप्रियासापुरीकाशीतिप्रथितातथैवकथितावेदैरपारैरपि श्रीतत्रापुनरादरेणबहुधासंसेवनीयामया
नेयंस्यादविशिष्टमस्यचवयःकार्यमयायास्तुसा कःकाशीनगरीवितोकनरतोनस्यात्तपस्याफलंकाशीवासमितिब्रुवंतिसु
नयोवेदाश्चसिद्धाअपि तंवासंप्रवदंतिवासवमुखाप्राप्तंतमीडेपरंकर्तव्यंचनमुह्यतेखलुमयासंसारविच्छेदकं ज्ञातःशंक
रपूजनेनबहुधासंसारदुःखःक्षयःकार्त्स्न्येनभयंशिवार्चनरतःकिंकालभीतोभवेत् यद्यप्येवमथापिमेशिवपुरीमल्लोच
नागोचराजातावाकथमित्यपारविविधक्लेशाश्रितंमानसं भृगुरुवाच स्कन्दंतद्वचःश्रुत्वाकुमारास्तातमादरात् प्रणम्य
दंडवद्भूमावूचुरानतकंधरा अस्माकंकिमिहास्तिकृत्यमधुनाकाशीपुरीनायकानेकालोकनलोलमानसयुतैर्नेत्रैःपवित्रैः
परं दृष्टवाखलुकाशिकापिकमलैर्बिल्वीदलैःकोमलैःकाशीनायकपूजनंप्रतिदिनंकर्तव्यमस्यादरात् स्कन्दाःप्रस्थिताःसर्वे

३७३

